नं. — ४९६२

पु. नाम तारा सहस्रनाम व्याख्याऽसिद्धार्थ चिन्तामणिः

कर्ता. श्रीशिवेश्वरः

पत्र. सं. १२१ — सं. १९४१

विषय. तन्त्रम्.

॥ तारासहस्राभिधानां व्याख्यागुह्यार्थदर्पणाम् ॥
विश्वेश्वरमहाप्राज्ञरचितारञ्जनीनृणाम्।

गी॰
स॰टी॰
२

ॐ श्रीगणेशायनमः ॐ इंदीवरखंडकदंबकसंदर्शानंदोदारकंदर्पपरिवेदितया
दयया आनंदतुंदिलममंदं विदधतीयं देदीप्यते हृदि सदा विशदं तदोजः १
नत्वा मेनंतावरणयुगलं भक्तिबाहुल्यपूर्वं स्वस्ति श्रीमद्भुवजनशिरोरत्नलक्ष्मी
धरस्य तारानाम्नादशाप्तमिदं स्वीयबोधानुरूप्यात्तत्समाख्यायत इह तत्तद्गे
तविश्वेश्वरेण २ तत्रायमाद्यो वस्तुनिर्देशप्रतिपादकः श्लोकः कैलासेति केल
योर्जलभूम्योरस्ति केलसनमस्यवा कैलासः स्फटिकं तस्यायं कैलास इति
स्वामी शिखरासीनमिति पाठे तत्रास्थितमित्यर्थः शिखरदेवमिति पाठेप्यार्थिकः
स एवार्थः महादेवशब्दः अधिविशेषावच्छिन्नेवैतन्मे योगरूढः तथाच स्कंदपु
राणे महतामपिदेवानामहमेव महान्यतः नमत्तोप्यधिकोस्त्यन्यो महादेवस्त
तोस्म्यहं अत्र संवेद्यः स्पष्टतालोकः तत्रासीनमित्यनेन तस्य स्वस्वरूपतात्यह्लासम
योऽव जितः कालानवरोधः प्रतिभानवत्त्वमेते गुणाः कामदुधाः क्रियासु इत्यु
क्तेः इहसीति गोप्यतमत्वं तत्रापरेण महावस्थानस्यानुवितताल्मभवस्वीत १

सैवंयाथार्थ्यंभवानीत्युक्तं नापृष्टःकस्यचिद्ब्रूयान्नचान्यायेनपृच्छत इतिवचनात्
उत्तरदानार्थंप्रीत्येत्युक्तं परमेश्वरेतिसर्वज्ञत्वात्प्रष्टव्यार्थनिर्वचनसामर्थ्यसू
चनं तथाचईश्वरपदंज्ञानादिमत्परेपरमपदार्थेनित्यसर्वविषयस्यतदेकदेशे·
ज्ञानेत्वभेदान्वयः महेश्वरपदेतुरूढिंविहाययोगार्थमात्रपुरस्कारेणसकलजग
दात्मप्राणसकलत्वार्थकं अतःसर्वसामंजस्यं श्रीदेव्युवाचेति उत्कर्षार्थकंश्रीशब्द
प्रयोगः वचपरिभाषणेइत्यस्यलिटिवचिस्वपीतिसंप्रसारणस्य उवाचेतिरूप
कथमितिनिर्दिशनेति तस्यसर्वनियंतृत्वमुक्तं सर्वज्ञेतिप्रष्टव्यार्थनिर्वचनयोग्य
त्वं साधकामंत्रयेसाधयंतितेऽन्नमालोकोत्तरांसिद्धिंमंत्रादेःसर्वप्रसिद्धान् सि
द्धंमंत्रोयदामंत्रीबालिशस्यापिसिद्ध्यति करदत्तादिशत्याज्ञसोपिलोकाकारे
त्युनेति फेत्कारिणीस्मरणात् कथंकेनप्रकारेण लभेतइतिप्रश्नः येनय
थालभेनेतत्प्रकारांतरंमेममहंपृच्छत्यैकथयेतिप्रार्थनेलोट् अन्येषामपिप्रश्न
नानुग्राहकत्वं मेइति तथा चान्यप्रश्नानिरूपितानायकपदराहित्येनलभ्यते ह्यति

ता·स·
टी·
२

2

कथयेत्यनेनवीनीयते देवस्य परेपीति सूत्रात् यथाचवक्ष्योदहृत् पिनाकपकथयाहि
सातांश्चर्षेष्वपिप्रहृतिस्तथाशाङ्कौस्तुभादौ स्पष्टं यद्यपि सिद्धिप्राप्त्युपायो मम
जिज्ञासाविषय इति प्रश्नवाक्यादेवानादिनात्पर्य्यवलेनस्वकथनप्रतीयतएव
तथापि स्पष्टार्थं कथनीयेत्युक्तिः श्रीशंकर उवाचेति स्पष्टं विनेति पूजापंच
विधा तदुक्तं मंत्रतंत्रप्रकाशे पूजापंचविधा प्रोक्ता पंचरात्रादियंत्रके तास्त्वाभि
गमनं चोपादानेज्या ध्यानयोगकाः तत्राभिगमनेनाम मंत्रिभिः परिगम्यते सं
मार्जनोपलेपादिसंस्कारो देवमंदिरे उपादाने भवेद्देवपूजासाधनमेलनम्
ततश्चापि भवेदिज्या गंधपुष्पादिभिः पुनः पीठपूजान्तदेवस्य सांगावरणपूज
ने मंत्रार्थभावनापूर्वं जपो मंत्रस्य कीर्तितं तद्ब्रह्मस्वाध्ययने सम्यक्कृत्वा ध्यायो
मंत्रिभिः स्तुतः गुरुदेवात्मनामैक्यभावने योग उच्यते ध्यानरूपं प्रपंचसारे
यो मनसि देवतायाभावः स्यादेष्य मंत्रिणः सम्यक् संस्थापयेत्तत्र तन्त्रेऽप्येवं ध्या·
नेवदंतितत्त्वविदः गयपशाद्वात्स्वार्थे प्रत्ययाय एव सवत्रिविधः तथा च विष्णुर्हेश्वरा २

तत्रे निजकर्णगोचरो यो मानसः स जपः स्मृतः उपांशुनिजकर्णस्य गोचरः यः परि
कीर्तितः निगदस्तु जनैर्वेद्यस्त्रिविधो जप ईरितः बलिभेदमाह तत्रे द्विविधो ब
लिराख्यातो राजसः सात्त्विकोऽद्बुधैः राजसो मांसरक्ताढ्यः फलत्रयविभूषितः मधु
पायससंयुक्तो मधुरत्रयलोलितः सात्त्विको मांसरहितः शेषमन्यत्तु पूर्ववत्
अत्र लभेतइत्यत्र कर्मानुक्ते पूर्वश्लोकस्य सिद्धेरध्याहारः अत्र सिद्धिकामस्यानियोज्य
त्वे सिद्धेफलत्वे तावद्रात्रिसत्रन्यायेनायाति पठनीयं सदा देवीति विधौ भाव्या
विशेषानभिधानान्नदाकोलायाः स्यात् न वैतस्य प्रजादिफलत्वे स्यैवानुवादमात्रे
त्वमप्रधानाधिकारेणनिर्वाहे अंगेनकल्पनस्यासंभवात् अन्यथा प्रयाजादाव
पितत्कल्पनापत्तेः अन्नपवस्त्रजादिव्यतिरेकेणसिद्धिलाभाभिधाने परार्थत्वा
दर्थवादमात्रे अंगेषुफलश्रुतिरर्थवादइतिन्यायात् अन्यथानद्वियानवैयर्थ्य
र्थ्यापत्तेः एवं च तत्स्तोत्ररूपगुणमात्रविधानमेतदिति अंगत्वमात्रग्राहकमा
नाभावात् सिद्धिं कथंलभेतइति कथमावायेत्तायामस्यप्रहत्याजपाशुपा

ना॰स॰
टी॰
३

कारकसिद्धावपि अनेकफलकामनया स्तोत्रपाठविधेः प्रयत्नत्वात् अवेष्टि
न्यायेनएतत्पाठमात्रमपि प्रयाजेनैवोच्यं नन्वतत्रैतयान्नाद्यकामंयाजयेदिति
पृथक्विधिश्रवणाद्वेष्टियागस्य स्वतंत्रकर्मत्वे प्रकरणवशाद्राजसूययोगत्वा
मिति सिद्धांतः प्रकृतेत्र पठनीयमिति विधिरंगतयोपपद्यते यदिदं पठति स्तो
त्रमित्यादीनां तु यच्छ्रेयनियद्धत्वान्न विधित्वसंभवः पठनीयमित्यंगविधिप्रा
प्तस्यैवानुवादसंभवादिति चेत्सत्यं अत्रापि शिवस्यानेन प्राप्यामित्यादि देशवि
शेषपुरस्कारेण पाठफलसंबंधश्रवणाद्यः शृणुयादिति निःश्रितविधिसमभि
व्याहारायन हि श्रवणस्यागम्यवाधकं किंचिदस्ति नापि रागादितस्तत्प्राप्तिः एते
भ्यः शृणुयादितस्य यच्छ्रेयो गीतेष्य मामार्थेत्यादि विधमावश्यक तथाच वाश
हे नपादाविधिरवश्यं स्वीकार्यः नैवमदीक्षितस्याप्येतत्पाठाधिकारापत्तिः
श्रुतत्वात् अतएव स्तोत्रांतरेष्वपि सर्वशिष्टानां तथानुष्ठानमिति दिक् नाम्नामिति
आदग्राभ्यः संख्यासंख्ये चेति भाष्योक्तेः षष्ठी अशेषत इति द्वितीयार्थे तसिल् अथ २

वाभावप्रधानात्तृतीयार्थे अथवाउपेतितं क्रियमपादानं सर्वतेजआदेरुत्पत्तेरित्यर्थः
कुशलात्प्रवर्तीतिवत् यद्यपिद्वितयोर्गेवस्तुध्यामाष्ट्यंभतथापि भक्तानामित्य
त्रब्रह्मसत्ताब्धेषपाबल्ली भगवत्पाश्रवणप्रहृतत्वदेवष्टएवतिनवक्तव्यं तथा
पिअस्यावश्यमुपादेयत्वस्तुवनार्थंतत् नामास्मिवश्चीत्यादिवत् तदेवंवक्तारोऽनु
बंधाः सिद्धिकामोधिकारीसिद्धिःप्रयोजनं नामसहस्रंप्रतिपाद्यं तेनग्रंथस्य
प्रतिपाद्यकलक्षणःसंबंधइति प्रणम्यादौतेनवक्तव्यः संबंधः सप्रयोजनइति
प्रणम्यादौतेनवक्तव्यःसंबंधःसप्रयोजनइतिप्रक्रमत्वात् विनेति यदित्तृतीया
र्थेनिपातस्यप्रयोगः येनफलंलभते तत्फलंफलहेतु हेतुहेतुमतोरभेदो
पचारः अन्यथाप्युजोपहारादिव्यतिरेकप्रयुक्तफलस्याप्राप्तत्वादसंगततं
स्यादितिध्येयं इदानीमस्यमहाप्रयोजनतांप्रकटीकर्तुं ऋष्यादीन्वक्तुमार
भते अस्येत्यादिनागद्येन तेषांज्ञानस्यावश्यकत्वात् तथाचहेमाद्रौयाज्ञवल्क्यः
आर्षंछंदश्चदैवत्यंविनियोगस्तथैवच वेदितव्यंप्रयत्नेनब्राह्मणेनविशेषतः

स्तः अविदित्वा तु यः कुर्याद्याजनाध्ययनं जपं होममंतर्जलादीनि तस्य
चाल्पफलं भवेत् यस्त्वज्ञानान्ति तेन आर्षं छंदश्च दैवतं विनियोगं ब्राह्म॰
णं च मंत्रार्थज्ञानमेव च एकैकस्य ऋचः सोपि वेद्यो लेनि थिवज्ज्ञवेत् देवता
याश्च सायुज्यं गच्छत्यत्र न संशयः एवोक्तेन प्रकारेण ऋष्यादीन् वेत्ति मोहि
जः अधिकारी भवेत्तस्य रहस्यादिषु कर्मसु येन यदृषिणा दृष्टं सिद्धिः प्राप्ता
च येन वै मंत्रस्य तस्य तन्त्वोक्तमृषेर्भाव तदार्षकं छादनाच्छंद उद्दिष्टं वाससी
इव चाहुतेः आत्मानं छादितो देवैर्मृत्योर्भीतेस्तु यत्पुरा आदित्यैर्वसुभिरु
द्रैस्तेन छंदांसि तानि वै यस्य यस्य तु मंत्रस्य निर्दिष्टा देवता त्वया तदाका
रं भवेत्तस्य दैवतं देवलोच्यते पुराकल्पे समुत्पन्ना मंत्राः कामार्थ एव च अ
नेनैतत्कार्यं विनियोगः स उच्यते एतन्मूलमन्त्राः क्रतुरपि यो ह वा अ
विदितार्षेयछंदोदैवतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति ग
र्तं वा पद्यते इत्यादि अथाह कात्यायनः एतान्यविदित्वा योधीतेऽनुब्रूते जप ४

5

त्तिजुहोतियजतेयाजयते तस्यब्रह्मनिर्धीर्यंजानयामंभवत्यथांतराष्ट्रगर्नेका
यते स्थाणुंवर्च्छतिप्रमीयते वापापीयान्भवत्यथविज्ञायेतानियोधीतेतस्यवी
र्यवदथयोर्थवित्तस्यवीर्यवत्तरंभवतिजपित्वाच प्रपंचसारे ऋषिवर्णादिकोधात्
स्तोगत्याप्रापणेनच यात्याप्यानत्स्वरूपेस्तगुरुः स्यादृषिवाचकः छद्दानार्थ
कोधातुस्तच्छंदादिस्तुदादिकः तयोरिच्छांददातीतिछंदोमंत्राणांवाचकं आत्म
नोदेवताभावप्रदानाद्देवतेतिच पदंसमस्तंतंत्रेषुविद्वद्भिःपरिकीर्तितं ऋधा
तुर्गतिप्राप्त्युभयार्थः षिधातुर्ज्ञानार्थः ज्ञानप्रदत्वादृषिपदस्यगुरुर्वाच्यः छंद
धातुरिच्छार्थः दाधातुर्दानार्थः इच्छापदंछंदपदस्यार्थः इतिनैरुक्तव्युत्पत्तिरि
त्यर्थः तथाचोक्तंसारसंग्रहे ऋवर्णादिस्तुगत्यर्थोधातुःप्राप्त्यर्थकस्तथा षि
वर्णार्थस्तुविज्ञानमा‥‥प्रापकश्चसः अनयोरूपसंपत्तौऋषिर्गुरुरितीरितः
छदीतिधातुरिच्छायांदादिदानार्थकोभवेत् छंदोवक्तिमनोर्वर्णाद्वयोरिच्छा
प्रदानतः कोडार्थकाददातीतिसंपन्नंदेवतापदे सायकायात्मनोभावंददातीतिज

ना॰स॰
टी॰
५

गुर्यतः दिवेः क्रीडार्थी देवशब्दः उक्तार्थपरइत्यर्थः श्रीरुद्रयामले हृदस्थवो॰
॰धकायान्म॰ न्तरेभागे ऋषिरेको भवत्ततः स्वदोम्यनामयाश्रित्य स्तनिर्वेषयस्क॰
शिवः ऋतिगादिसवैनियाननाडासिकुशब्दः साधुः मूलेलग्नकवेजटेस॰
मरः पिंगोग्रैकजटो ध्यायेदिति फेत्कारिण्यां वाक्यप्रमाणपदसागरपारगस्य
लक्ष्मीधराभिधबुधस्य तनूद्भवेन विश्वेश्वरेण विहिते गिरिजाभिधार्थचिंताम
णिमयमगात्प्रथमो मयूषः १ किरणसहस्राभिर्वेतन्सौरेमोहांधकारविच्छेदि
तारानामसहस्रे सर्वोत्कर्षेण वर्तते १ तत्रान्यासामपिस्त्रीतां कांतानां भगवत्याः
सर्वात्मकत्वस्तवनार्थनामान्यत्र वद्द्यते उक्तंच वराहपुराणे नियोसौम्यानिना
मानि यानिस्त्रानोद्भवानिच तानितस्याविशालाक्ष्याद्रष्टव्यानिवरानने कूर्म
पुराणेपि शाक्तयोगिगिरिजादेवीशक्तिमेनोद्भवशंकरः मत्स्यपुराणे नत्वयार
हितं किंचिद्ब्रह्मांडेऽस्मिंश्चराचरे इतिदत्तोक्तिः मार्कंडेयपुराणे विद्यास्सम
स्तास्तवदेविभेदाः स्त्रियः समस्ताः सकलाजगत्स्वित्यादि अत एव तन्त्रैव स्त्र ५

न्यासांवलमाश्रित्ययुध्यसेयातिमानिनीतिशुंभोक्तौ अहंविभूत्यावहुभिरिहरूपै
र्यदास्थितेत्यनेनग्रंथेनवैसवादीनांभगवत्याकेवलयोक्तिः संगछते लिंगपुरा
णेपि शंकरः पुरुषाःसर्वेस्त्रियःसर्वामहेश्वरी पुंलिंगशब्दवाच्यायेतेचरुद्राःप्रकी
र्तिताः स्त्रीलिंगशब्दवाच्यायाःसर्वाःगौर्याविभूतयः सर्वेस्त्रीपुरुषाःप्रोक्तास्तयो
रेवविभूतयः यस्ययस्यपदार्थस्ययायाशक्तिरुदाहृता सासायिश्वरीदेवीश
र्वेः सर्वोमहेश्वरः शक्तिमंतःपदार्थायेतेवैशार्वस्यभूतयः पदार्थशक्तयोया
यास्तागौरीतिविद्धुधाः अष्टौप्रकृतयोदेव्यामूर्तयःपरिकीर्तिताः तथाविकृ
तयस्तस्यादेहवद्धाविभूतयः विस्फुलिंगायथांतद्वदग्नौचबहुधायास्थिताः जीवाः
सर्वेतथाशर्वोद्वंद्वसत्यमुपागताः गौरीरूपाणिसर्वाणिशरीराणिशरीरिणां
शरीरिणस्तथासर्वेशंकरांशाव्यवस्थिताः श्राव्यंसर्वंमुमारूपंश्रोतादेवोमहे
श्वरः विषयित्वंविभुर्धत्तेविषयात्मकतामुमा स्रष्टव्यंवस्तुजातंतुधत्तेशंकर
वल्लभा स्रष्टास्वयंविश्वात्मावालचंद्रार्धशेखरः दृश्यवस्तुप्रजारूपंविभर्तिभव

ना॰सा॰
टी॰
६

नेश्वरी इच्छादिविशेषश्रीदेवः शक्तिदेहः शिवस्यामणिः रस्यजातमस्माद्रूपंप्रेयजातेव
सर्वेशः देवीरसयिनाशंभुर्भ्रातावभुवनेश्वरः मेतयवदस्तुनोधनेमहादेवीमहेश्व
री मेतासएववविश्वात्मामहादेवीमहेश्वरः वोद्रवयवस्तुरूपंववविर्निहरवल्लभा दे
वः सएवभगवान्वोड्डावालेंडशेश्वरः पीठाकृतिरुमादेवीलिंगरूपश्चशंकरः
प्रतिष्ठाप्यविधानेनपूजयंतिसुरासुराः येयेपदार्थालिंगाकारास्तेतेशार्वेविभूत
यः अर्थाभगाकृतयियेतेतेगौर्य्याविभूतयः स्वर्गपाताललोकांतेब्रह्माण्डाव
रणाष्टके ज्ञेयंसर्वमुमारूपंत्तातादेवीमहेश्वरः विभर्त्तिदितत्रंतादेवीत्रिपुरां
तकवल्लभा देवत्तत्तंभवेर्थितेभगवान्नंतकांतकः सर्वाकारोस्थितावेतौनरै
श्रेयोर्थिभिः सदा पूजनीयौनमस्कार्य्यौचिंतनीयौवसर्वदा समयाचारएवक्तं
स्त्रीजातिरूपासर्वत्रसर्वाड्डनियामता साशक्तिरूपाविज्ञेयाश्वरुषः शिवरू
पवान् एवंचलादाणेकात्समन्येषांनाम्नोद्रष्टव्यं अतएवतदुच्चारणेनतद्देवता
नामग्रहणजन्यफलातिशयेनभवति तद्वायंकत्वाभावात् नामग्रहणविधिना ६

6

तद्वाचकानामेवोपादानादिति तानि च पूजायां च तर्प्पणे तेन विधिना समर्पितव्यानि
होमपूजनयोः स्वाहान्यासतर्प्पणयोर्नमः इति सनामसर्वसंस्थानो मंत्र इत्यभिधी
यते इति ब्रह्मपुराणस्यैव प्रमाणत्वात् न च तेषां नामत्वमेव नास्तीति वाच्यम्
एतन्मध्यपाठेन तत्संदर्भे विशेषेऽहं शादिसत्तावत् शाकल्यच्छेदेन नामत्वे वाध
काभावात् स्तोत्रवाक्यत्वेन पृथक्त्वापत्त्यार्थप्रयोगो नास्तीति तत्क्रमेव अ
न्यथा सहस्रनामसंज्ञाविलोपापत्ते एवं च न्यायप्रसिद्ध एवार्थे कूर्मपुराणादिषु
क्तसहस्रनामस्तोत्रेषु नामभिः केवलैरेव पूजाविधानमपि संगच्छते अत्र च
एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजं स्नापयामास च विभुः पूजयामास पंक
जैरिति लिंगपुराणीयं ततो नामसहस्रेण तुष्टाव परमेश्वरं प्रतिनामसप
द्मैश्च तमिष्ट्वा वृषभध्वजं इत्यादित्यपुराणीयमाख्यानमप्युपोद्बलकं भव
तीति दिक् नमस्वास्ति स्वाहेति च तर्प्पणीविधानात् तत्र सौकर्य्यार्थं रूपनिर्णय
प्रक्रियां वक्ष्यामः आदौ तेषु चतुर्थ्येकवचने याडापइति याटि कृते हृद्भिः नधं

तेषु आटिपणिकृतेहद्भिः इकोरोकारान्तेषु ङिः त्तिह्रस्वश्चेतिपसे विसंज्ञाविया
नाङ्गुणः अन्यदानेदीसाम्यमेव तत्ररूपे भेदो याहद्धिकः कार्य्यं हलन्तानां
तथुर्वदेवरूपमित्यादिक तत्र प्रयानत्वात्सर्वमंगलायतनत्वात् देवतामा
नामप्रथममुपन्यस्यति ॐतारेत्ता ॐ अत्रयुत्पत्ति महाथर्वणीश्रुतिः ता
रयन्तीतितारेति एवंपदादितादगिति प्रकारः सूचितः भैरवीतंत्रमपि ता
रकत्वात्सदातारासर्वमोक्षप्रदायिनीति अवश्यपेक्षायांवसंसारएवंतथा
त्येनपर्यवस्यति अतएव मोक्षरूपपरमपुरुषार्थहेतुत्वंव्यज्यते तथाग्रेवव
तेषु स्फुटीभविष्यति अथवातारः प्रणवः तदुक्तमंत्रत्वात् वेदाद्यमन्त्रस्वेषुक्ता
चेत्ताराविभवनतारिणीतिफेत्कारिणीयवचनात् प्रणवो ह्यस्य सा ब्रह्मस्वरूप
तयास्वपावकत्वाद्वा ॐतत्सदितिनिर्देशो ब्रह्मणस्त्रिविधः स्मृत इति श्रुतेः स्व
ग्रीवभार्य्यारूपत्वाद्वा तथाच मत्स्यपुराणे दत्तप्रतिदेशक्तिः ताराकिष्किंधप
र्वतेइति वृहद्देवीमन्तानागास्वग्रीवगुरुयोषितेतिविश्वः १ रात्रिरिति देवा ७

स्वरूपत्वात् रात्रिरूपायतोदेवीदिवारूपोमहेश्वरइतिवचनात् रात्रिपर्य्यटनेचैवरात्रौ
शक्तिप्रपूजने प्रकृत्वाकथमीशानमद्भक्तः कौलिकोभवेदितितस्याः पूजाकालत्वे
नोक्तं निशिभ्रमंतिभूतानिशाकयः स्थूलभूषणइत्यादिस्मृतिवचनाच्च ब्रह्मवचने
नमेनाकुदिगतायाभगवत्यास्तयाश्यामीकृतत्वाद्वाशक्तिविशेषरूपत्वाद्वा २ म
हारात्रिरिति योगिनीविशेषरूपत्वात् एतत्पूजायांतस्याः प्रशस्तत्वाद्वा ३ उक्तंचवी
रतंत्रे अर्द्धरात्रात्परंयच्च मुहूर्त्तद्वयमेवच सामहारात्रिरुद्दिष्टेति द्वितीयतृतीयरात्रि
प्रहरयोर्महानिशात्वं महानिशात्तुविज्ञेयामध्यमस्यप्रहरद्वयमितिहेमाद्रौदेवलवच
नात् अतएव वीरपूजामहेशानिजामिन्याः प्रहरेगतेइतिवीरचूडामणावुक्तम् ४
कालरात्रिरिति नडक्तंवराहपुराणे संहारकारिणीदेवीकालरात्रिंचयाविदुः
संहारिणीतिसादेवीकालरात्रिः प्रकीर्तितेति तथाचज्ञानार्णवे रुद्रस्तुपरमेशानिशि
वोनिश्चलएवहि प्रसेनीरुद्रशक्तिस्तुनमोरूपावरानने एतेनब्रह्मांडनाशकत्वेनेश्व
रसिद्धिरितितत्रप्रमाणमपिसूचितं तथाचन्यायकुसुमांजलौ ब्रह्मांडादिद्व्यणुक

ना॰स॰
टी॰
८

पर्यंतंहिजगत्प्रपंचंतद्वदिनाश्यं विनाशयन् पाययमानंघटवत् सर्वभूतानि
कौंतेयप्रकृतिंयांतिमामिकां कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहमि
ति यद्वास्वप्राधिदेवतात्वात् तथाशौनकः एवमादीनिचान्यानिकृत्युक्तानिबहू
न्यपि स्वप्नमान्यानानिचैतेषांकालरात्रिरधिदेवता पूजाविधानंपूर्वोक्तंकुर्यादत्रा
पियन्ततः ४ कपालिनीति स्यात्कर्परःकपालोस्त्रीत्यमरः कपालयति मू
र्ध्नोब्रह्मणइतिस्वामी उक्तंचफेत्कारिणीतंत्रे कपालोत्पलसंयुक्तसव्यपाणि
युगान्वितामिति ५ कालिकेति कालश्यामलमेचकाइत्यमरः ङीषंतात्स्वा
र्थेकः उक्तंहिमार्कंडेयपुराणे तस्यांविनिर्गतायांतुकृष्णाभूत्सापिपार्वती का
लिकेतिसमाख्याताहिमाचलकृताश्रया तथाचवीरचूडामणौ याकालीसा
महातारायातारा कालिकास्मृता उभयोर्भेदभावेनसिद्धिहानिस्तुजायते का
लीतंत्रे यथाकालीतथातारायथातारातथोन्मुखी उन्मुखीछिन्नमस्तेत्यर्थः
अतस्तद्विषय कवचसारस्यमपात्रातिदेशाद्विषयैक्यंज्ञेयं गंधर्वतंत्रे यथाकाली ८

तथा तारायां ताराकालिके वसा उभयोर्न हि भेदोऽस्तीति अथवा मस्तवशीर्षंजलेषु
कं इति विश्वः ललाटमलिकं गोधिरित्यमरः कं मूर्द्धनि अलिकानि कपालानि य
स्याः सप्तमी विशेषणे बहुव्रीहाविति सप्तम्याः पूर्वनिपातविधानादेव ज्ञापकाद्व्य
धिकरणेऽपि बहुव्रीहिः तथा च तन्त्रचूडामणौ श्वेतास्थिपट्टिकायुक्तकपालपञ्च
शोभितां पञ्चमुद्राविभूषितामिति फकारिरूपा ६ कामदेति कामः स्मरेऽभि
लाषे चेति विश्वः तं ददाति आतश्चेति कः इच्छाविषयीभूतार्थदानेनात्यये उक्तं च
फेत्कारिण्यां यामवाप्य महात्मानो धर्मकामार्थमुक्तिषु नासाध्यं मेनिरे किंचित्
कवयः शुद्धबुद्धयः ७ मायेति तदुक्तं कूर्मपुराणे तस्य सर्वगतस्यैते शक्तिर्मायेति
विश्रुता तयेदं भ्रामयेदीशो मायावी पुरुषोत्तमः मायां तु शार्वशक्तीनामिति वत
न्त्रोक्तं अत एव मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं इति श्रुतिः तत्र मायेति
सत्त्वरजस्तमसां साम्यावस्था मूलप्रकृतिरिति सांख्यमते वेदान्तिनां तु आवरणा
दिशक्तिमत्यविद्यैव तदर्थः शिवमेवेश्वरं प्राहुर्मायां गौरीं विदुर्बुधा इति लिङ्गपु

ना॰स॰ टी॰ ५

राणं इश्वरस्य प्रकृत्यमिशानत्वाहृदयस्थाणव्याविद्याविषयत्वात्तद्रूपतोक्तिः यद्वामा
यावीजस्वरूपमेवत्वात् प्रत्येकवीजानामपिमंत्रत्वश्रवणात् वीजमंत्राः स्वतंत्रा
स्सत्वारिएयाः सर्वसिद्धिदाः ८ महामायेति महेश्वरादिवपदे महामायाहरे
श्चेषात्तयासंमोह्यतेजगदिति मार्कंडेयपुराणात् यद्वामयत्वानर्थानियात्सनु
मारात्मायात्ताने वपुनास्तित निषुंटदर्शनाद्वमायापदंज्ञानपरम् स्फुटवेदमदो
तसिद्धौ तत्रमहामायापदहात्यवशोत्वचैतन्यपरमितिवोध्यं ९ महोत्सवेति
महानुत्सवोऽस्याः महउद्धवउत्सवइत्यमरः अतएवपुनरुक्तवदाभासोयमलंका
रः किंवामहस्तेजः तत्वप्रतिवादिनामर्थानुरोधात् ततोदमनस्यणेश्चस्मात् क्षिपृ
ईटपाः सवोयपाः पूजादित्पायप्याः यज्ञः सवोध्वरोयागइत्यमरः उक्तंदिहद्र
यामले वादेसदसियावाक्यंस्तंभिनीप्रतिवादिनां विद्याहानिकरीवैरिविड्वषां
वलिदानतः फेत्कारिणीतंत्रे मंत्रस्यज्ञानमात्रेणअनुभावद्वयंभवेत् तात्का
लिकीचकवितापरैरनभिभाष्यता १० महादानरतेति महादानमत्रविद्यादान ८

१

त्रयं विद्यादानात्परं दानं श्रूयते नाधिकं किलेत्यादि तत्पुराणगत् तथा चोक्तं कालीतंत्रे
संस्कृताः प्राकृताः शब्दा लौकिका वैदिकास्तथा ते सर्वे वशमायांति साधकस्य च नान्य
था रुद्रयामले अव्याहतमतिः प्राज्ञो विजयी वाक्पतेरपि मत्स्यसूक्ते यद्यज्ज्ञात्वा नरो भा
ति वाचस्पतिरिवापरः ११ यज्ञेति इज्यते पूज्यते इति यज्ञा यज्ञेन यज्ञमयजंत देवा इत्यत्र
मंत्रभाष्यकारैरपि कर्मपरत्वेन व्याख्यानात् यद्वा यज्ञो सम्यस्यास्त उद्देश्यभूतत्वादिमर्थं
देवतोद्देश्यक द्रव्यात्यागस्यैव यज्ञत्वात् १२ यज्ञोत्सर्वं विभूषितेति यज्ञे रूपयागादौ उत्स
वेन प्रांकाराहित्यादि रूपेण साधकनिष्ठेन विभूषिता संतुष्टेति यावत् उक्तं च ज्ञानार्णवे
विचिकित्सापरो मंत्री जायते गुरुतल्पगः अतएव महेशानि निर्विकल्पः सदा भवेत् १३
चंद्रवक्त्रेति चंद्र इव वक्त्रं यस्याः इति बहुव्रीहिणा उपमा प्रत्याय्यते तदुक्तमाचार्यदंडिना
समासश्च बहुव्रीहिः शशांकवदनादिषु सादृश्यसूचक इति शेषः १४ चकोराक्षीति
चकोरस्याक्षिणी इवाक्षिणी यस्याः उपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्च बहु
व्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच् षिद्गौरादिभ्यश्चेति ङीष् १५ चारुनेत्रेति सुंदरे हविरे चारु

ता॰स॰
टी॰
१०

इत्यमरः रम्यवस्त्रेतिवार्थः कर्पूरेंदुनिभासितांवरयुगामिति मंत्रभेदेध्यानोक्तेः १६
सलोचनेति शोभनानिलोचनानियस्याः इत्यस्यपदविग्रहोनित्यसमासत्वात् १७ त्रि
नेत्रेति चंद्रसूर्याग्निमयलोचनेतिभावः तथानीलतंत्रे बालार्कमंडलाकारादिलोच
नेत्रयभूषिताम् १८ चलपद्माक्षीति चलेतिनेत्रचापल्यार्थंविशेषणं स्पष्टमन्यत् १९
कुरंगाक्षीतिपणः कुरंगोहरिणेमृगः स्यादितिहलायुधः २० मनोहरेति रम्येतिभा
वः अविद्यापहारकत्वाद्वा यद्वामनसिहरोयस्याः तद्विषयकानुरागवत्वात् २१ ब्रा
ह्मीति ब्रह्मोजातावितिनिपातनादंत्यलोपः तथाचवराहपुराणे देव्यामूर्तित्रयंउक्त्वा
यासाब्राह्मीशिवामूर्तिस्तयासृजतिवैप्रजाः सौम्यरूपेणसृष्टिंयागीब्राह्मीसृष्टिविधा
नतः २२ नारायणीति उक्तंहिमत्स्यपुराणे नारायणीसुपार्श्वेतिति वराहपुराणे
यासारक्तेनवर्णेनसुरूपातनुमध्यमा प्रोक्ताचक्रकरादेवीवैष्णवीतंजगामह एषा
नारायणोपास्याविद्यासर्वसमृद्धिदेति एतदीयभेदोक्तेर्वा २२ ज्योत्स्नेति चंद्रोविद्य
नेत्रस्यांतथा ज्योत्स्नातमिस्रेत्यादिनानिपातः यद्वाम्नायशुद्धिपरं ज्ञाप्योविभावः १०

क्विप् उत्कृष्टास्नायस्याः इति वेदमार्गैर्वेदवीहिः ज्यामौर्वीज्याव स्त्रेषु वेतिशाश्वतः ज्या याभू
मौ उत्क्रेतितनस्त्रुरुषः अन्येभ्यः शुद्धिदेवेभ्यः उत्कृष्टा भक्तानां शुद्ध्यतिशायेहेतुरित्यर्थः २४
वारुकेशीति स्वांगादितिङीप् २५ सलोवनेति सलोवः सवेनलोवयितृत्वंशाक्यः नो
नमस्कारोयस्याः नमतेर्डप्रत्ययः एकादशकोशेतथादर्शनात् सुवाराध्येतियावत् २६
वाराहीति शक्तिविशेषरूपत्वात् काशीखंडे अन्यास्तिकाश्यांवाराहीक्रतुवा
राह सन्निधौ तांप्रणम्य नरोभक्त्याविपदब्धौनमज्जति अथवावराहाहिः सर्पश्रेष्ठः
अहिर्हेत्रा सुरेसर्पेइत्यभिधानात् तस्येयंवाराही अतोस्याः सर्वमहेत्पास्त्रिमूर्त्तिर्नागत्रय
श्रगत्रयधारिणीनिभावचूडामणिवचनात् अतोभ्यऋषिरेतस्याहूहती छंदः इति नवशक्ति
अतोभ्य नागसेपत्रजटाजूटांवरप्रदामितितंत्रचूडामणिवचनाच्च वामनपुराणे
महोग्रसुधालारौद्रादंष्ट्रोत्कटनवसुधरा वाराहीदृष्टतोजाताशेषनागोपरिस्थिता
वाराहीमातृभेदेस्याद्धृष्टिनामौषधेपिचेतिविश्वः २७ वारुणीतिवरुणस्तरुभेदस्त
प्रतीचीपतिसूर्ययोरितिविश्वः यद्वा वारुणीर्वशिष्ठः तस्येयंतदापत्यत्वात् वशिष्ठा

ना.स.
टी.
११

राधिता देवी न च पीठस्थ फलाय तत इत्यादौ शापोद्धारादेः कृतत्वात् २८ विद्येति मन्त्रि हे
उक्तात् तथा च मार्कण्डेयपुराणे सा विद्या परमा मुक्तेर्हेतुभूता सनातनी तथ्य पद्रस्त्व
न्तु हन्तौ विद्यया देवलोको देवलोको वै लोकानां श्रेष्ठस्तस्माद्विद्यां प्रशंसन्तीति श्रु
तेस्तद्रूपत्वाद्वा यद्वा समयाचारे मन्त्राः केचित्कथ्यन्ते केचिद्विद्याः प्रकीर्तिताः
पुंनामदेवता मन्त्रा विद्या स्त्रीनामतः स्मृताः शारदातिलके प्युक्तं मन्त्रविद्याविभे
देन हि विद्या मन्त्रजातयः मन्त्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः पुनः २९ महाविद्ये
ति तथा च मुण्डमालायां काली तारा महाविद्या षोडशी भुवनेश्वरी भैरवी छिन्नम
स्ता च विद्या धूमावती तथा बगला सिद्धविद्या च मातङ्गी कमलात्मिका एता द
श महाविद्या महाविद्याः प्रकीर्तिताः अत्यन्तदुर्लभा लोके षडाम्नायनमस्कृताः ३०
महेश्वरीति पुंयोगलक्षणो ङीष् महाकाले महेश्वरीति मत्स्यपुराणात् ३१
पिंगाक्षं चितकेशीति तद्धि च सम्बद्धे पादशूरवरुण इत्यमरात् वकारोऽवार्थः एवं तथा
दीनामपि बोध्यं पिंगाश्राक्षं चिता वक्षाश्च केशा यस्या इति त्रिपदो बहुव्रीहिः उर्मि ११

त्रियोगित्वंकालपरिच्छेदा तथावादैतात्मतत्वरूपेत्यर्थः तडुक्तंकूर्मपुराणे मांविद्धि
परमांशक्तिंमहेश्वरसमाश्रया अनन्यामव्ययामेकांयांपश्यंतिमुमुक्षवः ४९ नित्यम
पीति नित्यंब्रह्मअतोन्यदानैमित्तिकृतेः तत्स्वरूपेत्यर्थः कूर्मपुराणे शक्तिशक्तिम
तोर्भेदंवदंतिपरमार्थतः अभेदंचानुपश्यंतियोगिनस्तत्वचिंतकाः परमार्थतश्चया
स्योत्तराद्वैतसेवेयः ५० नंदेति नंदयतिभक्तानितितथा नंदाहिमवतःपृष्ठेइतिमात्स्ये
भद्रेति भद्रंकरोतीतिणिपतात्पचायचिरूपं भकरणादिशेषः तिथिविशेषोवाअहं
भद्राचभद्राहं नावयोगरेक्तविदिति विष्टित्यक्तामहाष्टम्यामत्पूजांकरोतियः
तस्यपूजाफलंनस्यात्तेनाहमवमानितेतिनवरात्रिप्रकरणेसर्वेनिर्वयोदाहृतवचना
त् ५१ नीलसरस्वतीति गीर्वाग्वाणीसरस्वतीत्यमरः ब्रह्मलोकेसरःसमाश्रित्यशा
पान्नदीभूत्वालोकमवतीर्णेतिपदेवेदिकायां उक्तंचश्रीरुद्रयामले एतस्मिन्नेव
लेवकालेतुमेरोःशृंगपरायणः जयजाप्यंसमासाद्यत्रियुगंवततनाप्यितः ममार्हं
वक्त्रालिंगत्यतेजोराशिविनिर्गता हृदेवालेनिपत्यैवनीलवर्णाभवात्पुरा ५४ गा ५२

ना॰स॰
टी॰
२२

यत्रीति गायंतं त्रायते यस्माद्गायत्री तेन सा स्मृतेति गायत्रीनिःप्रपंचसारादयः श्रेतो
नुपसर्गे इति कः गौरादित्वात् ङीष् इति यद्वचंद्रिकायां गायत्री ब्रह्मपुराणे साहै
षा गयांस्तत्रे प्राणा वै गयास्तान्यद्भयास्तत्रेन स्माद्गायत्री नामेति तदिदं श्रुत्यनिरुद्धयम
पि निबद्धं पद्मपुराणे गायंतं त्रायते यस्माद्गायत्री तेन सा स्मृता गयाः प्राणाः स्मृता
नित्यं श्रुतीनां पारदृश्वभिः त्रायते जपतः प्राणान् गायत्री तेन वा स्मृता मत्स्यपुराणे
गायत्री वेदवदने इति देशुक्तिः गायत्री वा इदं सर्वं यदिदं किंचेत्यादिवाक्ये गायत्री
पदे ब्रह्म परमिति वेदांतिनः ४५ स्वचरित्रेति पुण्यभनं चरित्रमस्याः वरेण्या दि
कहृत्रः ४६ कौलव्रतपरायणेति कुलसंवेधिन्या कौलव्रतं तदागमोक्तं तत्रपरा
यणासक्तेत्यर्थः आश्रयेत परां भीष्टपाणपणपदं विदुरिति शास्त्रतः महाचीनक्रमे
णैव कृत्वा त्वाप्रि फलप्रदेति कालीतंत्रात् ४७ हिरण्यगर्भेति हिरण्यं ब्रह्मैनं तदं
डमहण्डं तदुद्भवत्वात्तथा तदेडमभवद्धैममिति पुराणात् तदुक्तं ज्ञानार्णवे ब्रह्मणः
परमेशानि मातृत्वेस्ति हिरण्यके वामाशक्ते स्मृविज्ञेया ब्रह्मा प्रेतो न संशयः क्रमेणु ३

मन्कुंवित्तेनन्नमित्यमरः पिंगोग्रैकजटां ध्यायेदित्युक्तेः कुंवित्तत्वेसाम्तुङ्गिकोक्तत्वा
त् ३२ महायज्ञस्वरूपिणीति वेदस्वरूपत्वात् यद्वा महायज्ञेदत्तफलत्वस्वांत्मी
येरूपयतिपश्यतितथा सतीरूपेइतिभावः साक्षान्नाहतायिस्वकीयत्वेतुद्वात
जगतेतिश्रीभागवतादौप्रसिद्धेः यद्वामहायज्ञानांस्वंआत्मानंरूपयतिरूपवंत
करोतितथा स्वर्गादिष्टकार्यतानिरूपितकारणतानिर्वाहकदेवताप्रीतिः
रूपव्यापाराश्रयत्वादितिभावः तृतमवेनमिंद्रः प्रजयापशुभिश्चतर्पयतीतिश्रु
त्या देवताप्रीतिरेवाशुविनाशिनांयागादीनांव्यापारइत्तिवेदांतिनः नैयायिका
मतेपिअदृष्टाधिष्टातृत्वात्तथा यद्वायज्ञेषुस्वमेवरूपंस्वरूपंतदस्याः इष्टदे
वतेहियेत्तस्यरूपमितिमीमांसकसंप्रदायः एतेनसर्वदेवतात्मकत्वंचने २२
गौरीति गौरोरुणेसितेपीतेइत्यमरः गौरादित्वात्ङीष् स्कंदपुराणे इदंस्वामि
देवतेदिव्यंवपुःकनकसन्निभं गौरीतिलोकेव्याख्यातंभवेयंकमलोद्भवं कात्य
कुब्जेतथागौरीमत्स्यपुराणे ३४ चंपकवर्णेति चंपकोहेमपुष्पकमित्यमरः रुक्

ना॰स॰
टी॰
१२

12/2

पुष्पं बिल्वपत्रं चंपकं नागकेसरम् इति मुंडमालोक्तिर्वा यद्वा रक्तोत्पलैर्महीं लक्ष्मीं लभ
ते पुष्पकमिति [illegible]सोमप्रकरणे वीरचूडामणावुक्तेः २५ कृष्णांगीति यथाप्रशस्तेभ्रव
लग्नादीनां तत्तुल्यादित्यर्थः व्यक्त्वा मा कोटराक्षीति भद्रकालीध्यानाद्वा २६ कुलप्र
जितेति कुलशब्दोद्रव्यविशेषेषु आगमपरिभाषिताः तत्र कालीतंत्रादावुक्ते २७
सर्वानंदस्वरूपेति मोक्षानंदपर्यवसानेषामंतर्भावात् एतस्यैवानंदस्य वा सर्वा
णि भूतानि मात्रामुपजीवंतीति श्रुतेः यावानर्थ उदः पाने सर्वतः संप्लुतोदके
तावान्सर्वेषु देवेषु ब्राह्मणस्य विजानत इति भगवदुक्तेश्च २८ सर्वसंकटतारिणी
ति तदाह आथर्वणश्रुतिः अथ तारिणी भयतारिणी ब्रह्महत्यातारिणी महापा
तकतारिणीमिति मार्कंडेयपुराणे रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबला
नि यत्र दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं २९ नित्येति क्लीबे
पुंसि आद्यसंतेस्यात्त्रिष्वेषाभेद्यगामिषदित्यमरः वस्तुदेशकाललक्षणपरिच्छेदरहितेत्य
र्थः भेदप्रतियोगित्वं वस्तुपरिच्छेदः अत्यंताभावप्रतियोगित्वं देशपरिच्छेदः ध्वंसप्र
२

राणे सर्वं करोमि सकलं तस्याः कार्य्यमिदं जगत् न कार्यं नापि करणमीश्वरस्येति स्मर
मः ४८ भूर्गर्भेति भूमिर्गर्भे यस्याः तडुद्भवत्वात् वसुन्तस्त्रिकोणान्तर्गतयंत्रत्वा
त् सर्वयोनि गोमयेनाहृपत्रमङ्गे स्नशोभने भूधरेयस्नपत्राध्यं यंत्रमेकजठात्मकं
मिति फेत्कारिणीवचनात् गोमयेनेत्यत्र चंदनेनेतिपाठांतरं देहात्मनोर्यथाभेदो
यंत्रदेवतयोस्तथेति त्रिभेदारोपणात्पर्य्यकें कौलावलीयाद्येतिपरमार्थः ४५ वि
श्वगर्भेति संहारकत्वेन कुक्षिगतलोकत्वात् सद्रूपेण सर्वानुस्यूतत्वादा अस्ति
भाति प्रियं रूपं नाम चेत्यंशपंचकं आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयं खंवाताग्नि
जलोर्वीषु देवतिर्यङ्नरादिषु अभिन्नाः सच्चिदानंदाभिधेयेते रूपनामनी इति वेदान्तोक्तेः ५
यशस्विनीति भूम्नि प्रशंसायां नित्ययोगे ऽतिशायने वा ऽस्त्यायेत्यादिना विनि प्रत्ययः
यशश्च ब्रह्मात्मतया सकलवेदान्ततात्पर्यविषयत्वरूपं तच्चोत्तरमीमांसायां प्र
थमाध्यायस्पष्टं ५८ हिमवत्तनयेति हिमवान् लिषये विंध्यइति पर्वतभेदे षम
रः मत्स्यपुराणे हिमाचलेपतिनारदोक्तिः जननी सर्वलोकस्य सं भूता मञ्जभावि

ना॰स॰
टी॰
२९

नी शिवेयंपावनीयेवतन्त्रेमन्त्रे पावकश्रुतिः कूर्मपुराणे अहंवैयाचितादेवैः संजाता
परमेश्वरात् विनिंद्यदक्षंपितरं महेश्वरविनिंदकं धर्मसंस्थापनार्थायतस्यदाराधन
कारणात् मेनादेहसमुत्पन्नातामेवपितरंश्रिता ५२ दिव्येति दिगादित्वाद्यत्
दिव्यंलवंगकेदिव्ये वलोदिविभवेन्यवदितिविश्वः वीराचारप्रियत्वादित्यर्थः
वीरदिव्ययोरल्पभेदत्वात् दिव्येवीरेनभेदोस्तियद्भेदंतत्तुकथ्यते शृणुतोपिनी
लोमधुरःकलानावण्यसंयुतः दिवन्क्लिद्ववत्सायोवीरश्चोद्धतमानसः इतिभाव
चूडामणिवचनात् ५३ दिव्यांवरविभूषणेति स्पष्टार्थंतदुक्तंपुराणे ब्रह्मजैर्वा
पिवस्त्रैरभ्यर्च्यशैलजां संभूष्याभरणैः प्राक्चक्रवर्तित्तमाप्नुयात् ब्रह्मजेकोपासे
यद्वादिव्यंउत्तमंश्रेवरे ब्रह्मरंध्रस्वरूपमाकाशंतद्विहारित्वात् तदुक्तंनीलतंत्रे उ
त्पायचोत्तरेयामेचिंतयेदुग्रतारिणीं मूलादिब्रह्मरंध्रांतेविश्रांतेनस्वरूपिणीं ५४
जगन्मातेति सृष्टवन्महदित्यादिनाउणादौनिपातोजगच्छब्दः सर्वेब्रह्मादयोप्यस्यं
मदंष्ट्राभावसंभवा इतिकुलचूडामणिवचनात् ५५ जगद्धात्रीति धारणात्वा ८

लनाद्वात्तन्न्योगेषष्ट्यास्तृजकाभ्यामिति सात्तवेयकत्तन्ग्रहणेनऽज्ञापनात्तदंतेन
षष्ठीसमासः तथाचश्रुतिः यतस्यवाश्रेदतरस्य प्रशासने गार्गिद्यावापृथिवीविधृ
तेतिष्ठत इति ५६ जगतामुपकारिणीति उपकरोतिधनादिदानेनेत्यर्थः भाष्यम
तेस्तन्ग्रहणस्य उपसर्गनिवृत्त्यर्थताभावात् णिनिसिद्धिः जगत्पदस्य संसार्यात्म
परे तया सर्वजन्मोत्तदात्रीतितत्पार्थः ५७ ऐंद्रीति ऋज्रेंद्रेत्यादिना इंद्रशब्दो निपातः
वज्रपाणिर्महादेवशचीशैलेंद्रकन्यकेति लिंगपुराणे ५८ सौम्येति सोमस्येयं
सौमा दितिय्यणरवद्वोदमत्यात्तडीषभावः ५९ याम्येति यमस्येयं याम्या दित्यादि
तीति सूत्रे यमाद्येति वामनोक्तेर्ण्यः भाष्यमतेतन्त्वज्न्मयइति दीक्षिताः याम्याः पुन
र्यीत नाइत्युदयनाचार्याः यमः स्ययेहरोदेवस्तत्प्रिया गिरिकन्यकेति लिंगपुराणे
वारुणीति प्रचेता वरुणः पाशीत्यमरः वरेहणेतितदेवावरदस्रवणार्थिना या
त्वैवरणेप्रोक्तस्तस्मात्त्सवरुणः स्मृत इति सांवपुराणात् वरुणो भगवान्रुद्रो गौ
रीसर्वार्थदायिनीतिलिंगपुराणे ६० वायवीति यद्यपिवायत्त्टपितृमूसइति

त्वमयेनभावेनतथापिसंबंधमात्रविवक्षायांशैषिकोऽणकार्य्यः वालेंदुशेखरोवा
ना॰स॰ ग्रुः शिवाशिवमनोरमेति लिंगपुराणे ६२ आग्नेयीति अग्नेरियंदिक् अयनेयीति
टी॰ त्यादिनाव्यपदेशः स्वाहावन्ह्यात्मनस्तस्यशोक्तापशुपतेःसती षण्मुखोभगवान्दे
१५ वोबुधैःपुत्रउदाहृतइति लिंगपुराणे जातवेदाःस्वयंरुद्रोस्वाहाशर्वार्द्धकायि
नीतिलिंगपुराणे ६३ नैर्ऋतीति उनैर्ऋतीः कर्बुरःक्रव्यादितिशब्दार्णवः ६४
15 दृष्टानीति दशाधेऽप्यर्थे ताच्छील्यवयोवचनेत्यादिनोवानश् तुयोगेङीप्
तदेवमष्टदिक्पालशक्तिरूपतेव्याख्याते ६५ चंडिकेति चंडशब्दस्यवह्वादित्वा
त्ङीष् संज्ञायांप्रसीतिनरसिंहपुराणात् ६७ सुमेरुतनयेति मेरुःसुमेरुर्हे
माद्रिरित्यमरः तदेकदेशोत्पन्नत्वात् उक्तंचरुद्रयामले मेरोःपश्चिमकूलेचचो
लनामाह्रदःस्मृतः तत्रयज्ञेस्वयंदेवमातानीलसरस्वती ६८ सर्वेषामुपका
रिणीतिकार्य्यमात्रहेतुतयासर्वसहकारित्वादित्यर्थः ७० वेद्येति वेदितव्या
यावेद्या अर्हार्थेकृत्यः स्वपकर्षवोधनात्कुलव्यापारविशेषेणनतिरितिनैयायिकाः। १५ ६५

ललजिह्वेति लललौल्ये चतुर्भुजां ललजिह्वामिति फेत्कारिणीतन्त्रे ललजिह्वांम
हाभीमामिति तन्त्रचूडामणौ ७१ सरोजादीनि विशदार्थं फुल्लेन्दीवरलोचनामि
तिवचनात् ७२ मुण्डस्रजविभूषणेति स्वकशाखाज्ञागुरिमतेदापिच्छेदस्यतस्येनमु
स्त्रं अथवाऽज्ञापोः संज्ञाच्छेदसोरितिह्रस्वः मुण्डमालाविभूषितामिति फेत्कारिण्या ७३
सर्वानन्दमयीति तत्प्रकृतवचनेमयट् ईश्वरानन्दस्य नित्यतयाऽश्वमेधादिजन्यता
वच्छेदकावान्तरजात्यवादेन्नानन्दविरहेणयद्यपिनानात्वमुपपन्नंतथापिब्रह्मानन्दा
न्तरापेक्षापकर्षराहित्यमेवपञ्चानन्दंतादात्म्येनविवक्षितत्वात्तत्सर्वैस्तुक्तं ७४ सर्वे
ति तत्रास्तित्रिषलोकेषुयत्तयात्तुविनाक्वचिदिति महाभारतात् अत्रसंज्ञात्वा
भावेनसर्वस्यैइतिरूपंज्ञेयं जगत्प्रपंचस्यईश्वरोपादानकत्वेनईश्वराभिन्नतयाव
दौतिमतेनेनदं नेहनानास्तिकिंचनमृत्योः समृत्युमाप्नोतियइहनानेवपश्यती
तिश्रुतेः यद्वा षर्वहिंसायामितिधातोः सर्वेतिहिनास्तिसर्वारुद्ररूपत्वादित्यर्थः ७५
सर्वानन्दस्वरूपिणीति पूर्वोक्तचतुष्टयस्य शिवः शिवइतिअमरव्याख्यातारः तदानन्दे

ल॰ टी॰ १६

स्वरूपयति स्वरूपभाजं करोति जनयतीति यावत् यद्वाऽभेदोपचारेण तद्रूपोक्तिः ७६
स्थितिरिति स्थितिर्गुरुत्ववतोपि ब्रह्माण्डस्य पतनाभावः तस्य तत्प्रतिरोधकयत्नाश्रय
इति यावत् धृतिर्धारणधैर्ययोरिति विश्वः धृतिः पिंडारके तथेति मात्स्ये ७७ मेधे
ति धारणसमर्थबुद्धिस्वरूपत्वात् मः शिये मा रमायां वेति विश्वः तस्मिंश्च कामे दक्षातीति
ति मेधया धात्वः कः प्रत्ययः कालिकारूपत्वात् महाकालोपरिस्थितामिति कुलचूडाम
णिदर्शनात् ७८ लक्ष्मीरिति तथा सिद्धपुरे लक्ष्मीरिति मात्स्यपुराणात् विश्वरुद्रान्तरे
इतेरयत्र श्रीरुद्रान्तरे तथा तत्रास्ति कानाम सर्वाणां कामधेनुरिव गर्हितमिति क
ल्पतरुलिखितवराहपुराणात् ७९ श्रद्धेति फलावश्यंभाविनिश्चयः श्रद्धा भक्ति
स्त्वश्रद्धा ते ज्ञानं तथाप्यजातिविशेषाविन्यपि केचित् एतेन कर्ममोक्षमार्गद्वयोपयोगि
त्वमुक्तं श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविरिति श्रुतेः श्रद्धावित्तो भूत्वा त्मन्ये
वात्मानं पश्येदिति श्रुतेश्च ८० पन्नगशायिनीति पद्भ्यां न गच्छतीति व्युत्पत्त्याशेषो
दरादिस्तेष्वप्यानन्तस्य लक्षणया योगार्थविनाग्राह्यः शेतेश्चास्थितिमात्रमर्थः जला ९

16

शाय इत्यादिवत् तथा च तंत्रचूडामणौ शुभ्रवर्णे महादेव शावहृद्विमलासना यद्वा पन्नगे
शाययति स्वापयति नारायणमिति णिजंतात् शीङो णिनि प्रत्ययः योगनिद्रास्वरूपत्वादिति भा
वः यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् सोपि निद्रावशं नीतः कस्त्वां स्तोतुमि
हेश्वर इति मार्कंडेयोक्तेः ८१ रुक्मिणीति रुक्मिणी द्वारवत्यां त्विति मत्स्यपुराणम् रु
क्मिण्यभिन्नलक्ष्म्यभिन्नत्वेन रुक्मिण्यभेदः राघवत्वे भवेत्सीता रुक्मिणी कृष्णजन्म
नीति विष्णुपुराणात् ८२ जानकीति जनकस्यापत्यं स्त्री तथा चित्रकूटे तथा सीतेति
मत्स्यपुराणात् पूर्ववद् व्याख्यानमेतत् ८३ दुर्गेति दुःखेन गम्यते ज्ञायत इति चंडिकायां
दुःखेन गंतुं शक्यते स्यामिति माधवी मार्कंडेयपुराणे तत्रैव च वधिष्यामि दुर्गमाख्यं म
हासुरं दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति काशीखंडेपि अद्यप्रभृति मे नाम दुर्गे
ति ख्यातिमेष्यति दुर्गदैत्यस्य समरे पातनाद् अतिदुर्गमात् दुर्गमेत्यपि दुर्गस्यैव नामांतरं
तस्मिन्निपातिते दुर्गे मार्गेण दुर्गमासुर इति ८४ सत्येति अबाध्यस्वरूपेत्यर्थः।। वेदांति
भिः सत्तायाः ब्रह्ममात्रधर्मत्वात् तत एव घटादिसत्ताव्यवहारात् अस्ति भाति प्रियं रूपं ना

ता॰स॰
टी॰
१८

मवेत्यपशापंचकं आयंत्रयंत्रब्रह्मरूपंजगद्रूपंततोह्वयमित्युक्तेः ८५ सत्यवनीति सत्या
नित्यज्ञानियादिके अल्पस्याइतिमतम् ८६ रतिरितिरतिस्मरस्त्रियांप्रोक्तेतिविश्वः
पीठशक्तिविशेषरूपत्वाद्वा रतिः प्रीतिस्तथैववेति सिद्धसारस्वतात् ८७ कामा
देति पर्वतविशेषस्यत्वात् कामाद्रिश्चित्रकूटश्चेति विश्वयमेदिनरात् अतएवाने
कशक्तिसहिताकामाद्रौपूजयाम्यहमिति कुमारीपूजायांमंत्रवर्णः कुलचूडा
मणौ तस्माद्भक्तगुणेप्रोक्तेकामाद्रायोनिमंडले तस्यफलंमहादेवयत्रंकिंकथ्य
तेप्रिये ८८ मोक्षदेतिः अपुनर्निवृत्तिर्मोक्ष इतिसर्वमतपरमार्थः तदुक्तंकिरणा
वल्यां नहिमुक्तस्यदुःखंपत्यापयतरतिकश्चिदप्युपैतीति कूर्मपुराणे तस्मा
द्विमुक्तिमन्विच्छन्पार्वतीपरमेश्वरी आश्रयेत्सर्वभूतानामात्मभूतांपरांशिवां
रुद्रयामले ब्राह्मणोमुक्तिमाप्नोतिमंत्रस्यास्यप्रसादतः ८९ अनंतेति कूर्मपु
राणात् अस्यास्त्वनादिसंसिद्धमैश्वर्यमतुलंमहत् तत्संबंधादनंतैषारुद्रेण
परमात्मनेति ९० नारसिंहीति नृसिंहशक्तिरूपत्वात् विदितयंतीसदायोतेया १८

17

हृतनक्षत्रतारकाः नलिनीहृदयाज्जातानारसिंहीसदाहरुणेति वामनपुराणोक्तेः ५१
सरस्वतीति सरस्वतीनदीभेदेश्रीवाग्देवतयोर्गिरीतिविश्वः ५२ महादेवरतेति मा
तिव्रत्येननदासक्तत्वात् ५३ चंडीति चंडीकात्यायनीहिंस्राकोपनस्त्रीषुसेमनेति
विश्वः ५४ चंडदोर्दंडखंडिनीति चंडस्यदैत्यविशेषस्यबाहुस्तंभौदंडौष्टघुत्पात् द
ढत्वात्खंतीखंडयतीतितत्वकीला ५५ दीर्घकेशेति सामुद्रिकलक्षणत्वात् ५६ सु
केश्यपिपिंगकेशेतिस्पष्टार्थं ५७।५८ महत्कचेतिछांदसत्वादात्वाभावः ५९ भवानीति
भवत्यस्मात्सर्वंइतिभवः तस्यस्त्रीभवानीपुंयोगादितिङीप् इंद्रवरुणेत्यादिनानुगा
गमः स्थानेश्वरेभवानीतिमत्स्यपुराणे १०० वाक्यप्रमाणपदसागरपारगस्यलक्ष्मीध
राभिधपुरुषस्यतनूद्भवेन विश्वेश्वरेणविहिते गिरिजाभिधार्थचिंतामणावविहयम
सूर्यसेमोद्वितीयः प्रतियत्परमाणुसर्वंविद्यानिवसंतीत्यपियच्छ्रुतेस्तदानः प्रकटी
भवतीहतेजपेपुरश्चरणेदीवरेरणेवागुरूणां अथद्वितीयशतव्याख्या भवपत्नीति
पत्युर्नोयज्ञसंयोगेइतिङीप्स्यनियागाशिष्टोनकारः पत्नीपाणिगृहीतीस्यादित्यमरः

त॰स॰
टी॰
१८

अथवा पातीति भुत्पत्त्या भवस्य जगतः पत्नी रक्षणकर्त्रीत्यर्थः तिरोधत्तामश्विनौ
दासपत्नी इति भरतस्य विमलबोधादिभिस्तथा व्याख्यानात् १ भवभीतिहरेति
भवः संसारस्तत्राप्रियशोककरजन्मसु इति विश्वः भयभीतिभिरिति वार्तिकात्समा
सः हरतेरच्प्रत्ययः मोक्षदायिनीत्यर्थः २ शचीति पुलोमजाशचीन्द्राणीत्यमरः
शचश्चगतौ देवलोके तथैन्द्राणीति मात्स्ये ३ पौरंदरीति वाचंयमपुरंदरौ चेति निपा
तात्साधुः तस्येदमित्यणन्तत्वात् ङीप् तत्पत्न्येत्यर्थः ४ विष्णोर्जायेति विष्लृ व्याप्तौ विषेः
किद्वेत्योणादिको नुप्रत्ययः विवेष्टि सर्वं व्याप्नोतीति विष्णुः मात्स्येपि आवेशत्वायैव विश्वात्मा
त्रैलोक्यं सचराचरं तस्माद्विष्णुरिति प्रोक्तः स्वयमेव स्वयंभुवा जायायास्तद्धि जायात्वं यद
स्यां जायते पुनरिति मनुः एषैव रक्तारजसि वैष्णवी परिकीर्तितेति वराहपुराणम् ५
माहेश्वरीति महेश्वरशाक्तो व्याख्यातः ततोऽण्प्रत्ययः एषैव कृष्णतमस्ति रौद्री देवी
प्रकीर्तितेति वराहस्मरणात् माहेश्वरी त्रिनेत्रा तु हषारूढा त्रिशूलिनी महाहिवल
यारौद्री जाता कुंडलिनी लक्षणात् इति वामनपुराणे ईक्षणान्नेत्रान्माहेश्वरी जातेत्यन्वयः १८

18

परेति सर्वोत्कृष्टेत्यर्थः पराशब्देनप्रपंचसारादौ त्रिपुराव्यवहारात्सावाग्राह्या तत्रा
द्येसर्वनामतात्परस्यैइतिरूपंचतुर्थ्यां कुतः परस्मिन्पुरुषेरजोवेतिभारविस्तु अन्ये
परायैइतिभेदः ७ सर्वबीजजननीति अतिस्पष्टोर्थः सर्वपदंनित्यपदार्थातिरिक्तप
रं ८ नित्येति प्रागभावप्रतियोगित्वेसतिध्वंसाप्रतियोगित्वं नित्यत्वमितितार्किकाः
अनेनअन्यानिष्ठकरणतानिरूपितकार्यतानाश्रयत्वेसति अन्यमात्रनिष्ठकार्यता
निरूपितकारणताश्रयत्वंउक्तं अन्यथासर्वबीजजननीत्यस्यानुपपत्तेः अथवाल
लितात्कामेश्वर्यादिषोडशनित्यास्वरूपेत्यर्थः ९ वार्वंगीति वाहूणिरम्याण्यंगानि
यस्याः स्वांगादितिसूत्रेऽसंयोगोपधादित्यस्यप्रतिप्रसवत्वेनअंगगात्रकंठेभ्यइति
ष्यतेइतिवृत्तिकारोक्तेः अनुक्तसमुच्चयार्थचकारेणैतदर्थसंग्रहइतिदम्यास
कारादिव्याख्यानाच्चङीष् १० दैत्यनाशिनीति दित्यदितीत्यादिनाऽपत्यार्थे
एयः नाशयतेस्ताच्छील्येणिनिः इत्थंयदायदाबाधादानवोत्थाभविष्यति
तदातदावतीर्याहंकरिष्याम्यरिसंक्षयमिति मार्कंडेयपुराणात् अथवादैत्याः

त॰स॰ टी॰ ३९ स्वर्गादयः मोक्षदत्वान्नत्राणिनीत्यर्थः ग्रसूर्यानामतेलोकाश्रंयेतनतमसादानाइति
ईशावास्यभाष्येग्राचार्यैस्तथाव्याख्यानात् ११ घोररूपेति घोरंभीमेहरेइतिविश्वः
ललजिह्वांमहाभीमामिति तंत्रचूडामणिवचनात् शिवस्वरूपेत्यर्थोवा उक्तशक्ति
ग्राहकत्वात् १२ महेशानीति पुंयोगलक्षणेङीष् महतीचासौईशानीवेतिवा
सेवेयः १३ कामिनीति कामयतइतिताच्छील्येणिनिः कामइच्छाऽस्यस्याइतिवा
नित्ययोगेइनिः ईश्वरेच्छायानित्यतत्स्वीकारात् १४ वरवर्णिनीति उत्तमावरवर्णिनी
तिस्त्रीप्रकरणेग्रमरः वरोवर्णोस्यास्तीतिस्वामी यद्वावराश्रेष्ठावर्णिनीयस्याः बं
दसत्तान्नसमासांतः ग्रभेदविवक्षयाकर्मधारयोवा छिन्नमस्तारूपेणवेदं डाकि
नीवर्णिनीयुक्तावामदक्षिणयोगतइतितत्रोक्तेः १५ महाविद्येति महतीनित्याविद्या
ज्ञातेयस्या नित्यज्ञानवतीतियावत् १६ महामायेति महतीग्रवच्छेदकभेदेनव
हुविधामायाग्रविद्याग्रनादिरनिर्वचनीयावेदांतप्रसिद्धायस्याः ग्राश्रयत्वविषयत्व
भागिनी निर्विभागचितिरेवकेवलमितिवेदांतिवचनाद्ब्रह्मणोऽविद्याश्रयत्वात् ३९

तद्रूपेत्यर्थः अविद्यायाएकोपिउपाधिभेदान्नानात्वस्वीकारात् इंद्रोमायाभिःपुरु
रूपईयतेइत्यादिश्रुतेः अथवाअमोदर्शानिधियियादितिसमंत्रसाधनायारत्नसेवं
थेनप्राप्नोति अमायाकप्रत्ययेरूपं महतीवासौसावेतिकर्मधारयः तस्याविशि
ष्यसृजनविधानात् यद्वानविद्यतेमायाविपरीतज्ञानसंशयज्ञानाभावरूपा
यत्रतथा महद्व्छेदेनकर्मधारयः भ्रमसंशयाभाववत्सतिसर्वज्ञानाश्रयःइत्य
र्थः तत्रवत्रिविधोमोहः संभवःसर्वपाप्मनां अज्ञानंसंशयज्ञानंमिथ्याज्ञान
मितित्रिकंइतिस्मृतेः अथवामहतीसर्वविषयकत्वनित्यत्वोभयधर्मयुक्तामा
ज्ञानेतोयानीत्यर्थः यद्वा महतीमालक्ष्मीःतोयानिसर्वस्येशनइतिश्रुतेः १८
महामेधेति धीर्द्धारणवतीमेधेत्यमरः अथवामहतीमेधायस्याइतिपंचम्यर्थेव
ड्व्रीहिः यत्सकाशाड्भक्तानांमहाबुद्धिलाभोभवतीत्यर्थः अव्याहतमतिः शा
स्त्रेइत्यादिप्राग्उक्तयामत्वादिवचनात् अथवामहान्मेधोहिंसायस्याः मेधतेर्हिं
सार्थात्ः कल्पद्रुमादावुक्ताः ततोभावेघञ्वालिप्रियत्वादित्यर्थः तथाचचंडिकाव

त.स.
टी.
२०

लिदानेन नीचयेत्साधकः स्वधीरिति कालिकापुराणे १८ महोत्सवेति उत्सः प्रस्रव
णे वारिप्रवाहो निर्झरो झर इत्यमरः महान्त उत्सवा निगर्छन्तीवा गतिगेयनयोरस्मात्
कः नदीतीरेनगोपान्तेऽतिक्रान्त्यासाधनस्यानोक्तेः १९ विरूपेति विकृतं रूपं यस्या
भीषणत्वात् विशिष्टं वा सर्वोत्कृष्टत्वात् विगतं रूपं यस्याः ब्रह्मरूपत्वादिति वा प
तद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमित्यादिश्रुतेः २० वि
श्वरूपेति तदुक्तं मात्स्ये सर्वदा सर्वभूतेषु द्रष्टव्या सर्वतो भुवि सर्वभूतेषु यत्किंचि
द्रहितं न मया विना २१ मृडानीति मृडयतेः सुखार्थात्पचाद्यच् ततो ङीष् इन्द्रवरुणभवशर्वरुद्रमृड
ेत्यादिना आनुक् आर्याम्बिका मृडानीति हलायुधः २२ मृडवल्लभेति दयितं
वल्लभं प्रियमित्यमरः वल्लेति सौत्रः प्रीत्यर्थ इति स्वामी यद्वा भावैकप्रत्ययान्मृडेस्सु
खजनकत्वसंबन्धेन तद्वती लभा भक्त्यादिरूपा प्राप्तिर्यस्याः दुर्लभप्राप्तौ षिद्भिदा
दिभ्य इत्यङ् २३ कामरूपेति कामेन स्वेच्छया रूपं यस्याः अष्टसिद्धियुक्तत्वात् शरीरसा
ध्येकर्माणि रूपग्रहादौ शरीरपरिग्रहाद्वा शरीरसाध्यकर्माणि शरीरस्यापि ग्रहणादिति

२०

२०

दयनाचार्यैरुक्तत्वात् उक्तं च भगवद्गीतायां यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं कामरूपाख्ये पीठे अस्य स्पर्शआदित्ता
दत्त्वा तथा च मुंडमालायां कृते जालंधरे पीठे त्रेतायां श्रीपर्वते उड्डियाने द्वापरे तु
कामरूपे कलौ युगे महाफलप्रदे लोके नास्ति एणात्सिद्धिदं महत् पंचाशत्पीठमध्ये
तु कामरूपं महाफलं जपपूजाबलिस्तत्र दिविलक्षगुणं भवेत् बहुधा कथ्यते दे
वि किं तस्य गुणवर्णने योनिरूपेण यत्रास्ति स्वयं कोटिगुणात्मिकेति समयाचारे
चतुः पीठानि सुभगे शक्तिदेहेषु यानि च तानि चत्वारि वक्ष्यामि गुह्याद्गुह्यतराणि
च शाक्तैः सर्वशरीरे स्यात्पीठं पूर्णगिरौ मतं तस्याः शिरसि सुभगे उड्डियाणं कीर्तितम
या स्तनौ जालंधरे ज्ञेयं कामपीठं भगे स्मृतमिति अथवा कामरूपस्य दर्शनमात्रतः
इत्यादि कुलचूडामणिदर्शनाच्च २४ महेशानीति महापूजायां महाध्वजकाईल
त्मीसमाहारेत[illegible]द्विद्वः महश्रावेन ...... महेशं आनयति जीवपति महेशानी
कर्मण्यपतात्[illegible]ईप्र भक्तानां समप..हेतुत्वात् २५ नित्योत्साहेति भक्तानामिष्टार्थ

त॰स॰
टी॰
२१

दानेषु नित्यउत्साहोऽस्याः सर्वदानदा समेत्यर्थः यद्वा ईश्वरप्रयत्नस्य नित्यत्वात् उत्साह
पदेन यत्नाभिधानात् प्रकृतिरूपताद्वा २६ मनस्विनीति भूमनिंदाप्रशंसास्वितिवा
र्तिकात् प्रशस्तं मनोऽस्याः शीघ्रप्रसादत्वादित्यर्थः अत एव मात्स्ये तां प्रति जगतिः
काप्रणनामिमतं ददौ झटिति सिद्धा गुते भवती यथेति वीरोक्तिः क्षिप्रप्रसादाज्जगतां
सदा नीलसरस्वतीति वचनाच्च २७ वैकुंठनाथपत्नीति वैकुंठशब्देन भागवतादौ
वैष्णवलोकार्थं प्रसिद्धः स्पष्टमन्यत् २८ पंकरवल्लभेति पदद्वयं व्याख्यातं २९ कोटि
चंद्रप्रतीकाशेति कोटिचंद्रा इति समासः विंशत्याद्याः सदैकत्वे इत्यमरः प्रतीकाशे
ति उपसर्गस्य घञीति दीर्घः सदृशार्थश्चायं प्रतीकाशोपमादय इति दंडाचार्योक्तेः
सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलामिति नीलतंत्रे ३० प्रातःसूर्यसमप्रभे
ति सूर्यशब्दो राजसूयेत्यादिना निपातनात्साधुः उभयत्र कोटिशतशब्दयोर्बहु
त्वमात्रे तात्पर्यं यद्वा शतेव बहवः सूरयः पंडितास्तेषामसाध्यमकत्राश्रस्यैतयवाप्
तू ताद्दशी मात्राने यस्या इत्येवमर्थे बहुव्रीहिः ततः प्रातःसूर्यसमाप्रकृष्टाभा जातं २१

21

यस्याः इतिषष्ठ्यन्तार्थैकषष्ठ्यर्थेवहुव्रीहिः वहुपंडिततिरस्कारहेतुज्ञानजनकभक्ति
विषयमूर्तेरित्यर्थः ज्ञानस्यभक्तिनिष्ठत्वानर्थलभ्यं २१ जह्नुकन्येति जह्नोर्ऋषेर्भेदकैस्य
न्या तथात्वेनस्वीकृतत्वात् स्कांदभविष्योत्तरयोः यथागौरीतथागंगातस्माद्देव्यास्त
दर्चने योविधिर्विहितः सम्यक्सोपिगंगाप्रपूजने तेनैवपुराणे विष्णुरुद्रान्तरंवेदः
श्रीगौर्योरंतरंतथा गंगागौर्यंतरंचैवयोवृतेमूढधीस्तुसः २२ मनोज्ञेति मनोज्ञं
मञ्जुलमित्यमरः अथवाआत्मरूपत्वात् मनएवज्ञंयस्याइत्यर्थः मनसैवानुद्रष्टव्य
मितिश्रुतेः २३ पार्वतीति पर्वास्यास्तिपर्वतः ततःपर्वमरुद्भ्यामितितकारः पर्वतस्या
वपर्वतःइतिमान्तस्य तस्यापत्यमित्यण् पार्वतीशिवसत्रियाविनिमात्स्य २४ हरव
ल्लभेतिस्पष्टं २५ काश्यपीति क्षोणीज्याकाश्यपीक्षितिरित्यमरः भारतेदानधर्मे
एवंवर्षसहस्राणिदिव्यानिविपुलव्रतः त्रिंशतःकश्यपेयोराजन्भूमिरासीदनंदि
तः अथागत्यमहाराजनमस्कृत्यचकश्यपं पृथिवीकाश्यपीजज्ञेसुतातस्यमहा
त्मनः भार्गवेणयतोनैककश्यपायप्रतिपादितत्वात् इतिसाम्यादयः अथारभ्

त.स.
टी.
२२
22

ताजगतस्त्वमेकामहीस्वरूपेणयतस्थितासि इतिमार्कंडेयोक्तेः अथवामूलाधा
रस्थितत्वादेतत् महीमूलाधारे इत्याचार्यभणनात् अथवा काश्यपिः सूर्यः त
स्येयमितिपुत्रपत्नलक्षणः संबंधः श्रीविद्यामंत्रेचैतत् तथाचज्ञानार्णवे लो
पामुद्राख्यविद्यायाद्वितीयायाः महेश्वरि कामराजेभृगुर्हित्वातार्तीयेसकगः शिवः
एषाविद्यावरारोहेत्रिपुरासूर्यपूजिता अथवा कश्यपः स्यान्मुनौमीनभेदे इतिविश्वः
सोस्यपत्नीवाललनेतितथा उक्तंचकालिकापुराणे मत्स्याः स्वगात्ररुधिरेवडिकाव
लयोमनाइति यद्वाकश्यपस्येयंजनकत्वसंबंधेनेत्यर्थः मरीचिर्भगवान्रुद्रः संभूति
र्वल्लभाविभोइतिलिंगपुराणोक्तेः २६ कमलेतिअर्शआद्यजंतंश्रीगौर्यौवर्ततंवतथ्येति
उक्तवचनात् अथवापद्मावतीरूपत्वात् पद्मासनस्थांकरपंकजाभ्यां रक्तोत्पलेसंदध
तीत्रिनेत्रांइतिध्यानात् अथवाकमलस्त्रगाबद्धकंठत्वात् नीलोत्पललसन्मालावरद्व
टाभयेकरीमितितंत्रचूडामणिवचनात् २७ कृत्स्नेति सर्वव्यापिनीत्यर्थः नत
यारहितंकिंचिद्ब्रह्माण्डेऽस्मिन्सचराचरे इतिमात्स्यदत्तोक्तेः अथवाकृत्स्न इतिप्रत्ययविः २२

शेषसंज्ञा कर्त्तरिकृदिति पाणिनिस्मृतत्वात् तेषां ज्ञाशेषं ज्ञाशेषां चेषुजर्थेभावेकप्रसे
त्यस्याः कृत्स्नाश्रशआदित्वादच् अथवाकाशकृत्स्नोस्त्वनि विशेषः इंद्रश्चंद्रः काशकृ
त्स्नापिशलीशाकटायनः पाणिन्यमरजैनेंद्राजयंत्यष्टादि शाब्दिकाइति वोपदेवः अ
स्मभीमेत्यादिवदेकदेशप्रयोगः तत्सदृशंकरोतीति कृत्स्नाव्याकरणज्ञानहेतुरित्य
भयार्थः यद्वा जीवब्रह्मणोरभेदज्ञानहेतुरित्यर्थः तथाचवेदान्तसूत्रं अवस्थितेरि
तिकाशकृत्स्नइति अनेनजीवेनात्मनानुप्रविश्येति जीवब्रह्मणोरत्यन्तमभेदात्
आत्मनस्तुकामायसर्वं प्रियंभवतीतिजीवलिंगमविरुद्धमितिकाशकृत्स्नावाये
वदतीत्यर्थः २८ कंजपत्रायतेक्षणेति कमितिजलार्थेनिपातः तज्जातत्वात्कंजंपद्मं
तस्यपत्रपदायतानिदीर्घाणिईक्षणानियस्याः वाचकलुप्तोपमेयमितिज्ञेयं यद्वा
कमलपत्रवदायतेसजातीयांतरसंवलितेईक्षणेयस्याः तथाचश्रुतिः तदैक्षत
वहुस्यांप्रजायेयेति तत्तेजोसृजततत्तेजऐक्षतवहुस्यांप्रजायेयेति तदपोसृजततआ
पऐक्षंतवहुस्यांप्रजायेमहीति ताअन्नमसृजंतेत्यादि अन्नपदमत्रपृथिवीपरम्

ईक्षणेमायाहन्तिविशेषः ईक्षणेनशाणेयथातवेयर्थ्यंतथावेदान्तग्रंथेषुस्पष्टं ३९
रोमकोब्रह्माग्रकारोविष्णुः हकारःशिवः मःशिवश्चेद्रमावेधा अकारोवासुदेवः
स्यात् हस्तथातथाशूलिनिकीर्तितइतिनानार्थयुनिमंजरी एतेषामीश्वरीतरवि
ष्टात्हतादितिभावः ४० वृषारूढेति शिवस्यार्धांगासक्तत्वात् माहेश्वरीवृषारूढा
त्रिशूलवरधारिणी महाहिवलयाप्राप्ताचंद्ररेखाविभूषणेतिमार्कंडेयात् अ
थवा वृषः शब्दब्रह्मतदारूढात्वेदैकगम्यत्वादित्यर्थः त्रियावदेवोवृषभोरोरवी
तीति प्रक्रम्य वृषभोवर्षणादितिभाष्यात् ४१ पूर्णचंद्रनिभाननेति पूर्णचंद्रे
णतुल्यंपूर्णचंद्रनिभं इत्यस्वपदविग्रहोनित्यसमासत्वात्ततोबहुव्रीहिः ४२ मान्ये
ति सर्वैःसमाननार्हत्वात् अर्हार्थेकृत्यः ४३ मानवतीति ईर्ष्याप्रणयादिकमा
नभेदवतीत्यर्थः सर्वस्त्रीस्वरूपत्वाद्वा अनवच्छिन्नपरिमाणवत्वाद्वा ४४ य
न्येति धनगाणांलब्धेतियावत् धन्यः कृतपुण्यइतिविश्वः ४५ हिमगिरेःकन्ये
ति हिमप्रधानत्वात्हिमगिरित्वंस्पष्टमन्यत् ४६ अपर्णेति तपस्यत्यागयापर्णा २३

23

नामयित्वागादिति पुराणवार्त्ता अत एव कुमारसंभवेऽपि भणितं स्वयंविशीर्णद्रुमप
र्णवृत्तिता परा हि काष्ठा तपसस्तया पुनः तदप्यपाकीर्णमतः प्रियंवदां वदन्त्यपर्णामिति तां २ वाप॰
पुराविदः अथवा तदङ्गिनी ग्राह्या तथा च मात्स्ये मेनात्तु सुषुवे तिस्रः कन्यां योग
वतीः शुभाः उमैकपर्णापर्णा च तीव्रव्रतपरायणाः हृद्रस्यैका हितस्यैका जैगीषव
स्य चापरा दत्ता हिमवता बाला सर्वलोकतपोधिका अथवापगतं नष्टं ऋणं त्रिवि
धं यस्याः सापर्णा जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते यज्ञेन देवेभ्यः स्वाध्याये
न ऋषिभ्यः स्वधया पितृभ्य इति श्रुतेः तादृशं करोतीति णिजन्तात् पचाद्यच् यद्वा अपग
तं ऋणं यस्या इति पंचम्या बहुव्रीहिः ऋणत्रयापाकरणहेतुः तदुपायसंपादनद्वारे
ति भावः अनेनैतत्सेवायाश्चावश्यकत्वं सूच्यते ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्ये
न संयोगादिति षाष्ठाधिकरणन्यायेन तस्य नित्यतावगमात् ४७ पद्मपत्रादीति स्प
ष्टार्थं यमेवाचकत्वेऽपि समासमागतेति विशेषो ग्राह्यः यद्वा शतपत्रेति प्रसिद्धं तु
रोधेन पद्मपत्रपदस्य शतपत्रतया शतानादीत्यर्थः ततः शातेन नेत्राणां निरीक्षिष्या॥

त.स.
टी.
२४

मियन्मुनीन् कीदृशैर्यिषोतिमनुजाः शातादीमितिमांतनइतिमार्कंडेयपुराणात् ४८
नागयज्ञोपवीतिनीति नागशब्देनकर्कोटकग्रहणं सामान्यस्यविशेषपर्यवसा
ननियमात् तथैव कर्कोटककृतोपवीतिकामित्युपनिषद्दर्शनात् प्रोद्धृतेदक्षिणे
पाणावुपवीत्युच्यतेद्विजइतिमनुः नागएवयज्ञोपवीतंइतिकर्मधारयादितिप्रत्य
यः यद्वानागेनयज्ञोपवीतिनीतिसमासः नागमिथ्येथयज्ञोपवीतेनदत्तीत्यर्थः ४९
महाशंखधरेति शंखोनिध्यंतरेकंबुललाटास्थिसंखौषुचेतिविश्वः नेत्रांतर
मपि शिरोनेत्रांतरस्थास्थिमहाशंखः प्रकीर्तितइति तद्धारणेनकपालहस्तत्वात्
एतन्मंत्रजपेतन्मालाविधानाद्वा महाशंखमयीमालाज्ञेयानीलसरस्वतीतंत्रे
त्रोक्तेः ५० कांतेति कांतंमनोरमेरुच्यमित्यमरः यद्वा कोब्रह्मात्मनिलार्केषु
शमनेसर्वनाम्निच पावकेचमयूरेचमत्स्येशीर्षजलेषुक इतिविश्वः ब्रह्मादिवत्
त्स्वरूपंयस्याः अंतशब्दोस्वरूपार्थोपीतिस्पष्टेभाष्ये ५१ कमनीयेति कमुकांतौ
आस्वादनीयवररम्येत्यर्थः सर्वेषामिच्छाविषयीभूतेतिवा ५२ वगान्मजेतिन २४

24

गशाब्देनआगानयादितिनत्रकृत्स्नाशेषेस्यष्टे ५३ ब्रह्मणीति तिनेदंस्यास्तनोद्भवाः ब्रह्म
णिमुखेनोभवेत् हंसयुक्तविमानस्थासादाम्रत्रकमंडलुभूतिवामनपुराणात् यद्वा
ब्रह्मवेदस्ताणातिवदतिब्रह्माणीकर्मण्यएए नैयायिकमतेवेदानामीश्वरकर्तृत्वात् न
स्वाधस्तात्सर्वज्ञत्रऋचः सामानियज्ञिरे इतिश्रुतेः एवंश्रीरे ऽस्यमहतोभूतस्यनिःश्व
सितमेतद्यदृग्वेदोयजुर्वेदः सामवेदोऽथर्वांगिरइत्यादिश्रुतेश्च उद्भवहणोत्पादिसूत्रे
लायवार्थं अनुकेववविधेयआनुग्ववनं आत्पत्तापित्तद्विधानार्थमितिहरदत्तादत्माद
यः ब्रह्माणंआनयतिजीवतीतिकर्मण्यणि पूर्वपदात्संज्ञायामितिणत्वेवेदरूपमिति
दीक्षिताः ५४ वैखवीतिपरमात्माययादेवएकएवत्रिधाभवत् प्रयोजनवशाद्देवीएव
मेषात्रिधाभवदितिवराहपुराणात् बाहुभ्यांगरुडारूढःशंखचक्रगदासिनी
शार्ङ्गबाणधराजातावैखवीशक्तिरद्भुतेतियामनपुराणात् ५५ प्रोभोर्जयेति
प्रोमुखंभवत्यस्मादितिशंभुरितिकेचित् माधवस्तुपादानेडुप्रत्ययविधानाद
देवितिस किंतुमुखरूपोजीवतीत्यर्थः यद्वाणिजर्थमंतर्भावस्सुखंभावयतीत्यर्थः

प्रशमयतीति शंशाद्मेरर्येनादन्येभ्योपि दृश्यन्त इति विच् रोगाणां शमयित्री भवतीत्य
गं॰स॰ र्थः भिषक्तमेति भिषजां श्रेष्ठेति अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् इत्यादि
टी॰ श्रवणादित्याह श्रीहेवाचार्यः ५६ गंगाजलेश्वरीति गंगेति गच्छतीति गंगा अगगच्छ
२५ तीवेति स्वामी तस्याः शायनस्थानत्वादित्यर्थः तथा च वीरतन्त्रे शून्यागारे श्मशाने या
दि जपति जडस्त्वेकलिंगे नगाग्रे गंगागर्भे गिरौ वा शुचिरमलमतिः सर्वदा भक्तियुक्तः
25 विद्यां श्रीनीलवाण्या भुवनजनपतिः सर्वशास्त्रार्थवेत्ता देहान्ते योगिमुख्यः परमसु
खपदं ब्रह्मनिर्वाणमेति ५७ भागीरथीति भगीरथेन राज्ञा कृत्यासेन स्वीकृता
तात्र अथवा भा बुद्धिर्भानमिति व्युत्पत्तेः गीर्वाणीशा हृत्पाने रथे देहे येषां ते भागीर
थ्याः फलितार्थकथनमेवैतत् तदुभययुक्तो रथो देहो येषामिति समासः तत्र रथस्य
पूर्वनिपाताय त्रिशंकानवकाशः अवच्छेदकसंबंधेन ज्ञानशब्दयोरपि शरीरहन्ति
तान् तेषामियं संबन्धसंबन्धे येति तिन्त्र अरार प्रत्यये रूपं एतेन एतदुपासकानां वादिवि
जयसामर्थ्यं द्योतितं ५८ मन इति बुद्धिकर्मेन्द्रियसहकारित्वादित्यर्थः तथा च सांख्याः २५

उभयात्मकमत्रमनः संकल्पकमिंद्रियंवसायधर्मोदिति मनोमहान्मतिर्ब्रह्मावुद्धिः
पूः ख्यातिरीश्वरः प्रज्ञाचितिःस्मृतिसंविदिर्विश्वेशश्चेतिसमस्मृतः मनुतेसर्वभूतानां
यस्माच्चेष्टाफलंततः सौक्ष्म्यात्तेनविभक्तंतुयेनतन्मनइतिलिंगपुराणात् मनोह
त्रिप्रयोजकत्वाद्वा मनसोयंमनोविदुरितिश्रुतेः ५९ बुद्धिरिति महत्तत्त्वरूपेत्यर्थः
अत्रसांख्याः सांतेःकरणंबुद्धिः सर्वविषयमवगाहतेयस्मात् तस्मात्त्रिविधंकरा
णंद्वारिद्वाराणिशेषाणियंतेप्रदीपकल्पाः परस्परविलक्षणाः गुणविशेषाः कृ
त्स्नंपुरुषस्यार्थंप्रकाश्यबुद्धौप्रयच्छंति तन्मतेकार्यस्यकारणमिलत्वाद्बुद्धितत्त्वं
जनकप्रकृतिरूपत्वाद्वा युध्यंतेपुरुषाश्चात्रसर्वान्भावान्हितास्तथा यस्माद्बोध
यतेचैवबुद्धिस्तेननिरुच्यतइति लिंगपुराणाद्वा ६० नित्यानंदमवीति यागाः
दिजन्यसुखस्यान्येषामपिसत्वात् नित्येति यन्मतेआनंदएवात्मातेषांस्वरूपे य
न्मतेतत्तयोर्भेदस्तेषांप्राबुर्यादौमयट् ६१ हरप्रियेतिस्पष्टं हकाररकारोभय
घटितमंत्रत्वाद्वा ६२ गिरिसुतेति अद्रिगोत्रगिरियावेत्यमरः अथवागिरिति॥

न०स०
टी०
२९

गीः शब्दस्य समस्यैकवचने रूपं तत्र सुता जननी ईश्वरी वा षुप्रसवैश्वर्ययोरित्यनुसारा
त् हलदन्तादिति विभक्तेरलुक् पृथक्पदे वा ... हरपत्नीति हरति हरा पत्नी रसिका
वैनिकर्मधारयः पूर्वोक्तरीत्या पत्नीशब्दस्य रत्नकार्यं कर्तव्यं ९७ तपस्विनीति तपः सह
स्राभ्यामिति विनिः ऋन्नेभ्य इति ङीप् व्रतोपवासनियमः शरीरोत्तापनं तपः इति दे
वलः इदं च शिवप्राप्त्यर्थमवधेयं यद्वा तपः सृष्टिकार्योद्यतो ब्रह्मणा विशेषः तदेतत्तव
ड्रस्यामिति श्रुतेः यस्य ज्ञानमयं तप इति श्रुतेश्च ९९ महाव्याधिहरेति तेचोक्ता ग्रन्था
न्तरे वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः अर्शांसि ग्रहणीत्यष्टौ महारोगाः सुदा
रुणाः इति ९९ देवीति दीव्यतीति पचादौ देवट् इति पाठात् ङीप् ईश्वरस्य रूपेत्यर्थः
न देवः पुंडरीकाक्षो न च देवस्त्रिलोचनः अन्नादिनियने किं विदेवतं देवड्यत्ते इत्युक्ते ः
सुभास्वरनिषूदनीति सुभास्वरेति विशेषणसमासः तं निषूदयतीति हंतीति तथा
नितरां इत्यनेन पुष्कवीरं हत्वा तस्य जन्मान्तरे पितत्त्वयते वैवस्वतेऽन्तरे प्राप्ते इत्यारभ्य
विंध्याचलनिवासिनीति मार्कंडेयपुराणात् ९८ महापुण्यप्रदेति स्याद्रमं मत्वि २९

26

यांपुण्यश्रेयसीसकृत्तंहृषश्चममरः पूजादिनापुण्यावहत्वादित्यर्थः तथाचभविष्यपु
राणे अग्निहीनादिकर्माणिदेवयज्ञाः सदक्षिणाः चंडिकाभ्यर्चनस्यैतेकोट्यंशेनापि
नोसमाः तथा दुर्गार्चेनरतोनित्यंमहापातकसंभवैः दोषैर्नलिप्यतेवीरपद्मपत्रमि
वांभसा ब्रिंसामित्यावभूतानिहत्वासर्वमिदंजगत् प्रणम्याशिरसादेवीसर्वपापैःप्र
मुच्यते ६९ भीमेति भीमादेवीहिमाद्रौस्थितिमात्स्ये मार्कंडेयपुराणेपि पुनश्चाहं यदा
भीमंरूपंकृत्वाहिमाचले रक्षांसिक्षययिष्यामिमुनीनांत्राणात् तदामांमुनयः सर्वे
स्तोष्यंत्यानम्रमूर्तयः भीमादेवीतिविख्यातंतन्मेनामभविष्यति ७० मधुकैटभ
नाशिनीति एतद्व्याख्याहरिवंशात् एकंमृदुतरंमेनेकठिनंवेदवापरं नामनीतत
योश्चक्रेसविभुःकमलोद्भवः मृदुस्त्वयंमधुर्नामकठिनः कैटभोऽभवत् अत्रतन्मो
हनादिद्वारानाशकत्वंवोध्यं प्राणवियोगस्यविघ्ननाकृतत्वात् अतएवमधुकै
टभनाशंचमहिषासुरघातनं इत्यादिमार्कंडेयेतत्प्रभावमध्येगणिते ७१ शंखिनीति
वैष्णवीरूपेइदंनेयं अथवा पंचकपालमुद्रान्वितत्वात् अथवास्त्रीभेदरूपत्वात् तथा

वज्राजाएवे जातिभेदस्तु तीर्णां वत्तद्रो वीरवंदिते हस्तिनी शंखिनी मध्याऽइति प्रका
त.र. म्यमध्यमा प्रोक्ता शंखिनी भवेत् शंखिनी तत्तथा भद्रे विशुद्धा पापवर्जिता सर्वदेवप्रियासा
टी. हि प्रोक्ता सौरभ्यशोभिता कामधर्मनमपि पद्मिनी तेन दत्तचित्रिणी ततः प्रोक्ता शंखिनी त
२७ दनु हस्तिनी विदुः उत्तमा प्रथमभाषिता तत्तो हीयते भवति हस्तरोत्तरं ७२ चक्रिणी
ति तथा च महिषमर्दिनीध्याने मात्स्ये त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं तथैव च
27 अथवा चक्री व्यालः सरीसृप इत्यमरः कुंडलिनीस्वरूपेति यावत् तथा च शारदा
तिलके तत्र विद्युल्लताकारा कुंडलिनी परदेवता परिस्फुरति सर्वात्मा सूक्ष्मा हि भुजगा
कृतिः ७३ धात्रीति धात्री जनन्यामलकीवसुमत्युपमातृषु इति विश्वः यद्वा धात्र्याः
पुष्पं धात्री पुष्पे जातीप्रभृतयः स्त्रीलिंगा इत्यमरः पत्रं वा धात्र्याः तत्त्रिपत्रात् आमल
क्यास्तु पत्रेण तुष्टा पुष्पेण पार्वतीति मुंडमालावचनात् ७४ हस्ते पुस्तकधारि
णीति सरस्वतीरूपत्वात् मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजैर्बिभ्राणां
विशदप्रभां त्रिनयनां वाग्देवतामाश्रये इति शारदातिलकात् पुस्तं च पुस्तके लेख २७

कर्मविज्ञानयोरपीति विश्वः अथवा वाला त्रिपुरा तद्रूपेण ज्ञेयं तथा च तत्प्रकरणे ज्ञा
नार्णवे वामेन पाणिनैकेन पुस्तकं चापरेण च अभयं च प्रयच्छन्ती साधकानां वरानने
संपत्प्रदभैरवीरूपेण वा पुस्तकं चाभयं वामे दक्षिणे चाक्षमालिकामिति तत्रैवोक्तेः ७५
चामुंडेति अत्र मार्कंडेयपुराणे यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडेति ततो
लोके ख्याता देवी भविष्यसि वराहपुराणे तु देवी तु त्रिशिखेनाजौ तं दैत्यं समताडयत्
तया च ताडितेनास्य दैत्यस्य शुभलोचने चर्ममुंडं च तत्रस्य पृष्ठे गेव वभूव ह: हरोस्तदा
नवेंद्र च चर्ममुंडे तत्क्षणाद्यतः अथ हत्य भैरे देवि चामुंडा तेन सा भवत् वामनपुराणे तु
समेत्य सा च `` देवि शूद्रा तौ शोषवरोत्तमौ ग्रथितौ दैत्यशीर्षाभ्यां नागराजेन वेष्टितौ तौ
च शीर्षौ समादाय चंडा या मुंडिविसृते ववंय प्राह चैनां वद श्लोकमस्तु दारुणे शोर
खरौ चंडमुंडाभ्यां यस्माद्धारयसे शुभे तस्माल्लोके नवख्याति श्चामुंडेति भविष्यति ७८
चपलेति चपल: पारदे मीने चोरके प्रस्तरेतरे चपला कमला विद्युत्पुंश्चलीपि
प्पलीषु चेति विश्व: अथ पुंश्चली वा गोधा कुलस्त्रीजायामकृत्यात् तथा च कुलचूडा

न.स.
टी.
२८

28

मणौ वेश्यानायितकन्यावरजकीयोमि नीतथा विशेषवैदग्ध्ययुताः सर्वाप्यवकुलाङ्गना
इति ७७ तेगेति सर्वोत्कृष्टत्वादितिभावः यद्वा वायकतयोर्द्धदेशसंयोगित्वात् अथ
श्चोर्द्धप्रसृतत्वस्येकैकमितिश्रुतेः ७८ मद्रेति मद्रामंदाकिनीरास्नेत्यादि विश्वः
मद्रा मद्रेश्वरेत थेतिमात्स्ये ७९ दैत्यनिकृन्तनीति दैत्यान्निकृन्ततिछिनत्तिनव्यी
लानथा नवकृतीछेदने इत्यस्मात्स्मिनो नु मागमानुपपत्तिः शेमुयादीनामिति श
प्रत्ययेपरेतछियानात् शास्यचमार्वधातुकप्रवविहितत्वात् णिनेखाईड्ड्रयानुक
त्वादितिवेत्सत्य छेदसत्वाडुपपत्तेः एतेनयथासौम्येकेतनत्वेनिकृन्तेनेने सर्वैःका
ह्याप्रसंविज्ञानंस्यादितिछेदोप्यपनिस्तत्रयोगोव्याख्यातः ८० शान्तिरिति शान्तिः
शमेपिकल्याणेइतिविश्वः कूर्मपुराणे चतस्रः शक्तयोदेव्याः स्वरूपत्वेनसंस्थिताः
अपिष्ठानवशान्तस्याः शृणुध्वंमुनिपुंगवाः शान्तिर्विद्याप्रतिष्ठावनिवृत्तिरितिताः
स्मृताः अथवा रोगहत्याग्रहादीनांविनाशः शान्तिरीरितेतितंत्रान्तरोक्तलक्षणाषट्
कर्मोनावाग्राह्या ८१ निद्रेति स्यान्निद्राशयनंस्वापइत्यमरः तथाचहरिवंशेकृस्नाः २८

क्तिः निद्रा च सर्वभूतानां मोहिनी वा दयाततथा ८२ महानिद्रेति संहारकत्वादित्यर्थः
महती वासौ अनिद्रा निद्रारहिता चेति बहुव्रीहिगर्भः कर्मधारयः नित्यज्ञानवत्वा
दित्यर्थः ८३ गुह्यनिद्रेति गुह्यं रहस्युपस्थे स्यादिति विश्वः मूलाधारशायिनीत्यर्थः
मूलपद्मे कुंडलिनी या वा लिद्रायिता प्रभो तावत्किंचिल सिद्ध्येत यंत्रमंत्रादिकार्चनमिति
गौतमीयोक्तेः ८४ रेणुकेति रेणुकापि हरेणौ स्याद्यमदग्निस्त्रियामपीति विश्वः
यद्वा रेणुः सिंदूरं अर्थात् युक्तं कं शिरो यस्याः तादृशा स्त्रीस्वरूपेत्यर्थः चामरे रवि
विंबे चेति नीलतंत्रात् रविविंबपदेन च सिंदूरान्वितललाटव्याख्यानात् एतत्स्यानेद
ष्टूजपं कुर्य्यादित्यर्थः ८५ कौमारीति कुमारसंबंधिनी शक्तिः कौमारी शक्तिहस्ता च
मयूरवरवाहना योद्धुमभ्याययौ दैत्यान् अंबिका गुहरूपिणीति मार्कंडेयात् स्कंदाख्ये
वह्नि कौमारी बर्हिपत्रास शक्तिनी समद्भूता वेदेवर्षे योद्धुं मावाभ्युपाययाविति वामन
पुराणाच्च कौमं मौमारीति वा मारीचंडयां जननद्यये इति विश्वः सैव काले महामा
रीति मार्कंडेये ८६ कुलजेति महावंशोत्पन्नत्वात् अथवा कुलाचारगम्यत्वा

त॰स॰
टी॰
२९

तज्जातत्वे ८७ कुंतीति कुंतीपांडुप्रियायां च शल्लक्यां गुग्गुलद्रुमे इति विश्वः यद्वा कुं तः
मात्मनः रक्षतीति पातीति कर्मजे ताच्छील्ये कुंतीति द्वये ततः सा चासौ ई लक्ष्मीश्चेति कर्म
धारयः तदायुधत्वादित्यर्थः मूलवक्रं दंडशक्तिवज्रचापाभिधारिणीमिति भविष्य
वचनात् ८८ कौलमार्गतत्परसेवितेति शूद्रेणैव रहस्येऽस्मिन्समयाचारसंयुतं येन हीमानः
सिद्ध्यंति जपकोटिसहस्रशः इति कुलचूडामणिवचनात् ८९ वनदुर्गेति तत्सेवधिकि
रातादिभिः पूजनात् तथा च हरिवंशे भगवद्वाक्यं वासस्तव महादेवि वनेषूपवनेषु च
शबरैर्बर्बरैश्चैव पुलिंदैश्च सुपूजिता मयूरपिच्छध्वजिनी लोकान्क्रमसि सर्वशः अथ
वेयत्परिता ग्राह्याकैरातीधनकुसुमोज्वलोमयूरातपत्रकेतनिकामिति प्रपंचसारात् ९०
सदाचारेति सत्प्रशस्तृधामदाक्षिणत्वेयाद्याचारो यस्याः कुलाचारस्यैतन्मते विहित
त्वात् तदुक्तं समयाचारे आचारो द्विविधो देवि वामदक्षिणभेदतः पंचमुद्रादिसहि
तो वामाचारः प्रकीर्तितः पंचमुद्रादिरहितो दक्षिणाचारसंज्ञिकः सदानित्यं चारो यस्याः
सर्वत्रगामिनीत्यर्थः ९२ द्रौपदीति द्रुपदो राजविशेषः अपत्यार्थेऽण् ९२ द्रुपदात्मजे २९

ति तथाचकाशीखंडे उमापतिर्यजगताञ्चीद्रुपदस्समहीभुजः यजतोवह्निकुंडाव
याडुग्धकेतिसुंदरीति पूर्वेणव्याख्यातं अथवाहुतांगहव्ताएणं पदंस्यावेपर्वतइति
यावत् तस्यकन्यातिभावः ५२ सृष्टिरिति तत्कारित्वेप्यभेदोपचारात् सैवसृष्टिर्भवत्य
जेतिमार्कंडेयपुराणे सर्गाद्यकालीनेति ५३ सर्गस्यलोकसृष्टेराद्यकालेप्रागभाव
कालेभवातत्रविद्यमानत्वात् अनेनास्याः प्रकृतित्वमुक्तं कार्यमात्रस्यतदानी
मभावात् एतेनसर्गाद्यकालेव्यवहारादि प्रवर्तकत्वेनतत्रप्रमाणमप्यन्यस्त
समानकालीनेत्यादिवत्त्वः यद्वाश्रुतेरर्थवादैः सहितासर्गाद्या केशवेकाली
नातन्मयत्वात् सर्गाद्याद्यासौकालीनाचेतिकर्मधारयः ५४ निशुंभप्राणनाशिनी
ति निशुंभप्राणनाशिनीति निशुंभः शुंभानुजोदैत्यविशेषः स्पष्टमन्यत् ५५ प
द्मिनीति पद्मिनीस्त्रीविशेषेपिसरस्यामेवुजेपिचेतिविश्वः दधतीनीलपद्मंचेति
तंत्रचूडामणिदर्शनात् ५६ वसुधेति वसुद्रव्यंददातिपृथ्वीरूपत्वात् अथवाव
सुंअग्निंदधातितन्मयभालनेत्रत्वात् यद्वा वैष्णवपुराणेआदेवउपदेशइत्यात्वं अनेमि

ने॰ र॰ निकमात्रं क्षितित्वप्रतिषेधयत्वमिति सिद्धांतात् ततोयजनार्थभाकत्वात्प्रत्ययः वस्त्रणोव
स्त्वषाडः स्वतमानां सुयावदाल्हादकत्वात् ८८ पृथ्वीति महापरिमाणत्वात्
टी॰ आकाशं शंकरो देवः पृथिवी शंकरप्रियेति लिंगपुराणोक्तेः ८९ रोहिणीति रो
३० हिणी कटुरोहिण्यां रोहिणी लोहितागयोः कंदरोगांतरे भेवसोमवल्के च रोहिणी हि ६
ति विश्वः पद्मावत्याः रक्तत्वात् इंपणा लोहितत्वेवोथ आविश्रुतीमामवरणानिवक्ता
मिति तत्रोक्तेः रोहिणी नक्षत्रविशेषो वा तत्स्यालदेशानत्वात् तथा च मत्स्यपुरा
णे देहत्यागसमये दक्षं प्रति सती वाक्यं मदेशो शागता षष्टिमेविष्यति गया
स्तवेति तदानप्रकमेव सप्तविंशति सोमाय नक्षत्राख्या ददौ प्रभुरिति उक्तं त
त्र षष्टिकन्यानाम ध्येयायाश्च आज्ञा तत्रेदमेव व्याख्यानमवसेयं विषिष्यतन्त्रा
मानि च तत्र दर्शयिष्यामः अथवा सोमात्मकस्य देवस्य महादेवस्य मूर्तिभिः दयि
ता रोहिणी प्रोक्ता बुधस्यैव शरीरजा इति लिंगपुराणोक्तेः अतएव तत्रोक्तं चंद्रा
र्द्धेशेखर मंडो रोहिणी हृद्वल्लभेति अथवा रोहिण्याः समनक्षत्रतात्मजादेशा ३०

प्राक्स्येन विधानादिदं ज्ञेयं बलदेवजननीरूपताह्वा ९॰ वाक्यप्रमाणपदसागरपारगस्य
लक्ष्मीधराभिधगुरुस्य सतनूद्भवेन विश्वेश्वरेण विहिते गिरिजाभिधार्थे चिंतामणौ विहस
मूषकतिस्तृतीयः ३ अथ तृतीयशतस्य व्याख्याने विंध्यवासिनीति अत्रार्थे हड्डकृतोयवासे
न ब्रह्मणोग्रे देव्या नीलतवस्याग्रे कृते सति मत्स्यपुराणे तदा सा वाभवड्डीमाघंटाहस्ता त्रि
लोचना नानाभरणभूषांगी पीतकौशेयवासिनी नामब्रवीत्ततो ब्रह्मा देवीं नीलांबुजत्विषं
निशुंभशुंभरजादेहसंपकीर्तं ममाज्ञया संप्रमाकृतकृत्यत्वमेकानेशगपुराह्मासि यपषसिंहः
प्रोक्तो देव्याः कोपाहूतानेने सतेस्तु वाहनं देविकेतो वास्तु महाबलः पांचालो नाम यक्षो
यं यत्तलक्ष्यपदानुगः दत्तस्ते किंकरो देवि महामयाशतानुलः इत्युक्ता कौशिकी देवी विं
ध्यशैलं जगाम हेति १ शिवेति शिवा गौरी तु पक्षस्या शिवा क्रोष्टेति प्रशास्त्रतः शिवास्तु
नः श्रेयस्करीत्वादिति स्वामी कुलचूडामणौ पशुरूपधरां देवीं योनार्च्चयति निर्जने शिवा
रावेण तस्याशु सर्वं नश्यति निश्चितं २ शक्तिरिति शक्रयोगिरिजा देवी शक्तिमतोप्यशेक
रइति कूर्मपुराणे पशुपतिनरभेदविशिष्टा शक्तिर्वा पशुशक्तिः पतिशक्तिः नरश

ना॰स॰
टी॰
३१

क्तिरिति क्रमात् इति चूडामणिवचनात् शिवागमेप्युक्तं शक्तिः शिवः शिवः शक्तिः
शक्तिर्ब्रह्मा जनार्दनः शक्तिरिन्द्रो रविः शक्तिः शक्तिश्चन्द्रो ग्रहा ध्रुवं शक्तिरूपं जगत्स
र्वं यो न पश्यति तारकी ३ महाशक्तिरिति कर्मधारयो बहुव्रीहिर्वा महत्त्वमप्रतिहत
त्वं यद्वा शक्तिरायुधविशेषः शिवारूपा वा ग्राह्या तथा च कुलचूडामणौ एकया भु
ज्यते यत्र शिवया देवि भैरव तत्रैव सर्वशक्तीनां प्रीतिः परमदुर्लभा उत्कृष्टा प्रीतिर्भव
तीत्यर्थः ४ शोकरीति शोकस्य घातिन्यै ५ शक्तिडम्भैलेति शक्तयस्मिन्सः प्रभा
वोत्साहमन्त्रजा इत्यमरः तामिडैलंभां भक्तिमात्रगम्यत्वात् तथा च कूर्मपुराणे भग
वच्छक्तिः यत्तमेनिष्कलं रूपं चिन्मात्रं केवलं शिवं सर्वोपाधिविनिर्मुक्तमनन्तममृ
तं परं ज्ञानेनैकेन तल्लभ्यं क्लेशेन परमं पदं ६ दैत्यप्राणहरेति व्यक्तार्थमेतत् यद्वा
दैत्यान्त्राति पालयति दैत्यत्राः प्रायातोऽकः प्रत्ययः त्रस्य त्राणशब्दः त्राणे रैणेत्यादौ
पठिताद्धार्थाट्टयज् क्षेमादीनां गर्वप्राज्ञापहारित्वात् ७ दात्रीति सर्वाभिलाषा
नामितियावत् अत एव कर्मविशेषाप्रयोगः ८ दयेति दयदानगतिरक्षणहिंसादा ३१

31

नेषु दयतेरक्षतीति सर्वोपद्रवः अनियवाघव् परेवावैष्णवगौवामित्रद्वेहरिवामदा श्राय
नेरादिनचैतदयैषायरिकीर्त्तितेतिदाहस्यनिवचनात् ९ दामोदरप्रियेति उल्
खलेवंधनाद्दामोदरसंज्ञोजिहरिवंशादौ १० कान्तिरिति कान्तिश्शोभाभिलाषयोः
रितिविश्वः पीठशक्तिरूपत्वाद्वा क्षेमंकरीति कुशलेक्षेममस्त्रियामित्यमरः
क्षेमप्रियेत्यादिनाखविद्गमागमः पालिविशेषरूपेतियावत् तथाचतन्त्रकुर्याः
दिसन्तहन्नौकुलचूडामणौ क्षेमंकरीतथावीरम् जेतुकौशिवरूतिकामित्यादि १२
बुद्धिरिति भक्तानांतद्विशेषावहत्वात् वेदान्तिनांमतेज्ञानस्वरूपत्वाद्वा १२ बौद्धावा
रपरायणेति बुद्धएवबौद्धः स्वार्थेप्रज्ञाप्यण् बुद्धःकल्कीतितेक्रमादितिभगवदव
तारगणनेमत्स्यपुराणे तस्यावतारक्रमरूपेपरायणे तत्प्रियत्वात् तदुक्तं मः
हाचीनक्रमेणैवतत्तारानीलसरस्वतीति १३ श्रीविद्येति प्राधान्यार्थेश्रीशब्दप्रयोगः
षोडशाक्षरीवेयमितिज्ञानार्णवे वक्त्रकोटिसहस्रैस्तुजिह्वाकोटिशतैरपि वर्णि
तुंनैवशक्येयंश्रीविद्याषोडशाक्षरीति उक्तेः १४ भैरवीति वाला भैरवी सुंदरीति त्रय

त्र॰स॰
टी॰
३२
32

स्त्रिपुराभेदाः त्रिपुरात्रिविद्यादेवीति ज्ञानार्णवात् तत्रैव यथा श्रीत्रिपुरावालात
था त्रिपुरभैरवीति योगिनीविशेषो वा भैरवी वाष्टसंप्रोक्ता योगिन्यस्ताः प्रपूजयेदि
त्याथर्वणात् यद्वा भीरूणां स्त्रीणां मियमभेदसंवर्ये येनेति भैरवी विशेषास्त्वंगनाभी
रु रित्यमरः १८ भवेति भवगेयेत्यादिना निपातः भवतीति श्रुत्यन्तात्सर्वदा विद्यमा
नत्वलाभः यद्वा भक्तानां कल्याणहेतुत्वाद्वा १७ भारतीति भारतमस्त्यस्यास्तत्
प्रयोजकत्वात् कां विद्यां प्राप्य कवयो भारतादीन् प्रचक्रिरे इति फेत्कारीयात् कवचप्र
संगे व्यासाद्याऋषयो येन भारतादीन् प्रचक्रिरे गंधर्वतंत्राच्च १९ भयनाशिनीति तथा
च ब्रह्मसंहितायां पर्वते उज्जटे वापि निर्जने वा वनेः पथे जलावर्तभये मोदंष्ट्रिभये चौरादि
भयप्रागते नगरे हट्टके वापि महाराजकुलेषु च नदीतीरे व्यालभये हास्तिकादिभये
षु च जपेदक्तविधानेन तान् भयमाशु विनाशयेत् हरिवंशे संग्रामेषु च घोरेषु अग्निप्रज्व
लितेषु च नदीतीरेषु चौरेषु कांतारेषु भयेषु च प्रवासे राजवंधे च शत्रूणां च प्रमर्दने
प्राणात्ययेषु सर्वेषु त्वं हि रक्षा न संशयः २० तापसीति अपर्वेति मत्स्यपुराणे श्रमेत ३२

त्वादेवसिद्धेन तपः सहस्राभ्यामिति विनिवियानस्य प्रणादिभिः सहसमावेशज्ञायकत्वात् ता
मग्निवर्णां तपसाज्वलन्तीमिति मंत्रलिंगात् २१ तारिणीति तारयति संसारादित्यर्थः २२नी
ल्वेति श्रुतिभीषणत्वात् विद्रावयति मुक्तास्येति मन्त्रस्य स्तुकाङ्गावनादिशेषेवाइदंतेये २२
नीलं तं दैत्यविनाशिनीति नीलनाम्नामसत्वात् वक्रमन्यत् २३ दात्रीति दोऽवखण्डने
त्लेनात्ङीप् जाड्यं न्यस्यकपालके त्रिजगतां हेतुप्रतारास्ययमिति फेत्कारिणीतं
त्रात् २४ दानपरेति सर्वेत्लेनात्ङीप् दानदासक्तत्वात् यहात्वकर्मानुरूपफ
लदानात् श्राद्धयान्तु हृयैरिति भाष्यात्मकैः २५ कालीति कालीतिकृष्णवर्णत्वात् का
लीकालिंजरे गिराविति मात्स्ये लिंगपुराणे ततः प्राणमयो रुद्रः प्रादुरासीत्प्रभोर्मुखा
त् अर्द्धनारीश्वरो भूत्वा बालार्कसदृशद्युतिः तदेकादशधात्मानं प्रविभज्य पृथक्स्थितः
अर्द्धेन तस्य न सर्वात्मा संसृज्यासौ शिवां प्रभुः सा वा सृजन्नदा लक्ष्मीं दुर्गां श्रेष्ठां सरस्व
ती वामां रौद्रीं महामायां वैष्णवीं वारिजेक्षणां कलां विकरणीं चैव कालीं कमलवा
सिनीं बलिविकरणीं चैव बलप्रमथनीं तथा सर्वभूतदमनीं संसृजे च मनोन्म

त. स.
टी.
३३

33

नी तथान्याश्च बहवः दृष्टालयानार्यः सहस्रशः २६ दुर्गेति देवीविशेषो येग्रा…सः २७
दैत्यविनाशिनीतितमोगुणपरिणामतयादैत्यमोहादयः तेषां विशिष्टस्य सवासनस्य
प्रतियोगिकस्य नाशस्य जनकत्वात् तथा च श्रुतिः भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः
क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे २८ पद्मेति श्रीहृत्पद्मात्पद्महस्तत्वाच २९ पद्मा
वतीति मातृपर्यायाइतिवत् शरादित्वाद्दीर्घः तथा च तारा भेदप्रकरणे वीरचूडामणे
पद्मावती महादेवी महानीलसरस्वतीत्यादि प्रक्रम्य त्रयोदश महाविद्यास्तारायाः परि
कीर्तिताः ३० कृष्णेति नीलवर्णत्वात् कृषिर्भूवाचकः णश्च निर्वृतिवाचकः तयोरै
क्यं परंब्रह्म कृष्ण इत्यभिधीयते इति श्रुत्या कृष्णोस्त्यस्यास्तादात्म्यसंबंधेनेति वार्थः यद्वा
कृष्णो वेदव्यासोस्त्यस्या उपासकत्वात् वेदव्यासोपि यच्छ्रुतात्सर्वज्ञः पठनाद्यत इति भैरव
तंत्रात् हिताय जगतां देवी दक्षेणाराधिता पुरा कार्यार्थं दक्षिणे तस्याः कृष्णो वामेन
यासिते आत्मानं विभजस्वेति प्रोक्ता देवेन शंभुना सा तथोक्ता द्विधा भूता शुक्ला कृ
ष्णा च वै द्विजा इति लिंगपुराणाद्वा ३१ पुष्टेति पुष पुष्टौ निष्ठांतः सर्वदायकरूपत्वेनास्या ३३

र्यं ३२ तुष्टेति तुष्टप्रीतौ पूर्ववत् आप्तउर्वशीतिकामइतिश्रुतेः ३३ ऊरुस्थलतेनारायण
णोरूद्भवतात् ऊरूद्भवानरसखस्यमुनेः सुरस्त्रीइतिदर्शनात्पीठोदरादित्वात्साधुः ऊरू
प्रभृतेवष्टिकामायतेइत्यादयोनिरुक्तादिश्रुत्यन्यथाविस्तरभयाल्ललिख्यंते ३४ वज्रिणीति
ऋज्रेंद्रेत्यादिनावज्रशब्दोनिपातः ३५ वज्रहस्तेति वज्रंहस्तेयस्याः प्रहरणार्थेभ्यः परेनिष्ठा
सप्तम्याविति परनिपातः सप्तम्याः वज्रमिंद्रः समस्तप्रक्कालिप्रणदमराधिपइतिमार्कंडे
यपुराणेतदुक्तत्वोक्तेः वज्रवायाभिधारिणीतिनवरात्रिप्रकरणे पूज्यमूर्तिलक्षणेभवि
ष्यपुराणे ३६ नारायणीति आपोनाराइतिप्रोक्ताआपोवैनरसूनवः अयनंतस्यताः पूर्वंते
नरोनारायणःस्मृतइति पुराणश्रुत्यादिः नरशब्देनतत्वान्युच्यंतइतिपंचरात्रादिव्याख्यातत्वा
वित्येया ३७ शिवेति व्याख्यातप्राये शिवंसुखंश्रेयस्यस्याइतिवा शिवयतिभक्तान्सुखयति
इतिवा मुक्तिदानेनाशिवरूपा करोतिवा ईशानस्यजगत्कर्तुर्देवस्यपरमात्मनः शिवादे
वीतुपैरुक्ताअनश्वाश्वस्यपुराजव इतिलिंगपुराणात् ३८ खड्गिनीति खड्गेनानिस्त्रिंशखड्गा
सासिरिष्टयइत्यमरः खड्गोस्त्यस्याःपूजाधारसेवयेनेत्यर्थः तथाचदेवीपुराणे हेमराजत

न·स· मृद्धात्तषोलविद्याऽर्पिताऽपिवा खड्गेमूलेविनादेपीसर्वकामफलप्रदा पययस्यायुधेप्रोक्ते
तस्मिंस्तंप्रतिपूजयेत् यद्वा गंडकेखड्गखड्गिनौइत्यमरः सोस्त्यस्याः बलितेनेत्यर्थः कृस
टी· सारस्यमांसेनतथाखड्गेनचंडिका वर्षाण्येवशतान्येवतृप्तिमाप्नोतिनिश्चितमितिकालिका
३४ पुराणोक्तेः ३९ खड्गहस्तेति स्पष्टमेतत् तथाचतंत्रचूडामणौ खड्गेनदक्षिणस्योर्द्ध्वेशोभि
तांवीरनादिनीमिति ४० कर्त्रीकर्परधारिणीकर्त्रीआयुधविशेषः स्यात्कर्परःकपालोऽ
34 स्त्रीत्यमरः कर्परोल्लइतिखवाङ्गलकालेतिस्वाम्यादयः उक्तंचफेत्कारिण्यां खड्गंदीचरः
कर्त्रिकर्परसंज्ञेति ४१ देवांगनेति अंगनाकल्याणि इतिगणसूत्रात्प्राशस्त्यार्थे वामादित्वा
न्नप्रत्ययः यद्वादेवाअंगनेगृहचत्वरेयस्याः सेवार्थंतत्रोपस्थितत्वात् यद्वा देवयुक्तेअंग
नेयस्याइत्येवसमासः अर्थस्तुप्राग्वत् अथवादेवेइंद्रियेतद्विषयकेअंगनेज्ञानेसाक्षात्का
रस्वरूपेयस्याः इंद्रियपदस्यअतींद्रियोपलक्षणतयाऽतींद्रियज्ञानवतीत्यर्थः देवःसुरेघनेरा
ज्ञिदेवमाख्यानमिंद्रियेइतिकोषः अंगिगतौअस्यल्युटि अंगनमितिरूपं यद्वादेवानांअंग
नेज्ञानेयस्याः पूर्वपदेसमवायित्वेविषयत्वंषष्ठ्यर्थः तेषामपिब्रह्मज्ञानाधिकारात् तथा · ३४

च वेदान्तसूत्रे भावं तु बादरायणोऽस्ति हि ग्रस्यार्थस्तु ---- ब्रह्मविद्यायां देवानामनधिका
रेऽपि शुद्धब्रह्मविद्यायां अधिकारस्य भावं सन्तो बादरायण आचार्यो मन्यते यतो दर्शनम
स्ति तयोर्देवानां प्रत्युत्पन्नतस्य एवं तदभवदिति तथा इन्द्रो वै देवानामभिप्रवव्राज विरोचनोऽसुरा
णामित्यादि ४२ देवमान्येति स्पष्टार्थः ४३ देवकन्येति कुलचूडामणौ कदाचित्यतिरूपोऽसि
कदाचिद्गुरुरेव च कदाचित्पुत्रतापन्नः कदाचिच्छिष्य एव हि इत्यादिभिरेवं प्रत्युक्तिः ४४ पुरु
लोमजेति शचीरूपत्वात् पुलोमा दैत्य इति रामायणादौ मुनिरिति स्याम्यादयः ४५ सुखि
नीति नित्ययोगे मत्वर्थीयः ब्रह्मरूपत्वात् ४६ सुखदात्रीति सिद्धविद्यातेन साधनक्ले
शाभावात् स्वर्गापवर्गादिदानाद्वेत्यर्थः तथा च मुण्डमालायां दशविद्याकथनानन्तरं सु
खदा मोक्षदा नित्या क्लेशशासाप्यानतादृशी येन तेन प्रकारेण सिद्धिं यास्यति भूतले तथा
नात्र सिद्धाद्यपेक्षास्ति न नक्षत्रादिविचारणा कालादिशोधनं नास्ति न चामित्रादिदूषणं इ
त्यादि ४७ सर्वसौख्यविवर्द्धिनीति सुखपदात्स्वार्थे ष्यञ् विशेषेण वर्द्धयतीति तथा सर्वसौ
ख्यातिकर्मया ऽऽशयः षष्ठीतत्पुरुषो वा ४८ प्रीतेति प्रीतिमत्त्वमस्त्यस्याः इत्यर्शआदिः प्रवौत

त॰ र॰ टी॰ ३५

35

वर्त्तते शीलेऽइत्यमरः ४९ शीलवतीति पूर्ववदर्थः ५० सूक्ष्मेति सूक्ष्मं स्यात्कथनेवाथ्मेप्यणौ सू
क्ष्मोल्पकेऽप्यवदिति विश्वः [illegible]ज्ञा मोदतत्त्रीदुलणश्चापि तद्रूपं परं न्नाभिजानंति मायामयेनेत्त्व
त्त्वेत्येव तो त्वाममी स्थूलरूपामिति प्रपंचसारात् ५१ सूक्ष्माकारेति विशांतेतु स्वरूपि
णीमिति नीलतंत्रात् ५२ वरप्रदेति तपोभिरिष्यते यस्तु देवेभ्यः सवरो मत इत्युक्तल
त्वाणे वरं प्रकर्षेण दत्त इति तथा प्रकर्षस्ते देवान्तरापेक्ष्य दानकर्तृत्वरूपः ५३ वरेण्येति
व्रियते सर्वोत्कृष्टत्वादिति वरेण्या वृञ् इति औणादिक एण्यः ५४ वरप्रदेति भक्ता
र्थि ५५ वाणीति वणति शब्दायते तथा वचनाधिष्ठात्रीदेवतायानामेदं वाणस्यासुरवि
शेषस्येयमिति वा तस्य रुद्रेण पुत्रीकृतत्वात् वाणश्चेदं भेदपुष्पं वा तिलकं मालतीवाणा
स्तुलसीभृंगराजकं तमालं शिवदुर्गार्थे निविद्धं विहितं भवेत् इति भविष्यपुराणोक्तेः ५६
प्राननीति प्रशस्तं ज्ञानमस्याः प्राशस्त्यं च सन्मात्रविषयकत्वं ५७ ज्ञानदेति मोक्ष
देतुं ज्ञानं ददाति भक्तानां तथा तदुक्तमाथर्वणब्राह्मणे एतस्याः ज्ञानमात्रेण जीवन्मु
क्तो वै भवत्येव नामेत्य सर्वज्ञानवान् भवतीत्यादि ५८ ब्रमलेति प्रपंचान्तर्गतत्वाद ३५

विद्यादोषरहितेत्यर्थः अविद्यासंसृतिर्वै योमनोमोहोमलेनमः इतिसंकल्पजालस्यनामान्ये
तानिराघव इतिवशिष्ठोक्तेः ८७ उग्रकालीति आत्मह इति आत्तं महाकालीचरुद्राणीयोगिनी
प्रक्रमेश्रुते मावाग्रास्या ८८ भद्रकालीति श्रेयस्करत्वाद्भद्रावासौकालीतथा भद्रकालीचगं
योल्पास्त्रमायायामौषधीभिदीतिविश्वः इतिवीणीरमाज्येष्ठाभद्रकालीयथाक्रमात् षट्कर्मदे
वताःप्रोक्ताःकर्मादौताःप्रपूजयेत् इतिवारिककर्मदेवतावावोध्या तारावोग्रामहोग्राचरु
द्रानीलसरस्वती कामेश्वरीभद्रकालीत्यष्टौचतारिणीस्मृतेति मायातंत्राद्वा ८९ दक्षिणे
ति वैदग्ध्यादित्यर्थः यद्वाव्यापकतयादक्षिणभागसंयुक्तत्वं ब्रह्मवेदममृतंपुरस्तात्पश्चाद्ब्र
ह्मदक्षिणतश्चोत्तरेणेतिश्रुतेः दाक्षिणकालीत्यर्थोवा तथाकुलचूडामणौ सर्वसि
द्धिप्रदादेवीहेलयापिनवींतिता अतएवदक्षिणानाम्नीत्रिषुलोकेषुविश्रुता यज्ञांगदक्षिणा
वा यज्ञोगंधर्वस्तस्यदक्षिणाप्सरसइतिश्रुतेः तथायहरिवंशे ऋत्विजोवैवदक्षिणेति लिं
गपुराणे सप्ततंत्रमहादे [illegible] रुद्राणीदक्षिणास्मृता ९० भृगुवंशसमुद्भूतेति भृगुशुक्रेप्र
तापेचयमदग्नौपिनाकिनीति विश्वः भृगोःरुद्रस्यवंशः समुद्भूतोयतइतिवाबहुव्रीहिः स्कं

दादिजननादित्यर्थः सइममेवात्मानंद्वेधायातयनतः पतिश्च पत्नीचाभवतामिति
न॰र॰ श्रुतेर्वा ९४ भार्गवीति भृगोरपत्यंस्त्रीरूपत्वादित्यर्थः साहिपूर्वं भृगुकन्यावासीत् त
टी॰ तोदुर्वाससः शापान्नष्टापुनः समुद्रादुद्भूवेति स्थितंविष्णुपुराणे तदुक्तं भृगोःख्यात्यां
३६ समुद्भूताश्रीः पूर्वमुदधेःपुनः देवदानवयत्नेनप्रसूतामृतमंथने यद्वा भार्गवीदूर्वा
तयाहोमविधानात् तथाचसिद्धसारस्वते दूर्वातिलाज्यहोमेनदीर्घमायुरवाप्नुयात्
36 सहस्रवीर्याभार्गव्यादिति दूर्वापर्यायेष्वमरः भार्गवीहैमवत्यास्यात्कमलादितदूर्व
योरिति विश्वः ९५ भृगुवल्लभेति अत्रायमितिहासोमात्स्यपुराणीयः वधार्थमिन्द्रस्य स
मुद्यतायादेव्याःशिरश्छेदिस्वदर्शनेन योषिद्वधाद्विष्णुमवोचद्विगर्ह्य भृगुः पुनः प्रत्युद
जीवयत्तां भृगुर्भगवानिति हादेवः ख्यातिस्त्रिनेयनप्रियेति लिंगपुराणाद्वा ९६ शूलिनी
ति शूलंप्रहरणेमत्स्यावोतविश्वः शूलिनीसंकुदुर्गायाश्चत्रग्रहोवाप्यः ९७ शूलेह
स्तेति त्रिशूलखड्गकर्त्रिकेति ध्यानभेदश्रवणात् त्रिशूलंदक्षिणेदद्यादिति मात्स्यं ९८
मयूरवरवाहनेति मयूरोवर्हिणोवर्हीत्यपरः न निर्धारणेनिषेधात्सप्तमीसमासः ३६

सर्वस्वाहाहृते पानें इत्यमरः कौमारीरूपेणेदं बोध्यं ६९ महामांसरतेति मांसं तु त्रिविधं दे
विजलं खेचरं भूचरं गोनरेभाश्वमहिषवराहाजमृगोद्भवं महामांसाष्टकं प्रोक्तं देवताप्री
तिकारकं इति यामलोक्तेः ७० रक्तेति लोहितवर्णत्वात् यद्वा त्र्यंबकाख्यरुधिरसंपर्कात्
तथा च वामनपुराणे ततः स्वेदोऽभवद्भूरि श्रमजः शंकरस्य तु ललाटफलके तस्माज्जाता र
कन्यारूपास्तुतेति प्रक्रम्य तां पूजयिष्यति गणाः महर्षयः पितरो गणाः यक्षा विद्याधरा
श्चैव मानवाश्च शुभंकरि स्तोष्यंति च नमस्ते देहोद्भवे लिप्तद्व्यात्मकरोत्करैः चर्चिकेति शुभं नाम
यस्माद्रुधिरचर्चिता इत्येयमुक्त्वा वरदे नच विकाम्भेनानुयाता हरस्य पृष्ठवासिनी महीस
मेतां द्विचचार सुंदरी स्थाने गतां हिंगुलिमद्रिमन्वमे ७१ रक्तकर्परधारिणीति वागीश्वरी
ध्याने तु कपालं वामहस्ते तु मांसशोणितपूरितमिति पद्मपुराणाद्वा यद्वा किं
लमस्ता रूपेणेदं ज्ञेयं स्वमस्तकं सकर्परं रक्तधाराभिपूरितं इति तदीयध्यानोक्तेः
अन्यथा तदक्षरतात्कपालकं जगतां जाड्यसंयुक्तं दधती दक्षिणकरे इति तंत्रचूडामणि
विरोधापत्तेः ७२ रक्तांबरधरेति जलतारायामिदं बोध्यं स्मेराऽरक्तविभूषणामिति

ता॰ र॰
स्त॰
३७

वीरचूडामणिदर्शनात् अथवा त्रिपुरायां मुंडखड्गडिंनांगीमरुणांतरडक्कुलान्तलेपां
नमामीति प्रयोगसारात् अथवा नवैव संपत्प्रद भैरव्यां रक्तांबरपरीधानामिति ज्ञानार्ण
वात् ७३ रामेति रमन्ते स्यां सा रामा ज्वलादित्वात् णः स्कंदरीरमणी रामेत्यमरः ७४ रम
णीति रमन्ते स्यां योगिनो स्यां ब्रह्मरूपत्वादित्यर्थः अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इति
श्रुतेः ७५ सुरनायकेति नायकोनेतरि श्रेष्ठे हारमध्यमणावपीति विश्वः ७६ परमानंदे
जेति परमानंदे मोदस्वरूपे भवाबुंकागम्यत्वात् परमा महालक्ष्मीस्वरूपा वासौनंदजेति
कर्मधारयो वा ७७ ज्येष्ठेति अतिशायेन प्रशस्या ज्येष्ठा प्रशस्यस्य इष्ठनि ज्यादेशः
ज्येष्ठाख्योउद्घाटनदेवता वा उक्तवचनात् अन्यमात्रपूर्ववर्तिनीत्यर्थः तथा च श्रुतिः
ब्रह्म ज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान ब्रह्म भूतानां प्रथमम नुय
ज्ञेनेनार्हति ब्रह्मणा स्पर्द्धितुं क इति ७८ योगिनीगणसेवितेति देवीपुराणे का
मी चंडी दावेताः प्रसिद्धा अथवा महाकाली चरुद्राणीउग्राभीमा ततः परं घोरा च
भ्रामरी चैव महारात्रिश्च सप्तमी भैरवी चाष्टमी प्रोक्ता योगिन्यस्ताः प्रपूजयेदित्याथर्व ३७

37

गणेत्याख्याः ७९ अंबेति लोकानां मातृरूपत्वात् यत्तस्मादात्मन आकाशः संभूतः आका
शाद्वायुरित्यादिश्रुतेः वेदिकायां अजायत जगन्मातराकाशं नभसोनिलः समीरणाद्वह्निरग्नि
रग्नेरापस्ततो मही ८० सत्यवतीति नित्ययोगे इनिः व्यासमाता वावोच्या विस्तरुद्रोशसंभवमि
तिव्यासविशेषश्रवणात् कदाचित्तु अनापन्न इति कुलचूडामणौ शिवं प्रति भगवत्युक्तेश्च ८१
सत्येति जगत्कर्तृत्वानुमानेनेश्वरसिद्धेः प्रमाणविषयस्य वस्तुनः परमार्थिकत्वनि
मात् ८२ सत्यभामेति सत्यः सफलो भामः क्रोधो यस्याः यन्मार्कण्डेयपुराणे रोमान
शेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् भामक्रोधे व्रजेतः जगत्संहारेच्छा
वा भामपदेनोक्ता सात्रापीति वा व्याख्या ८३ नगात्मजेति नगाः पर्वताः आत्मजा यस्याः
जन्यमात्रं प्रतीश्वरस्य हेतुत्वात् तेषामस्मादायजन्यत्वे तन्नायकतया विशिष्य निर्देशः ८४
रौद्रेति रौद्रं तूग्रमभी त्रिषु इत्यमरः रुद्रस्यायमिति स्वामी ८५ रौद्रस्वनेति घोराट्टहास
रवेति फेत्कारीयात् ८६ रुद्रेति .... नीत्यर्थः मंत्रभाष्योक्ता अथवा डीषा
यभावः छांदसत्वात् ८७ रौद्रदैत्यविनाशिनीति रौद्रान्वज्रगाडहेजकान्महिषादिदैत्या

न्विनाशयन्ति तथासैन्यसाहित्यं विशाखार्थेः ८८ कुमारीति कन्याकुमारीत्यमरः
त॰स॰ कुत्सितो मारो ऽस्याश्चन्द्रत्वादिति स्वामी न तथा तयातेन शक्रजपहोमार्चनादिभिः
टी॰ कुमारीपूजनेनात्र यथा देवी प्रसीदति इति देवीपुराणात् होमादिकं तु सकलं कु
३८ मारीपूजनं विना परिपूर्णफलं नैव सफलं पूजनं भवेत् इति ज्ञानार्णवाच्च अत्र
मारस्य महापुर्यां कुमारीत्वेति ८९ कौशिकीति कुशिकस्य तु गोत्रेण कौशिकी
त्वं भविष्यसीति हरिवंशे मार्कण्डेयपुराणे शरीरकोशाद्यत्तस्याः पार्वत्याः निःसृ
तांबिका कौशिकीति समस्तेषु ततो लोकेषु गीयते इत्युक्तं कौशिकी चण्डिकायां
च नदीभेदे च कौशिकीति विश्वः यद्वा कोशाद्दिव्यदेवतानात् तथा च याज्ञवल्क्यः
देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् संश्राव्य पाययेत्तस्माज्जले च प्रसृतित्रयं उ
ग्रान् दुर्गादित्यादीनिति विज्ञानेश्वरः तथा च पितामहः भक्तो यो यस्य देवस्य पाययेत्
स्नानजलं समीभावेत्तदेनानामादित्यस्य तु पाययेत् दुर्गायाः पा ययेद्वाशान् येवशास्त्रो
पजीविनः भास्करस्य तु यतोयं ब्राह्मणेन तु पाययेत् दुर्गायाः स्नापयेद्धूलमादित्यस्य तु ३८

मंडलं अन्येषामपि देवानां स्नापयेदायुधानि च १० विद्येति पूर्णानि यद्व्याख्यो दाहृतं कर्म
पुराणमत्रावधेयं विद्ज्ञानं विंदयाति प्राप्नोति विद्येति वार्थः ११ कालदैत्यविनाशिनी
ति कृष्णवर्णो दैत्यान् कालमक्कानां दैत्यांश्च नाशयतीति वार्थः १२ शंभुपत्नी १३ शं
भुरत्ना १४ शंभुजायेति नामत्रयं व्याख्यानवर्त्नि पदार्थ्यं तान् पृथक् न व्याख्यातं १५ म
होदरीति नासिकोदरेति ङीष् खर्वो लंबोदरी भीमामिति त्फेत्का रिणी नेत्रान् १६ शि
वपत्नीति शिवः शूली महेश्वर इत्यमरः १७ एतेन शिवरत्ना १८ शिवजायेति १९
नामद्वयमपि व्याख्यातं अंबिकेति अविनवीत्यादयः प्राह्वाद्याः अंबते शब्दं करोति अंबिका
कर्तरि ण्वुल् यद्वा अमरोगे अस्माद्धिन् अमं रोगं ददाति प्राप्नुवंति अंबा रोगिणः तेसं तस्माल्ल
उपकारकत्वादित्यंबिका मत्वर्थे ठन् १ वाक्यप्रमाणपदसागरपारीणस्य लक्ष्मीधराभिध
बुधस्य तनुजन्मेन विश्वेश्वरेण विहिते गिरिजाभिधार्थचिंतामणौ विहमघ्यषट्तस्तरीयः ४
दंष्ट्राकोटिकरालवक्त्रकुहरं रक्षौघैंडवद्धीक्षणं सद्योहूकसानरोत्तमांगजमहामाल्यावृपा
लंकृतं प्रेतारक्षरणद्वयं प्रतिलसत्संबेतराम्याम्बिकं तेजः किंचिदनंतमंबकनिवंबोगमंप्र

यथामहे सांप्रतं वक्तुमर्थं शतनाम्नां व्याख्याने हरपत्नीति हरति लोकान् पापं वा हरः एतेन
न॰स॰ हरवरहरजायेत्युक्तनामनी व्याख्याते प्राये ३ शूलिनीति शूलयद्दाटन्नोभ्योङीप् यद्वाशू
टी॰ ले पूजाविधानात् खड्गे शूलेर्चिता देवीति प्रागुदाहृतवचनात् वेदयज्ञो ग्रहो नाममलो
३९ केषाः सचराचरः शूले संपूजिते वत्स सर्वं भवति पूजितमिति कल्पतरौ देवीपुराणात् ४
मदनान्तककान्तेति मदनो मन्मथो मार इत्यमरः अन्तयतीत्यन्तकः शिवः ५ मदना
39 न्तकवल्लभेति व्यक्तं यद्वा मदन विजयिते नामयत्र वीङ्गोऽभिमतः नदावारप्रियत्वादे
तत् ६ गिरिजा गिरिकन्यकेति द्वे स्पष्टार्थे ८ गिरिशस्य वल्लभेति गिरीशो गिरिशो मृ
ड इत्यमरः गिरौ शेते इति गिरिशः गिरौडः छन्दसीति डप्रत्ययः गिरिरस्यास्ति लोमादित्वा
त् शो वा गिरिमिव तत्पुप्रभोगेन तत्करोति वा ९ भूतेति भूतानि पृथ्व्यादीनि सत्यस्यास्त
दतिरिक्तत्वात् सृष्ट्यादौ तत्परमाण्वेतत्नामउपादाना हेत्वर्थः यद्वा भूता वत्त दृश्यतीति तिर
स्यस्याः साधनोक्तत्वात् अष्टम्यां च चतुर्दश्यां पूजयेद्य प्रयत्नतः यत्र तत्रार्थयते मेत्रीतत्तदा
प्रोतिनित्यदा इति स्वतन्त्रोक्तेः अथवा अथवा पिशाचबालग्रहादियुक्तत्वात् भूतं ब्रह्मादौ ३९

पिष्टणवादो इति विश्वः ९ भवेति भवं सत्येष्रु भे वेति विश्वः नक्रावित्तादिष्वर्थः १२ भवस्य हेति भवे र्जन्मभिः स्पष्टाश्च नादित्वपायाः डर्गेयनात् चिन्मयस्याद्वितीयस्यानिर्गुणस्य शरीरिणः उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पनेतिश्रुतेः ९३ पावनीति पावय तिपवित्रीकरोत्यवश्यमिति एयंतात् ल्युट् पाविनीतिपाठे णिनिः शारदाक्षेत्रदर्शनस्य कृच्छ्रप्रत्याम्नायत्वेन पापशुद्धिहेतुत्वात् सर्वे वैसवमाहेश्वरसौवर्णशारदादिपीठेषुद र्शनेन योजन संख्यया कृच्छ्रं संख्येतिसकल स्मार्त्तग्रंथदर्शनात् १४ परिपालिनीति सर्वसंकटेभ्यः पालयतिभक्तांस्तथा पारोदोणिविलुमागमः पालरक्षणइतिचौरा दिकाद्धा १५ अरूपेति यद्यपिश्चात्मनोपिमानसप्रत्यक्षमस्त्येव मनसैवानुद्रष्टव्य इतिश्रुतेः तथापीह फलमापारवत्यतिषेधाभिप्रायेणेन डक्तं अतएव यतोवाचो निवर्तंते अप्राप्यमनसासहेतिश्रुतिः अथवा शुद्धब्रह्माभिप्रायेणविषयत्वनि तस्यैवायं निषेधः शुद्धब्रह्मणो हृन्निविषयत्वं नास्तीतिवेदांतिभिरुपगतत्वात् १६ बहुरूपेति शास्त्रानुसारिभिन्नानानियमत्वात् तथाचकौर्मे ज्ञानेनकर्मयोगेन

ना॰स॰
टी॰
४॰

५०

तपसाराधनेनैव प्राप्याहंतेमहाराजनान्यथाकर्मकोटिभिः १६ इष्टेति यजदेवपूजादौ
निष्ठायांचविश्वपीतिसंप्रसारणं अथवाआत्मानुपलयाषियत्नात् पदार्थांतरै रात्मीयाधि
कप्रियत्वस्वीकारात् नवाअरेसर्वस्यकामायसर्वंभवत्यात्मनस्तुकामायसर्वंप्रियंभवतीति
श्रुतेः १७ स्नेहप्रवर्द्धिनीति स्नेहोआत्मीयानांभक्तानामितियावत् तंप्रकर्षेणवर्द्धया
तितथा स्नेहात्यात्मनोः स्वनिजेधने इतिहेमचंद्रः १८ अच्युतेति कालत्रयेपिस्वरूपा
न्यथात्वरहिता जायतेऽस्तिवर्द्धतेविपरिणमतेपक्षीयतेनश्यतिचेतिषड्भावविकाराइ
तिहस्माह वार्ष्यायणिरितियास्कोक्तविकाररहितत्वात् १९ अप्रच्युतेति उपसर्गमा
त्रेविशेषः यद्वावेदांतिमतेब्रह्मणोजगदुपादानत्वेनप्रकर्षेणअच्युतास्वरूपमपरित्य
ज्यैवजगद्रूपेणपर्यवसानात् विवर्त्तोपादानत्वादितियावत् सांख्यमतेपि कार्यकार
णयोरभेदेनघटादिरूपतयानाशेपि स्वरूपेणप्रकृतेरविनाशित्वात् २० प्राणेति प्राणिति
जीवत्यनया प्राणयति प्राणप्रकृष्टंअणतिशब्दायतेवा अणतेःशब्दार्थात्पचाद्यच् २१
प्राणदेति भक्तानांप्राणंददातितत्रातिक्रान्तनिरासादितिभावः यद्वा ततोहमखि ४॰

ले लोकमात्मदेहसमुद्भवैः भरिष्यामि सुराः शाकैराप्राणधारकैः शाकंभरीति वि
ख्यातिं तदा यास्याम्यहं भुवी मार्कंडेयपुराणात् २२ वासवेश्वरीति वासवो ह्यत्र हार्हषेस
मरः वसोरपत्यमिति स्वामी यद्वा वसोर्नारायणस्यापत्यं वासवः प्रद्युम्नः शंबरवधेन सुर
दितत्वात् वसुर्नारायणः पुनर्वसुर्विश्वरूपा इति कोशः यद्वा वसूनां द्रव्याणां समूहो वास
वं तद्दातृत्वात् २३ अयोनिधिसमुद्भूतेति लक्ष्मीरूपेण समुद्रोत्पन्नत्वात् अथवा अयो
निधिशब्दोऽवयवार्थेन हृद्वाचीमि रोहदोत्पलत्वाद् स्यादिति स्पष्टमन्यत् अत्र मूलं तु शा
गेवापन्यस्तं यद्वा वेलातृपत्यात् समुद्रो भगवान् रुद्रो वेलाधीशो लैङ्गे इकन्यकेति लिं
गपुराणात् २४ धारिणीति धारयत्यवश्यं लोकानिति धारिणी आवश्यकेणिनिः
ब्रह्मांडपतनप्रतिबंधकप्रयत्नाश्रय इतियावत् २५ प्रतिष्ठेति सर्वलोकप्रसिद्धत्वात् प्र
तिष्ठाख्या शक्तिः मात्रका कूर्मपुराणोक्ता संजाताऽस्या इति तारकादित्वादितच् वा २६
उद्भवेति उद्भवत्यस्याः सर्वमिति ब्रह्मरूपेण जगदुपादानभूतत्वात् नैयायिकमते
निमित्तमात्रमर्थः २७ क्षोभिणीति ध्यानविशेषेण शत्रुक्षोभयत्यवश्यं तया वि

त॰स॰
टी॰
७१

41

द्वोभयतिसंदत्वेनिमन्त्रसहस्रकवचनात् २८ क्षेमेति कुशलकारित्वात् २९ श्रीगर्भेति
लक्ष्मीगर्भेयस्याः महाकोतिमत्वात् अथवा श्रीवीजयुक्तमंत्रत्वात् श्रीवीजाद्यायदावि
द्यातदाश्रीः सर्वतोमुखीतिमन्त्रसहस्रकात् ३० परमेश्वरीति परमत्वेसहृष्यादिकर्तृत्वे
यद्यपिस्त्रियेशभासेतिवरजेतस्येश्वरशब्दस्य पुंयोगेस्त्रीप्रत्ययः अन्यथाटापृथ्वप्रसंगात्
विन्यस्तमंगलमहौषधिरीश्वरायाइतियावत् तथाश्रोतेनाश्वकर्मणिवरडिन्यौणा
दिकेवरटिड्गोपधायाइतीन्त्येवरीत्वाङ्गीप् यद्वा ईशायातोः क्वनिपिवनिपिवानोन
त्वान्ङीप् एवनोरचेतिरेफादेशउत्यैश्वर्यनिमित्तकोपिईश्वरीशब्दइतिवोध्यं ३१
करालेतिकरालंभीषणेत्यवदितिविश्वः कः सूर्यः रोग्निः अलोभूषायस्यास्तत्रेवत्या
तुइतिवा ३२ पुष्टदेहेति पीनस्तनीपीवरामितिरुद्रयामलात् यद्वापुष्टमितिभावे
क्तः पुष्टिदार्ढ्यहावेष्टायस्याः हृद्धिहेतुत्वात् ३३ कारिणीति करोतसर्वषयंलोकांस्तथा
कारयतिब्रह्मणात्मवर्तनद्वारावा कुहिंसायां अस्माद्वा ३४ कंजलोचनेति कंजेपद्मे
समासगतायमेवाचकल्लमोयमास्पष्टमन्यत् ३५ शारण्येति तत्रसाधुरितियाप्रत्ययः ७१ ३६

कमलेति कमलाकमलालयेतिमात्स्ये २७ प्रीतेति प्रीञ्प्रीतौ कर्त्तरिक्तांते यद्वा प्री
तिपदाद्भावप्रधानादर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः पुलस्त्यभार्यारूपत्वात् पुलस्त्यः
शशभृन्मौलिः प्रीतिःकांतापिनाकिनइतिलिंगपुराणात् २८ विमलेति सर्वदोषहीन
त्वात् विमलापुरुषोत्तमेइतिमात्स्ये २९ आनंदवर्द्धिनीतिअकार्थं तथाचब्रह्मसंहिता
यां मलवियोजयित्वात्वमनाविभाजयेद्यदि सर्वसिद्धिपरिप्राप्तिदेववर्द्धिहरेज्जवि ३०
कपर्दिनीति कपर्द्दोस्यजटाजूटइति शिवप्रक्रमेऽमरः उग्रःकपर्दीभवइतिहलायुधः
पद्मपत्रनपुंयोगेङीप् तत्रानतइत्यधिकारात् तथापिलक्षणयाकपर्दशब्दस्यैतदीयजटापर
त्वे इतिप्रत्यये अत्रेभ्यइतितांतलक्षणेङीषितिआखेयं ३१ कल्पनेति कल्पःस्यात्प्रल
येन्यायेशास्त्रेब्रह्मदिनावधाविति विश्वः प्रलयंकरोतीतिण्यंतात्ल्युप्रत्ययः अथवाका
लात्मकत्वात् तथाचतत्रकमेकूर्मपुराणे तस्यसर्वजगत्सूतेःशक्तिर्मायेतिविश्रुता त
पदंआमयेदीशोमायावीपुरुषोत्तमः ३२ कद्रुरिति कश्यपपायत्रयोदशेतिपुराणान्मध्यग
तदत्तकन्यारूपत्वात् अथवा कस्यब्रह्मणस्तुःहृतवदाश्रयमूर्ता यद्वाजटायाः पिंगलवर्णे

तात् पिंगोग्रेकृजटांध्यायेदितिवचनात् ४३ सुमनानंदवर्द्धिनीति मनुतेमन इतिपचाद्यचि
न·र· च्युत्यस्याउकारोन्तोमनशब्दः सम्यग्ज्ञानेनप्रणिलानामानंदवर्द्धयतीत्यर्थः ४४ उदीर्णेति
टी· ऋग्गनादिस्यस्यउत्सर्वस्यनिष्टायांतृयं सर्वंदेत्तियावत् विस्वहृपविकाररहितेत्यनेनिमो
४२ पचितत्वाद्धा ४५ भूषणेति भूषणानिसंत्यस्याइत्यर्शाआद्यच् ४६ भवेति भवउत्पत्तिरस्या
स्तिभवीनादप्राग्राकारोवस्राग्रकारोविस्र्वायस्याः इतिहेतुपंचम्यावहुव्रीहिः अकारोवास
देवस्यादाकारस्तुपिनामहइतिनानार्थकोशः तद्भयजनिकेत्यर्थः ४७ सुरसेने
ति स्कंदभार्यादेवसेनातद्रूपत्वात् षण्मुखविद्विप्रपुरंधेसीदेवसेनाहरप्रियेतिलिंगपुरा
णोक्तेः अथवादैत्यमारणेनसेनाकार्यकारित्वात् अथवासुरसुतःप्रीतिसुकरइवीभर्त्ता
यस्याःइत्यर्थः ४८ सुरेश्वरीति यकार्थं सुराणांदेवानांनराणांतामसानांदेश्वरीत
न्नियामकत्वादितिवारः यावकेचतीत्येगचेतिविश्वः ४९ श्रीमतीति नित्ययोगादीम
तुप् ५० शिशिरेति सुषीमःशिशिरोजडइत्युपक्रम्य समान्यलिंगकाइत्यमरः सौम्यरू
पत्वात् ५१ अनंतेति येसाप्रतियोगित्वात् अथवाभावप्राधान्यादनंतत्वमस्त्यस्याः अनंतो ४२

भोगिनामसीति हरिवेष्टनात् ५२ शिशिराचलकन्यकेति सतीदेहत्यागानंतरं तदुत्पन्न-
त्वात् शिशिरः स्याद्धिमे भेदे तुषारे शीतलेन्यवदिति विश्वः ५३ स्वरमात्येति स्पष्टम् ५४
स्वरश्रेष्ठेति सर्वेषु श्रेष्ठा प्रशस्यतरा प्रशस्यश्रादेशः ५५ ज्येष्ठेति शक्तिविशेषरूपत्वात् सर्वो-
त्तमत्वाद्वा यद्वा कन्यास्येकैष्टमीसुक्ता ज्येष्ठदेवी महती स्मृता अलक्ष्मीपरिहाराय ज्येष्ठां त-
त्र प्रपूजयेदिति लिंगपुराणोक्तव्रतदेवतेयं ५६ प्राणेश्वरीति पुंसि भूम्न्यसवः प्राणा इत्य-
मरः आत्मस्वरूपत्वात् तथा च श्रुतिः न प्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु
जीवंति यस्मिन्नेतावुपाश्रितौ अथवा प्रसिद्धस्य प्राणस्येश्वरी तच्चापाटहेतुत्वात् प्राणस्य
प्राणमुत चक्षुषश्चक्षुरिति श्रुतेः ५७ स्थिरेति ब्रह्मरूपतया पारमार्थिकत्वात् ५८ त-
मोघ्नीति तमो मोहात्मकं हंतीति स्वज्ञानानलेन ५९ ध्यांतसंहंत्रीति ध्यांतमज्ञानं सम्यक् हंतीति प्रा-
ग्वदर्थः मोक्षहेतुत्वमत्र भयत्राणमर्थः ६० प्रयतात्मेति प्रयतः पापरहितः आत्मा यस्ये-
ति कर्मधारयः य आत्माऽपहतपाप्मेति अस्नाविरं शुद्धमपापविद्धमिति श्रुतेः ६१
पतिव्रतेति नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपासनेति स्मृतिः तथोक्तं आर्त्तार्त्ते मु-

दिनेरूष्टाप्रोक्षिनेमलिनाकृशा मूर्तेर्मूयेतयापत्यौमास्त्रीज्ञेयपतिव्रतेति ८२ प्रद्योतिनी
ना॰रू ति प्रकर्षेणद्योततेद्योतयतिवाजगत् सात्वमतेश्चाविमविमस्यपदार्थत्वात् तमेवभांत
टी॰ मनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिश्रुतेर्वा ८३ रथान्तरेति रथःस्यात्स्यंदने
५३ कायइतिविश्वः आत्मरूपेणदेहाधिष्ठातृत्वात् द्वासुपर्णासयुजासखायोसमानंवृक्षं
परिषस्वजाते तयोरन्यःपिप्पलंस्वाद्वत्यनश्नन्नन्योअभिचाकशीतीतिश्रुतेः आत्मानं
रथिनंविद्धिशरीरंरथमेवत्विति श्रुतेश्च यद्वा ततोपराह्नसमयेनवम्यांवैरथेस्थिता
भवानीग्राममध्येद्रष्टव्यैराजादिशाहूवान् इतिप्रसिद्धोर्थः ८४ सर्वलोकप्रकाशिनीति
तस्यभासासर्वमिदंविभातीत्युक्तेः अथवा लोक्यंतेभुज्यंतेविषयायैरितिलोका इं
द्रियाणितत्प्रकाशिका आत्मरूपत्वात् यमग्नुस्सवात्रेत्यवोषरूपंमनश्चत्वगादीन्यवो
यात्मकानि प्रवर्तंतआश्रित्यनिष्कंयमेकं सनित्योपलब्धिःस्वरूपोहमात्मेत्युक्तेः इंद्रिया॰
णांकरणत्वेनकुठारादिवत्कर्तृव्यापेक्षित्वनियमेनात्मसिद्धिस्वीकारात् ८५ मेधाविनीति
अस्यामेधेतिमंत्रार्थविनिः यद्वाभक्तानांमेधांअवतिमेधाविनी ८६ महावीर्येति ना ५३

नाविधसंसारजनकत्वात् सर्वेश्वरत्वाद्वा तथा च श्रुतिः सकारणं करणाधिपाधिपो न चास्य
कश्चिज्जनिता न चाधिपः इति ६७ हंसीति हंसो विहगभेदे स्यादर्के विष्णौ हयान्तरे योगिमन्त्रादि
भेदेषु परमात्मनि मत्सरे इति विश्वः वीरचूडामणौ हंसस्त्वाः सायनेवद्देसमेत्रिणां हितकाम्यया
यस्य विज्ञानमात्रेण सर्वज्ञो भवि जायते हंसात्मिका भगवती जीवो जयति सर्वदा हंसाख्यस्य
द्वाविशेषरूपत्वाद्वा हो मे सुन्दरा त्रयं प्रोक्तं मृगी हंसी च सत्करीति यामलोक्तेः ६८ संसारतारिणी
ति सुखदुःखोपभोगो हि संसार इति कीर्तनं इति पार्थसारथिमिश्राः जीवन्मुक्तो भवतीत्या
थर्वणात् ६९ प्रणतप्राणिनामार्तिहारिणीति भक्तिश्रद्धातिशयलक्षणः प्रकर्षः प्रशब्द
द्योत्यः आर्तिः पीडां हरतीति तच्छीला ७० दैत्यनाशिनीति नित्यकार्यं यद्वा दितेः छिन्नः तस्य भावो
दैत्यं भावे ष्यञ् तन्नाशयति खण्डरूपत्वाद् कपालकत्वाद्वा ७१ डाकिनीति भूमिनन्दात्मि
का देवी तया डाकिनि नारिणीति कवचप्रस्तावे गन्धर्वतन्त्रोक्तेः उक्तं च कालचूडामणौ डाकि
नी वामपार्श्वे तु कोटिसूर्यानलोपमामिति छिन्नमस्ताख्या चाद्वा अथवा स्वराभेदरूपत्वा
त् तथा च संडमालायां स्वराः त्रिदिवि यदि विस्फाटिकीडाकिनी तयेति प्रकम्प डाकिनीदा

त॰र॰
टी॰
४४

नमात्रेणसर्ववश्यो भवेद्ध्रुवः ७२ शाकिनीति ज्ञानार्णवे डाकिनी शाकिनी चैव ह्याकिनी काकि
नीततः शाकिनी हाकिनी चैव पश्चिमादिक्रमायजेत् इति चैतन्यकल्पेडर्का अत्रापि द्वात्रिंश
द्वर्णमंत्रविशेषे कुलिकाकामिनीज्ञानाडाकिनीराकिनीतथा लाकिनीकाकिनीपश्चा
च्छाकिनीहाकिनीतथेत्युक्तेः तथा वर्णयोगरत्नावल्यां खेचरी भूचरी भेदा च्छाकिन्यो हि द्वि
धामताः तासां स्थानानि रूपाणि कथयामि यथागमे श्मशाने दिव्यदेशेषु पर्वतेषु महाम
लाः क्रीडन्ति देवता दिव्याः भूचर्यः पुरभूमिषु नाना रूपधरा रूपाः खेचर्यो वरसिद्धिदाः
कथंचिद्गुरुशापेन मर्त्यलोके वसंति ताः नानाश्चर्यगुणोपेता रक्षन्ते न गुरुं विना क्षेत्रे पीठे
तथा ग्रामे नगरे विषये पुरे वसन्त्यनेकरूपेण शाकिन्योऽशाकिनाः सदा चंद्रमंडलसं
काशे देवि शाकिनिनारिणी निर्गर्षवैतेते ७३ शीलेति वारंवारं स्तुत्यादिकरणान्
शील्यते सर्वैः सेव्यत इति वा ७४ वराखट्वांगयाचिणीति वरशब्देन तन्मुद्रा याउ पादा
ने ज्ञानार्णवे वरदाभयमुद्रे तु परदाभयवांछिये इति खट्वांगमायुधविशेषः अत्रवरधार
णं वालात्रिपुरायां विष्टतजपवटीपुस्तकाभीत्यभीष्टामिति प्रपंचसारात् अथ कामेश्वरी॥ ४४

रत्नपात्रं सुधापूर्णं वरदे बिभ्रती करैरिति कादिमतात् अथवा संयत्प्रदभैरवी वरदा
नपरो नित्यं महासंयत्प्रदो स्मरेदिति ज्ञानार्णवात् एवमन्यत्रापि वोध्यं खट्वांगधारणे
दक्षिणकाल्यां शैवे शूले खट्वांगदक्षिणे इति वीरचूडामणिस्मरणात् विचित्रखट्वांग·
धरा नरमालाविभूषणेति मार्कण्डेयपुराणे यद्वा पंकजे पुष्पमालां च वराभीती भुजेषु चेति
सृष्टिध्याने खट्वांगमुशले दोर्भिरिति च संहारध्याने एतद्देहे च तन्त्रान्तरोक्तेः ७५ कौ
मुदीति यदादित्यगतं तेजो जगद्भासयतेऽखिलं यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामक
मित्युक्तेः चन्द्रिका कौमुदी ज्योत्स्नेत्यमरः तद्वत् सौम्यत्वाद्वा ७६ कुमुदेति मोदं ते प्रीयन्ते
स्वल्पविषयप्रायेति मुदः इगुपधात्कः प्रत्ययः काम्यकार्यपरा इति यावत् कान्तिस्तास्ति
यस्या तदुक्तं वीरचूडामणौ प्रयोगो नैव कर्तव्यो यदीच्छेदीप्सितं फलं प्रयोगादल्पसिद्धि
स्त्वित्येवं शङ्करोऽब्रवीत् ७७ कुन्देति नत्याद्य प्रियत्वात् माघ्यं कुन्दमित्यमरः विल्व
पत्रैः कुन्दपुष्पैर्नागपुष्पैः सुशोभने इति तन्त्रान्तरात् ७८ कौलिकीति कुलाचा
रप्रियत्वात् अनन्द्रनिठनादिति ठन् प्रत्ययो तात्स्वार्थे ऽण् अथवा कुलिकाख्यो नाग

ना॰र॰
टी॰
४५

त्सर्वेषु केवलं समं वा पित्र्यात्तथा मलेषु नागः कुलिकोगदो मतं दन्त्युपनिषद्वाक्यात् ७९

कुलजेति लज्जमत्संने यत्नूर्थैकऽभत्सेनमित्यर्थः कुत्सितो न ह्यालजो वीरनिंदा यस्याः

इत्यर्थः तथाच कुलार्णवे कुलदर्शनशास्त्राणि कुलद्रव्याणि कौलिकान् इत्युपक्रम्य

न निंदेत्वसगुप्तेन न हसेन्नावमानयेत् ८० अमलेति अविद्यमानो मलो ज्ञानेयस्याः

विषयसंबंधरूपार्थः विषयत्ता सेवेयावहिश्च प्रवेशो विनाकज्ञानो भवतीति यावत् कलि

मल्याः कामयेत्सुतेन वहर्षात् दुर्गेयित्यर्थः ८१ गर्वेति गर्वोऽहंकारस्तेजातो यस्याः स

र्वोत्कृष्टत्वात् अथवा गर्वगम्यथेषु कल्पद्रुमादिपदिनः तदर्थीनो ज्ञानार्थत्वाद्भक्तैर्ज्ञा

येनेत्यर्थः ८२ गुणसंपन्नेति सत्त्वादिगुणत्रयाश्रयभूताप्रकृतिरूपत्वात् अथवा गुणाः

रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेह

शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराइतिसप्तदशसूत्रोक्ताः सचकारोपा

त्ताइति चतुर्विंशतिर्वैशेषिकप्रसिद्धाः तत्संपन्ना तत्तद्गुणरूपेणनिषांतत्रसमवेतत्वादि

तिभावः ८३ नगजेति पंचम्यांजनेर्डप्रत्ययः न विद्यते गजो हस्तीव लिङ्गेन यस्याः इतिवा ४५

न कदाचित्तथ्याद्वेष्ये प्रदद्याद्धयहारिणी इति कालिकापुराणात् ८४ खगवाहिनीति
सरस्वतीरूपत्वात् हंसारूढा हरहासितहीरेंडकुंददावदातेति प्रपंचसारात् खगं वाहयती
गमयतीति व्युत्पत्त्या वायुमर्थ्यः प्रार्थ्यः प्राप्तः खगा आकाशगामिनी वासौ वाहिनी नदी चेति
वा समासः ८५ चंद्राननेति चंद्रतुल्यमाननं यस्याः ८६ महोग्रेति विनापि समासं पूर्वोत्त
रपदयोर्लोपः यथा भामा सत्यभामेति महाभाष्योक्तेरेकदेशग्रहणापितदर्थत्वे एते भेदाः
महोग्रायाः पुरुषार्थप्रवर्तकाः इत्यादावपि तथा व्यवहारात् महानुग्रो यस्याः इति पंच
मी बहुव्रीहिर्वा शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुमित्युक्तेः ८७ चारुमूर्द्धजशो
भितेति सामुद्रिकोक्तलक्षणविशिष्टकेशत्वात् यद्वा चरुभ्यो मूर्द्धभ्यः शिरोभ्यो जातैर्मा
ल्यरूपमाभरणैर्नक्षोभितत्वात् ८८ मनोज्ञेति सर्वेषां मनो जानाति सर्वांतर्यामित्वात् य
द्वा मनोपि ज्ञः केयस्याः इति बहुव्रीहिः येमनो न वेद यो मनोंतरो यमयति स त आत्मांतर्या
म्यमृत इति श्रुतेः ८९ माधवीति हराप्रियत्वात् कुलपूजोक्तकुट्टनीरूपत्वाद्वा श्रुतिस्तक
कपुष्पाणां पूजायां विधानाद्वा वासंती छिन्नपंचैवेति मत्स्यसूक्तात् माधवी मदिरा यो च कु

म॰र॰
टी॰
४८

हन्यामृतिमुक्तकेऽतिविश्वः ५० मान्येति मालक्ष्मीरेवान्या सा दक्षप प्रयोषित्यात्तस्या
अत्यन्यवैवेच्छेदः फलं ५१ माननीयेति योग्यत्वेनाननीयः सर्वैश्वर्यत्वादित्यर्थः यद्वामा
ज्ञानेनैतेन ध्यानतीया जीवन्महोत्तः वाङ्मलकात्कर्त्रेयनीयत्त् परमात्मरूपत्वात् नव्रा
नादेवसंसारत्निहर्तः ५२ महद्गुणेति कांदसंभावः यद्वा महत् तत्त्वभेदात् गुणोंगयस्याः
तस्य प्रकृतिभवत्वात् प्रकृतेर्महांस्ततोऽहंकार इति सांख्यवचनात् ५३ श्रेष्ठेति योऽह
वै ज्येष्ठं च वेद तिष्ठतां श्रेण्यश्रेष्ठत्येनोक्तेः सद्रूपत्वात् यद्वा विशेषानपेक्ष्य श्रेष्ठता
भिधानेन सर्वापेक्षश्रेष्ठत्वलाभेन परमात्मरूपत्वात् ५४ ज्येष्ठेति नक्षत्रविशेषरू
पत्वात्त्वा ५५ मधेति पूर्ववदर्थः यद्वा मधयति सुखयति तथा च मधशब्दान्मतुपि
मधवच्छब्दो व्याख्यातः कपर्दी ५६ पुष्पेति पुष्पसिद्धौ नक्षत्रे निपातः सर्वाणिन
क्षत्राणि स्त्रीलिंगान्यपि कश्चिदिच्छन्ति यद्वा मकारात् पुष्णाति पुष्या कांदसत्वात्कर्तरि
एयत् यद्वा पुषपुष्टौ भावे क्विप् ५७ धनिष्ठेति अविष्ठनिष्ठोमिष्ठत्र स्वाध्यविष्ठा
धनिष्ठेति हलायुधः अथवा यस्य पुष्टेर्निष्ठा पर्यवसानं या जीवयजर्थे कः नित्यशर्णा ४८

46

तादितिभावः ४८ पूर्वफल्गुनीति पूर्वा चासौ फल्गुनी च तस्या हि विषत्वात् अथवा फल
तीति फल फलने क्विप् तादृशी गौर्वाणी यस्याः सा फल्गुः तेन पतीति फल्गुनी नयते क्विप्
नैचैवं विसर्गश्रवणापत्तिः आकारो ऽत्र ज्ञातस्येयं ई तस्येदमित्यण् यस्येति आकारलोपः
टिड्ढाणञिति ङीप् फल्गुनी चासौ ई चेति व्याख्यानात् तत्र हल्ङ्याब्भ्य इति हलोपस्य हल
भत्वात् सरस्वतीस्वरूपेति यावत् पूर्वा मुख्या चासौ फल्गुनीति समासः सिद्धमन्त्रो यदा
मन्त्रीत्यादिवचनात् अत्र नक्षत्रांशो पूर्वफल्गुन्यां यनिष्ठायां च भगवत्याः शाजमेव हेतुः
अन्यत्र कौलतन्त्रे चेति विशेषो ध्येयः ४९ रक्तबीजारिहन्त्रीति रक्तमेव बीजे जजातीयान्यो
त्पत्तिकारणं यस्य स रक्तबीजः रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः समुत्पतति मेदिन्यां
तत्प्रमाणस्तदासुर इति मार्कण्डेयपुराणात् सपत्वारिरिति समासः ५० वाक्प्रमाणपद
सागरपारगस्य लक्ष्मीधराभिधबुधस्य तनूद्भवेन विश्वेश्वरेण विहिते गिरिजाभिधाथ
चिन्तामणौ व्रजनि पञ्चमको मयूखः ५ आपिङ्गलाकृतिजटातडितावि भातीमृडे स्फुर
नरकपालल सद्बलाका कादम्बिनी वनवती रदनीलदेहा जेत्री यतां भवतपञ्जरमग्र

त॰ रा॰
टी॰
४८

47

तारा अथ पंचमशतव्याख्यानं रक्तबीजविनाशिनीति पूर्वेणव्याख्यातं यद्वा रक्तस्य देव
तासमर्पणीयस्य बीजे कारणभूतो यो विः पद्मीतेनाशयति वलितेनेत्यर्थः यादिणः क
ल्पमाशास्त्रा इति कालिकापुराणात् १ चंडमुंडाविहंत्रीति चंडो दैत्यांतरे तीव्रे इति मुंडो
दैत्यांतरे हारावितिवविश्वः तयोर्विशाद्देन कर्मधारयः यदा तायोर्रणिचक्राणि अग्रासे
त्येषामिति विश्वुत्पत्तेः तदुक्तं मार्कंडेयपुराणे ततस्तावे तानि चक्राण्यनेकानि विशा
मानानि तन्मुखं वभुर्यथार्कविंबानि सुबहूनि घनोदरं ग्रासवदन्यत् २ चंडखंडविना
शिनीति यदुक्तं यद्वा चंडेतीव्रत्वं येयन्मुंडेस्य शिरः तद्विनाशयति छिन्नमस्तारूपत्वात् ३
कर्त्रीति अर्द्दनमानडीषु ४ हर्त्रीति लोकसंहारकत्वात् ब्रह्माविष्णुमहारुद्रमूपगणनीता :
सदा प्रियेति सगुणपरमेष्ठनी सृष्टिस्थितिलयात्मिकेति ज्ञानात्मत्वात् परमात्मा
रूपत्वात् यथावश्रुतिः यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनं मृत्युर्यस्योपसेचनं क इत्था
वेद यत्र सः ५ सुकर्त्रीति शोभना कर्त्री आयुधं तद्धतास्तामूण्योऽक्तेः यद्वा शोभना वासौ
कर्त्री चेत्यर्थः कर्तिके कार्यैक पादान गोवरकृतिमतं शोभनत्वं व जन्य मात्री पादानगो ४८

वरकृतिमतत्त्वं ग्राह्यं कृतिपदार्थैकदेशे कार्ये साकल्यपरतया ग्राहकः स्वशब्दइतिया
वत् ६ विमलेति विशेषेण मेध्शिवेलातिष्टहानिस्ववशीकरोतीतियावत् मनोहरत्वा
त्यकृतिरूपत्वाद्वा ७ अमलवाहिनीति अमलश्चासौवाहश्चसोस्यास्त्यस्तीति अर्शआद्
यत्वात् कर्मधारयादपिक्षोदसोमत्वर्थीयः अथवा अमलश्चासौवाहिनीचेतिसमा
सः तथाचपरमेश्वरीध्यानेप्रपंचसारे अश्वारूढाकराग्रेनवकनकमयींवेत्रयष्टिंद
धानेति ८ निर्मलेति निर्गतामालक्ष्मीर्ज्ञानंवायस्मात्तेनिर्मं यद्वामातोनिःक्रांता
मिति निरादयःक्रांताद्यर्थेपंचम्येतिसमासः दरिद्रंसंसारिणंवालाक्षीकरोति संपत्ति
ज्ञानवत्तानोभयहेतुत्वादनुष्टहानीतियावत् ९ भास्करीति यद्वादित्यगतंतेजइतिवच
नात् नाडीविशेषरूपत्वाद्वा इडामांसास्थितश्चेंद्रः पिंगलाभानुवाहिनीतिस्वरशा
स्त्रात् सूर्यप्रकाशजनकत्वाद्वा येनसूर्यस्तपतितेजसेद्धइतिश्रुतेः ९ भीमेति यो
गिनीविशेषरूपत्वात् यद्वा बिभ्यत्यस्मादितिभीमा भयादस्याग्निस्तपतीत्यादिश्रुतेः भी
मादयोपादानेइतिसाधुः यद्वा भियंसंसारादिजन्यांभीतिंमातिपरिछिनत्तिनाशयती

त्रियावत् श्रियं भक्तानिष्टां भीतिं मातिजानाति वा तदुपकारकत्वात् यद्वा भाज्ञानं भाया
द्वयं भीनिस्यदामित्यण् यस्येति चेत्यकारलोपः टिड्ढाणञ्इतिङीप् ज्ञानजनकेति या
वत् तादृशी माज्ञानं यस्याः भक्तनिष्टज्ञानविशेषजनकं यद्भक्तिरूपं ज्ञानं तत्तद्विष
यश्चत्यर्थः ज्ञाने विशेषलक्षणात्वविषयतं तत्तद्विषयं च ग्राह्यं ११ महिषासुरघातिनी॰
ति घातयतीति स्वार्थे णिजन्तात् हो हन्तेर्णिनिः ९२ कालिंदीति यमुनायाः कालिंदये
न संबंधात् कालिंदी संज्ञेति पद्मपुराणं यद्वा कोब्रह्मादिः तद्युक्तमलिंदमिति मध्यम
पदलोपी समासः गृहद्वारमलिंदः स्यादित्यमरः तस्येयं कालिंदीति स्वस्वामिभाव
संबंधः सेवार्थं ब्रह्मादीनां गृहद्वारे वर्तमानत्वादिति परमैश्वर्यसूचनं ९३ यमुनेति य
मेन यमजेति स्वामी कालिंदी सूर्यतनया यमुना शमनस्वसेत्यमरः यद्वा यमयति स
मस्तमंतर्यामित्वादिति यमुना यमयतेर्बाहुलकादुनप्रत्ययः यद्वा एति जानाति यः
गत्यर्थे ज्ञानार्था इति न्यायात् इण्गतौ अस्मात् पचाद्यच् दणोयणिति यणादेशः मु
निमिव करोति मुनयतीति णिजन्तात्पचाद्यच् णेरनिटीति णिलोपः यश्चमुना यमुने ४८

तिसमासः स्वज्ञानवतोप्युतिसादृश्यकद्रीतिफलितार्थः ससन्यासीसयोगीवसम्य
क्‌ः सचब्रह्मविदितिवचनात् १८ वृद्धेति प्रवयास्थविरोवृद्धइत्यमरः वृद्धेनेसम्भ्
नेकइतिस्वामी जन्ममात्रापेक्षयाशैवकालवृद्धितितात्पर्यं १९ भुवतीति स्नतस्विरि
तितिप्रत्ययः ततोङीष्यौतिः सतृप्रत्ययोतावा यद्वा भुमिश्रणामिश्रणयोरितिधा
ठादमिश्रणमत्रयुषात्पर्थः आविषकेप्रपंचसंबंधेसत्यपि ब्रह्मणस्तदोषप्रसक्तिर्नो
स्ति प्रकाशादिवन्नैवंपरइतिन्यायात् सूर्यादिप्रकाशोयथाजालावच्छेदेनवक्र
त्ववक्रत्वादिमान् यथावा आकाशंकर्णावच्छेदेनवशब्दग्राहकं तद्वदतः करणावा
च्छेदेनैवईशस्यसंसारित्वमितितदर्थः २० बालिकेति स्वार्थेकः तथावक्ष्यतिः तेस्त्री
त्वंपुमानसित्वंकुमारउतवाकुमारी त्वंजीर्णोदंडेनवंचसित्वंजातोभवसिविश्वतोमु
खः अनेनवयस्त्रितयेपियोषितोदेवतात्वं पंचउक्तं स्त्रीत्वमात्रस्यपूज्यतावच्छेदक
तावगमात् बालोवा[illegible]नो[illegible]मोहृद्धावासुंदरीतथा क्रान्तितंवामहापुष्पेणमलिप्त
विभावयेदिति काली[illegible] बालास्यात्षोडशाब्देतिकामप्रास्ते कावा इतीप्रज्ञावि

ना० र०
टी०
६५

59

पानात् षोडशाब्देन युवतीपीनोन्नतपयोधरामिति वीरचूडामणिवचनात् त्रिपुरा
त्रिवियादेविबालात्प्रथमोष्मणा इति ज्ञानार्णवात् १८ कौशल्येति कुशलःकोश
लादादित्यप्रत्ययः सर्वब्रह्मादयोऽपूर्णमदंशाभावसंभवाः इतिकुलचूडामणि
वचनात् तस्याः रामजननीत्वात् अदितिरूपत्वात्तस्याश्च सतपशत्वात् तेहधजाया
पतिकश्यपो ब्रह्मणःसूनुः कौशल्या चादितिः सर्वदेवमाता सर्वयशस्विनीत्यभ्या
ण। त्रैजगन्निर्माणशक्तिमत्त्वात् यद्वा कुशलस्य भावः कौशल्यं ब्राह्मणादित्वा
त् ष्यञ् तदस्त्यस्याः यद्वा कुशलैव कौशल्या स्वार्थे ष्यञ् १९ कौमुदी कौमुदी कार्त्ति
कोत्सवहेतुत्वात् तथा चोक्तं जितस्त्वश्शंकरस्त्वत्र जपंसे भवपार्वतीति २० माद्रीति
अनश्वेति सूत्रेण स्त्रियां तद्राजाकारलोपविधानात् माद्री सुताविष्यादौ मद्रीत्येव पा
ठ इति पदमंजर्यां भर्गादित्वे कल्पयित्वा न प्राच्यभर्गादिति निषेध इति दीक्षिताः दी
र्घपाठे आवमते मिस्वार्थाण्तत्त्वाकार्यं यद्वा मदं सुखं तस्यैयं जनकत्व संबंधेनेति
माद्री सुखजनकेतियावत् २१ हेयतीति भक्तानां दुःखरोधिकेतियावत् लक्षणे ६२

शानच्प्रत्ययः शयानाभुंजन इत्यादिवत् २१ अरुंधतीति महाभारते दानधर्मे कृत्याप्र
स्तिनउक्तिः धरान्धरित्रीं वसुधां भर्तुस्तिष्ठाम्यनंतरं मनोनुरुंधती भर्तुरिति मां वि
द्धरुंधतीं अरुंधतीसतीनां नास्तिति कौर्म्ये अरुंधतीसतीतां नमितिमाल्ये अरुंध
त्येकभर्तृणामिति हरिवंशे दुर्जीमाद्भुरुमोहद्वाः वशिष्ठं च महेश्वरमिति लिंग
पुराणे पर्यायतेयथाक्रमतस्तिवप्रकृतेसंगानिर्भेदेन लक्षणयेतिबोध्यं २२ पुरारि
ष्टहिणीति पुरारिरुद्रः त्रिपुरहंतृत्वात् २३ पूर्णेति स्वोत्कृष्टकवस्त्वंतराभावात्
आप्तकामश्रुतिश्रुतेः स्वनिष्ठस्वखंडः स्वाभावगोचरे स्वावच्छिन्नत्वं पूर्णत्वं अपतिह
तेच्छत्वेवा अथवा दशम्याः पूर्णसंज्ञत्वात्तस्याः कौलिकत्वाउपादाने २४ पूर्णात्
पेति सर्वदैकरूपत्वादित्यर्थः २५ पयस्विनीति पयःस्यात्क्षीरनीरयोरितिवि
श्वः अस्मायेतिविति तथा वतर्पणप्रक्रम्यसिद्धसारस्वते कालागरुद्ववोपेतै
र्विविधैर्गंधवारिभिरिति २६ संपूर्णं वंद्रवदनेति धर्मवाचकलुप्तोपमासमासे य
द्वा चंद्रस्यदृशं वदनं चेद्रूपंवदनंयस्याः विधिनिषेधोपदेशेन सर्वानुग्राहकत्वा

ना॰र॰
टी॰
५॰

तु तथा च श्रुतिः एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः साम
वेदोऽथर्वाङ्गिरस इत्यादि यद्वा भक्तानां सत्कार्यप्रवर्तकत्वात् अत्र पंचम्यर्थे वहु
व्रीहिः यद्वा संपूर्णं पालितं वेदस्य वदनं स्थैर्यं यया वदगतिस्थैर्ययोः एतस्य वाद
रस्य प्रवेशणसनेगार्गि सूर्यावेद्भमसौ विष्टनोति हृतत्र श्रुतिः २७ बालवेदसमप्रभे
ति रक्तवर्णत्वात् अथवा वेदकलावत्रिर्दोषाप्रभामानरूपप्रकर्षवती भा ज्ञानं यस्याः
50 सर्वविषयकप्रमाश्रयत्वात् इत्यर्थः २८ रेवतीति नक्षत्ररूपत्वात् हलभार्या नाडाग्रही
विशेषरूपता हा तथा वारण्यकपर्वणि स्कंदोत्पत्तौ अदितिं रेवतीं प्राहुर्ग्रहस्तस्या
स्तु रैवतः सोऽपि बालान्महाघोरो बाधते वै महाग्रहः रेवती हलपत्न्यां स्यात्ताराभेदेऽ
पि मातृकादिति विश्वः २९ रमणीति रमयतीति सर्वसिद्धिदातृत्वात् आनंदब्रह्मरूपेण
विद्वान्न बिभेति कुतश्चनेति श्रुतेर्वा ३० चित्रेति चित्रं प्रकाशस्य रूपं व्याप्स रोहिभे
देषु कर्बुरे वाभिधेयवदिति विश्वः यद्वा प्रकृतिरूपत्वात् अजामेकां लोहितशु
क्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपामिति श्रुतेः यद्यपि रजः प्रभृतिषु लोहि ५०

नादिन्नपेनास्ति तथापिरंजकत्वप्रसत्तत्तावरकत्वसाम्यात्तडपचारइतिसांख्याः वेदांतिन स्तु
तेजोजलान्नानांरक्तशुक्लकृष्णवर्णत्वसाम्पादव्याकृतंदेवतापरमिदमित्याहुः ३२ चित्रां
बरविभूषणेतिनानाप्रकाराणि अंबराणिभूषणानिचयस्याः अंबरंवासस्यपिव्योम्निइ
तिविश्वः परिष्कारोविभूषणमित्यमरः यद्वा चिद्वातेतत्रायतेरक्षतीतिचित्रंअंबरं व्र
ह्म आकाशपदेनापिव्रह्मनिर्दिष्टंपयवस्थापनात् तदेवविभूषणंयस्याः तदात्मक
त्वात् भूताकाशवारणायचित्रेतिविशेषणंतानन्तमत्वतात्पर्यकं ३३ वीणेति वी
णातुद्विविधाप्रोक्ताश्रुतिस्वरविशेषणादितिसंगीतदर्पणः उक्तंचसंगीतपणेश्वदेडो
न्तर्त्निकमापतेःकरमकश्रीमान्वचकेदःसयं तेवःपयमवोगिरीदंडहित्वस्तेत्रमोनिवासः
स्वयं ३४ वीणावतीति मातंगीरूपतात् आस्फालयंतीकलवल्लकींतांमातंगिनीम
हृदयेभिनोव इतिशारदातिलकात् अथवानीलसरस्वतीभेदत्वात् तथावचनंहि
शार्द्दरतत्संत्रस्तकाचीवहृदामणेः वत्तवोड्धरेसौम्यावीणावादनशीलिनीमि
त्यादि ३५ पिपेति विद्याहिद्विधापराऽपराच कर्मरूपाअभ्युदयफलाप्रथमा व्रह्म

ना॰र॰
टी॰
५२

ज्ञानहेतुर्मुक्तिफलाद्वितीयेतिस्पष्टं शारीरकमीमांसायां तथाचार्य्यैर्वर्णितमेवेड
कोपनिषद्वाक्यं तत्रापराऋग्वेदोयजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पो
व्याकरणंनिरुक्तंछन्दोज्योतिषमिति अथपरायया तदक्षरमधिगम्यतेयत्तदद्रेश्यमग्रा
ह्यमित्यादि ३५ यशोदेति यशःकीर्त्तिःसमज्ञाचेत्यमरः भक्तानांकीर्त्तिदातृत्वात्
नंदगोपगृहेजातायशोदागर्भसंभवेतिभगवतोक्तेस्तत्कन्यात्वाद्वा ३६ यशस्वि
नीति सर्वप्रसिद्धमहिमत्वात् तदुक्तं तमेवैकंजानथात्मानमन्यावाचोविमुंचथ
ति ३७ नवपुष्पसमुद्भवेति नवंअपर्युषितमितियावत् अपर्युषितनिर्दिष्टैः प्रोक्षि
तैर्जन्तुवर्जितैरितिवचनात् तेनपुष्पेणकल्पविहितेनसमर्च्यतीतिपुष्पाभक्ताजाता
प्रीतेतिभावः परंज्योतिः पुष्पगतंपुष्पेणैवप्रसीदतीतिकालिकापुराणात् ३८
नवपुष्पोत्सवेति पुष्पोविकासेकुसुमेस्त्रीणांरजसिचस्मृतेतिविश्वः स्त्रीरजसाउ
त्सवोयस्या यद्वा नवपुष्पेतिबहुव्रीहिणास्त्रीग्रहणं तथाउत्सवोयस्याइतिबहुव्रीहिः
तथाचगंधर्वतंत्रे पृथ्वीमृतुवतीवीक्ष्यमहत्संपदिनित्यशः तदावादीसुसिद्धोतहतः सि ५१

51

तितलंव्रजेत् कालीतंत्रेऽपि कुलागारे पुष्पितायाः दृष्ट्वा जपति यो नरः अयुतैकप्रमा
णेन साधकस्य स्थिरमानस इत्यादि पृथ्वीपदेन स्मरमंदिरग्रहणमिति कल्पलतायां ४९
उत्सवेति उत्कृष्टः सवो जपपूजादिरूपो यज्ञो यस्याः सा उत्सवा यद्वा उत् ऊर्ध्वं त्यजतीति उत्
दकारोपधायाः क्विपि ऊरस्य संयोगान्तलोपः स्पष्टं चेदं प्रत्याहाराह्निके महाभाष्ये सूतेः
अपृक्तप्रत्यये सवउत्पत्तिः उत् त्यागकर्मो सवो यस्याः सा उत्सवा अनादित्वपाजन्मरहि
तत्वात् ५० नवपुष्पस्रजेति पुष्पशब्देन कमलानां परामर्शः वचनानुरोधात्
विराजमानामसितोत्पलस्रजा इत्युपनिषद्दर्शनात् भागुरिमते टाप् ५१ मालेति
मा लक्ष्मीं भक्तेभ्यो लाति ददाति तथा चोद्धमते ला याचेरपि दानार्थत्वात् यद्वा मेः
शिवे अलति भूषयतीति तथा यद्वा मालेव माला अतिरम्यत्वात् ५२ माल्यभूषणभू
षितेति शिरोमालालंकृतत्वात् सद्यः छिन्नगलद्रक्तनृमुंडैः रक्तभूषणैः अन्यान्य
केशग्रथितैः पादपद्मप्रलंबितैः पंचाशद्भिर्महामालाशोभितां भुवनेश्वरी तंत्रचूडा
मणिवचनात् ५३ नवपुष्पसमप्राणेति तथा वीरचूडामणौ सतताऽपुष्पसमदूतसकु

ना॰र॰
टी॰
५२

52

लक्ष्मीतेनयोद्भवेत् नागवल्यादलेशुद्धं लताङ्कं चैव होमयेत् अयुतं च सहस्रं वा शतं
मष्टोत्तरं चैव वा होमयेद्बुधः तेन त्रैलोक्यं वशमानयेत् तस्य प्रत्यक्षतो याति सा रंगी
णाववाहिनी ४४ नवपुष्पसमर्चकेति कुलपुष्पप्रसादेन यया प्रीतिरजायते तेति कु
लचूडामणिवचनात् ४५ नवपुष्पात्मिकेति अतिप्रियत्वसूचनार्थं तदात्मकत्वोक्ति
अथवा नवपुष्पा या योषित्तद्रूपेत्यर्थः तदुक्तं कुलचूडामणौ रजोयुक्तां समासा
द्य तन्नात्रे स्वेष्टदेवतां पूजयित्वा महाराज्ञीं त्रिदिने प्रजपेन्मन्त्रं लक्षपीठफलं दे
वि लभते नात्र संशयः ४६ पुष्पेति पुष्पमस्यस्याऽस्तीति व्युत्पत्तेः नीलपद्महस्तत्वात् उ
ङ्ग्रेंदीवरकान्ति कर्परम्भजेति फेत्कारिणीतन्त्रात् ४७ पुष्पस्रजविभूषणेति व्याख्यातः
वर्त्तिपदार्थं ४८ नवपुष्पगुणापेनेति नवपुष्पस्य गुणैस्तद्विषयकेच्छादिभिर्युक्तत्वा
त् ४९ नवपुष्पोपशोभितेति पूर्ववदर्थः तस्य प्रत्यक्षतां यान्तु कं वा कस्मात् ५० नवपु
ष्पाप्रिश्योभितेति पूर्ववदितिस्पष्टं नवान् नूतनाविलक्षणाः प्रीतिविषयीभूताः पुष्पप्रिया वीर
साधककायस्याऽस्ति यद्वा नवं उपादेयं पुष्पं येषां ते प्रिया यस्याः ५१ प्रीतेति प्रीणातिपृ: ५२

जादिनासंतोषयतीतिप्रीः कर्त्तरिक्विप् तेनइतात्मामा भक्तिमात्रगम्येतिभावः मामेवये
प्रपद्यंतेमायामेतांतरंतितेइतिवचनात् मामनाश्रित्यततत्तमित्यादिवंद्यमाणकूर्मपुरा
णवचनाच्च ५२ प्रेतमंडलमध्यगेतिपरेतप्रेतसंस्थिताइत्यमरः चर्वदिंक्षशवासंडाश्रि
तोगासास्थिभूषणः तन्मध्येभावयेद्देवीयथोक्तध्यानयोगतः इतिगंधर्वतंत्रात् कु
लक्षणस्यप्रदीपायस्यइतिबहुव्रीहिः अन्यथासीतानुपपत्तेः ५४ कुलमार्गप्रवर्द्धिनीति
अप्रकाश्यत्वाय प्रयत्नसर्वसिद्धिदत्यादिसप्रत्कर्षद्योतनायप्रशाद्यः कुलपुष्पंकुल
द्रव्यंकुलप्रजांकुलेत्वपं गुरुंकुलपतिंवापिकुलमालाकुलाकुलं कुलचक्रंकुलध्या
नेसर्वध्यानप्रकाशयेत् इतिकुलचूडामणिवचनात् ५५ श्मशानभैरवीति श्मशानस्थि
तत्वात् वीरचूडामणौकालीप्रकरणे घोररूपामहारौद्रीश्मशानालयवासिनी श्म
शानस्थोमहारौद्रोमहाकालोदिगंबरइत्युपक्रम्य विपरीतरतांतत्रकालिकांहृदयोप
रीत्यादि श्मशानारण्यदेशेतुस्थापयेद्भैरवंहरं इतिपंचरात्रोक्तेश्च नदीतीरेवनेवेगे
रथ्यायांवावनेषुच स्थापितात्रभवेद्देविसर्वकामार्थसिद्धिदेति कल्पतरौदेवीपुराण

त० र०
टी०
५३

त्व ५८ कालभैरवीति श्मशानाधिपतिं यस्माद्भैरवं कालभैरवं इत्यादि वीरतन्त्रे तत्स्वे
पितात् तदुक्तं काशीखंडे कालिंकालं कलयति सदा काशीनिवासिनो अतः ख्या
तिं परां प्राप्य कालभैरवसंज्ञितो ५९ भैरवप्रियेति काशीखंडे सदैव यस्य भक्तेभ्यो य
महान्तः सदारुणाः भीरुतां परमां प्राप्तास्तेनासौ भैरवः स्मृतः तथा विश्वं भर्त्तुं समर्
थोऽस्मि भरणाद्भैरवः स्मृतः श्री हयशीर्षपंचरात्रे पूर्वं दानवनाशाय देवैरभ्यर्थितो हर
चकार भैरवं रूपं सर्वापहरनमस्कृते कुलचूडामणौ भैरवी भैरवात्मानं भावयेद्यदशे
षतः श्राद्धे विवाहे दाने च स्नाने वा गणपूजने एवं विना परे देव प्रसीदामि न संशयः अथ
वा ऽ असितांगादि भैरवाः प्रिया यस्याः ते च काशीखंडे हस्तिंडोऽसितांगश्च कपाली क्रो
धनस्तथा उन्मत्तभैरवस्तद्वत् क्रमात्संहारभीषणौ अथवा ज्ञानार्णवोक्ता दशाश्र
स्याः हेतुकं चैव वेतालं तन्मध्ये त्रिपुरांतकं अग्निजिह्वं च कालाग्निं तथैव च कपालिनं
एकपादं हेममन्त्रं पश्चवरेहाटकेश्वरं दशसंख्या महादेवि भैरवा मातृमंडले अथवा वटुकभै
रवो ग्राह्यः तथा च कुलार्णवे पावन्तो वटुकदयानावन्तो वरेश्वरि तर्प्यंति देवताः सर्वा ५३

लक्ष्यंतिस्मरणादपि ५८ गुणानंदभैरवीति गुणत्वेनज्ञानंदभैरवीस्वरूपाः तथा चतत्
नार्णवे ॐभिरभ्यर्च्य मंत्रैस्तु यजेद्दानंदभैरवं इत्यादिकल्पप्रस्तावे अत्रमोदसत्वाद्रूप
सिद्धिः यद्वा ज्ञानंदभैरवस्य यमानंदभैरवी गुणत्वेन तन्निष्ठगतनिरूपकत्वेन संबंधे
नानंदभैरवीतियोगविभागात्समासः ५९ ध्यानभैरवीति ध्यानेनाख्याता तत्रभैरवीभी
षणरूपोक्तेः महाभीमामितितंत्रचूडामणावुक्तत्वात् ६० क्षुरभैरवीति तथा चवरा
हपुराणे संहारिणीतिसादेवीकालरात्रिःप्रकीर्तिता तस्याश्चानुचरादेवीयास्सं
ख्यातकोटय इत्यादिनातज्ज्ञोजनप्रार्थनेरुद्भवाक्य निवसिष्यंतिदेवाश्चतथान्याजातहा
रिकाः गृहेदेवेऽत्रतडागेवाप्युद्यानेष्ववचैत्यके इत्यादि यद्वा प्रयोगविशेषेणनगरादि
दाहमणात् तदुक्तं फेत्कारिण्यां यत्रहानिश्चेन्नागादेग्राममध्येतत्तन्त्येय इत्यादि
तत्रस्थितापुरदाहं कुर्यात्कामदेवापरइतिकुलचूडामणिवचनात् ६१ मायाभै
रवीति काम्यप्रयोगविशेषेण ललितादिरूपेणमायासंपादकत्वात् तदुक्तंका
दिमते रक्तगंधांबरालेयमालाभूषितविग्रहः ध्यानेनिर्जनेदेवि चक्रेसंचिंतयज्जये

त् कल्हारचंपकाशोकपाटलाशतपत्रकैः सिद्धद्रव्यसमोमेनैर्मायाः सिद्धोनिमा
न॰र॰ टी॰ ५४ सतः यासांप्रसादलाभेनकामद्रूपोभवेन्नरः यद्वा मायाश्रज्ञानेतस्यभैरवीतन्त्रा
प्राकज्ञानविषयत्वात् भिद्यतेहृदयग्रन्थिः छिद्यन्तेसर्वसंशयाः क्षीयन्तेचास्यक
र्माणितस्मिन्दृष्टेपरावरे इतिश्रुतेः ९२ सौम्यभैरवीति नीलसरस्वतीभेदा
न्तरेसौम्याचासौभैरवीचेत्यर्थः भैरवीतिशुयोगार्थेदेवीवाचकत्वात् तथाचवी
55 रचूडामणौ चतुर्वाङ्गधरांसौम्यामित्यादि ९३ लोकभैरवीतिलोकसृष्टिहेतु
त्वात् तथाचज्ञानार्णवे ब्रह्माण्डशक्तिनिर्माणेजायतेशक्तितःप्रिये अतएवम
हेशानिब्रह्माप्रीतोनसंशयः ९५ सुविद्याभैरवीति तद्भेदत्वात् तदुक्तंवीरचूडा
मणौ एवंयोभजतेदेवींमहानीलसरस्वतीं गद्यपद्यमयीवाणीतस्यगङ्गाप्र
वाहवत् कालीतन्त्रेपि नग्नोबरलतापुष्पैन्नपूतेयस्तुसाधकः प्रजपेत्तस्यभ
वेत्तस्यैवविद्यायाः वल्लभःस्वयं तस्यदर्शनमात्रेणवादिनःकुण्ठिताः मताः गद्य
पद्यमयीवाणीसमायान्तस्यजायतेइत्यादि ९५ नीतिभैरवीति नीतिर्नयनेश्चा ५४

कर्षणमितियावत् भावेक्षिप तथा च कुलचूडामणौ कुलाकुलजपैकतानासमानय
तितल्लक्षणात् शृङ्गेयाजनहृदयस्य नदीपर्वतवासिनी द्वीपान्तरसहस्रेषु रादितेनातिग
डादिभिः ८६ गुणभैरवीति विद्यादिसर्वगुणहेतुत्वात् इमामधीयानस्तत्कौग
मपुराणकाव्यादिवागधीशो भवतीत्याथर्वणब्राह्मणात् ८७ संमोहभैरवीति संमो
हनादिकरत्वात् तथा चोत्तरतन्त्रे आकर्षणे वशीकारे मारणोच्चाटने तथा स्तम्भ
ने मोहने चैव द्रावणे भ्रामणे तथा वाग्मित्वे च धने चैव वद्धवद्धन्मेवच वद्धवल्ल
भतो वापि सर्वस्य प्रियदर्शिनो सर्वाणि विवरते च देवत्वमपि चैव हि ८८ पुष्टिभैरवी
ति पुष्टिरूपा भैरवी देवी तस्याः खड्गहस्ता महारूपा चर्ममुण्डधारिणी अष्टाद
शभुजरूपाढ्या पुष्टिरेवं विधा भवेत् इति चतुःषष्टिध्याने देवीपुराणात् ८९ तु
ष्टिभैरवीति तुष्टिं संपूजयेद्देवीं कैलासोपरि संस्थिताम् पाशांकुशधरां सौम्यां
पद्मस्वस्तिकधारिणीमिति देवीपुराणात् ९० हृष्टिस्थितिभैरवीति तद्भयका
रणत्वात् ऋतपवक्षूयते योऽत्रैवप्रभवः सपवाप्यय इति ९१ हृष्टिभैरवीति संप

ग्यदभैरवीरूपेणतथात्वात् निश्चितनोपिदेवेशि नदात्रिपुरदेवता समाराध्या भवत्का
ते·र· र्मोत्सृष्टेस्तपरमेश्वरीतितन्त्रकल्पज्ञानार्णवात् ७२ स्थितिभैरवीति लोकपालनहेतु
टी· त्वात् तथाचरुद्रभैरवीप्रस्तावेज्ञानार्णवे एतामाराध्यदेवेशीमहात्रिपुरसुंदरी पा
५५ लकोलोकविश्वलोपिप्रीतत्वात्स्वरवेदिते योगनिद्राकुलोदधिप्रेतत्वंतस्यनिश्चले त
ज्ञानेनस्वयंशक्तिरभक्तकेवलपदेनेति यद्वा स्थितिर्लोकमर्यादातद्रूपत्वात् तथा
55 च श्रुतिः एषसेतुर्विधरणएषांलोकानामसंभेदा यद्वा तत्रभैरवीभयजनकत्वसाधा
र्म्यात् तथाचश्रूयते भयादस्याग्निस्तपतिभयात्तपतिसूर्यः भयादिन्द्रश्चवायुश्चमृत्युर्धा
वतिपंचमइति ७३ पुंडरीकाक्षगृहिणीतिपुंडरीकवद्दाहिणीयस्याःसोपुंडरीकाक्ष
दैत्यारिःपुंडरीकाक्षइत्यमरः ७४ पुंडरीकाक्षवल्लभेति स्पष्टंउभयत्रापि श्रीकंठ
भाविहृदयेककृताधिवासागौरीतमेवशशिमौलिकृतप्रतिष्ठेतिमार्कंडेयपुराणे य
द्वा पुंडरीकोव्याघ्रः श्वेतसिंहियंमनोहृत्पेतद्रूपेगृहमस्यस्याः सिंहासनस्थेनाङ्क्रम
नोनिवासस्थानं सिंहपृष्ठसमाश्रितामितिमंडमालावचनात् दमतुपिरथक्रंचदेवाः ५५

सिंहं प्रदर्शयेत् इति मात्स्याच्च पुंडरीकात्पदेन पद्मबीजग्रहणं न वल्लभतेव नैर्जप
मालाविधानात् वदेजलस्थिनानेव विषयं सर्वसिद्धिदं पद्मबीजैश्च शैवैश्च श्रीकामो
जपमाचरेदिति नारदपंचरात्रात् पद्मादमालारचिता यशोलक्ष्मीश्च जायते इति समया
चारवचनाच्च मंत्रदेवप्रकाशिकायामपि पद्मादाः पुष्टिलक्ष्मीदा इति पद्मा पुंडरीकस्य
व्याघ्रस्य स्त्रोत्रश्च वहारिवलिरूपं तात्प्रियत्वात् तथा च कालिकापुराणे सिंहस्य शरभ
स्याथ स्वगात्रस्य च शोणितैः देवी तृप्तिमवाप्नोति सहस्रं परिवत्सरान् तथा सिंहव्याघ्र
नरे वापि स्वगात्ररुधिरेण तथा न दद्याद्ब्राह्मणो नित्यं महादेव्यै कथंचन सिंहव्याघ्रनरान् द
त्वा ब्राह्मणो नरकं व्रजेत् इति पुंडरीकं सिताम्भोजे सितच्छत्रेपि भेषजे कोशकारांतरे
व्याघ्रे पुंडरीकोग्निदिग्गजे रिति विश्वः ७५ आनंदस्कंदरीति इदानीं त्रिपुराहृदयन्तूपतेड
काक्षतीयभेदमयत्वं वक्तुं संदरीप्रकम्पते आनंदयति रसाविष्कारेणेत्यानंदः कामः
संसारे पटलो वा विडचपले संरपदेकं स्त्रव मिति कामप्रणास्वात् तत्संवंपिनी संदरी
त्रिभुवनसाम्प्रतराज्ञिपुरो का तथा च मंत्रसंकोचानार्णवे पनामसपस्पदेवेशि कामः

सर्वांगसुंदरः कामराजो भवेद्देवि निर्मयं ब्रह्मरूपिणि यद्वा ब्रह्मारूपत्वात् ध्यानेदं ब्रह्म-
त॰र॰ णोरूपमितिश्रुतेः ७९ वीरसुंदरीति वीरशब्देन नेदिनः परामर्शः तस्य वीरकसंज्ञत्वा
टी॰ त् अत्र मात्स्य कथाप्रदेशस्थायं देवीशापमरुद्भिः स्वकालिमपरीहासकुपितेन परित्यक्तं
५८ तत्र तपस्यितुं गतवती हिमगिरिं देवतां द्वास्थवीरकमंगनान्तरनिषेधार्थं त्यादि तत्र
शिवारूपेण धकजो विविशुः सविधे अन्तस्य मायाबलात् शैलस्ततः धिदेवताविषय
56 याथ्याथ्यानमित्त्वा हराम्य स्वैसस्थ्रेन रयानमाह सरुषाशमस्तपावीरकः पाषाणत्वमवा
मुहीति चतयाम्भूयः समायान पाय त्वा देम्य वधं निशाम्य दयपा शैलादिसंज्ञः कृतः तथाव
त्तानाणवेन डद्वारे प्रहात्य वेद्रेतत्रैव संपूज्य कामराजेतनः परं हितावेदं मत्विकुर्याद्धि
द्येयं नेदिपूजिता अथवा वीराणां सुंदरीत्वप्रियत्वात् तथाच वीरचूडामणौ एकोन्नेयतत
पारणेपपर्वतेषवनेष्वथे श्मशानेवव सेन्नित्यमेतद्वीरस्य लक्षणमित्यादि ७७ स्थि
तिसुंदरीति स्थितिशब्देन वाग्रहणं नामरूपं च भक्तानां कर्मणां च प्रवर्तनं वेदशब्दस्य पदवा
दौनिर्ममे परमेश्वर इत्यादिस्मृतेः शब्दविशेषोच्चारणादेवादीनां ईश्वरेण सृष्टत्वात् तथा ५८

वक्ष्यन्ति। एत इति वै प्रजापतिर्देवानसृजतोऽसृग्रमिति मनुष्यान् इंदव इति पितॄन् ति
रःपवित्रमिति ग्रहान् आशव इति स्तोत्राणि विश्वानीति शस्त्राणि अभिसौभगा इति प्र
जा इत्यादि एते असृग्रमिंदवस्तिरःपवित्रमाशवः विश्वान्यभिसौभगा इत्यस्या ऋचः
पदैर्देवादीन्स्रष्टा ससर्जेत्यर्थः ७८ गुणानंदसुंदरीति अदतिवद्भातिसुंदः अदिर्वधने
पचाद्यजेतः ततो नञ्समासः गुणानां आनंदः यस्मिन्सैवेयाघटकः क्रोधन इति यावत्
क्रोधश्च क्रमेणैषाम् अप्यवश्यमतो भवतीति हारीतवचनात् एवं चार्थवशाद्दुर्वाससोला
भः तथा च तत्प्रकरणे ज्ञानार्णवे दुर्वाससा पुरा देवि निष्कला पूजिता परा अथवा गुणे
षु गुरुरूपाकरणे पुत्तत्वात्मा योन्तरं च आनंदशब्देन सुंदरी तेषां तथा पूजाविधानात्
तदुक्तं वीरतंत्रे आनंदनाथशब्दांता गुरवः सर्वसिद्धिदाः ७९ कालसुंदरीति संहार
कर्तृत्वात्कालशब्देन रुद्रोपादानं तथा च ज्ञानार्णवे शृणु देवि प्रवक्ष्यामि वज्रः कूटं वशूं
करीमिति प्रक्रम्य वज्रः कूटं महाविद्या शंकरेण प्रपूजिता अथवा कालवर्णा चासौ सुं
दरी चेत्यर्थः ८० गुणसुंदरीति गुणास्तपःशौर्यादयः सम्यसेति विद्युत्तमाऽ गत्स्यः त

न॰ग॰ उक्तं तत्रैव श्रृणु देवि प्रवक्ष्यामि लोपामुद्राभिदां परां इत्युपक्रम्य अगस्त्योपासिता विद्या
टी॰ त्रैलोक्यक्षोभकारिणीति यद्वा गुणशब्देन तत्पूर्वकथनरूपादाने तथा च महिषमर्दिन्यां मा
५८ तस्य खेटकं शूलं वा पं च पाशमङ्कुशमेव च पाशं कोदण्डमित्यत्र च मलिगुणमप्यङ्कुशं पु
ष्पबाणानिति प्राणप्रतिष्ठाध्यानाच्च ८१ मायासुन्दरीति मा लक्ष्मी याति शापविषयत
त्त्वं वेत्येति माया: उर्वोशादितियावत् तेन लक्ष्मीस्त्रैलोक्यान्निर्वासितेति विष्णुपुराणे याते:
क्विप् तेन तदुपासितभेदाया, ददाने तदुक्तं तत्रैव कामराजाख्यविद्यायास्त्रिकूटेषु व
रानने यास्थिता भुवनेशानी ह्रिया कुरुवरानने बिन्दुहीना नादहीना उर्वोसम्पूजिता
भवेत् यद्वा मा देवताविषयकं ज्ञानं तं याति प्राप्नोतीति मायाः देवतास्वरूपाभिज्ञः त
त्सुन्दरी विद्ययेत्वैक्यानिवर्तकत्वात् ८२ सौम्यसुन्दरीति सौमस्येयं चन्द्राराधितत्वात्
उक्तं हि तत्रैव सहजं च पाग्भवं दीति प्रक्रम्य चन्द्राराधितविद्येयं भोगमोक्षफलप्रदेति
यद्वा उमया उमा सा तेन तद्देवश्रीमत्स्वार्थे प्यञ्जते न तल्य सौम्या वा सौसुन्दरीति पुष्प
वर्णेत्यर्थः अतसीपुष्पवैशिष्ट्यस्थापितेत्वे विवक्षितत्वात् ८३ लोकसुन्दरीति लो ५८

कोसत्यस्य लोकपालत्वात् इतीदृशपरामर्शः तथा च ज्ञानार्णवे कामराजाख्यविद्यायाः इत्यु
पक्रम्य इंद्राराधितविद्येयं भुक्तिमुक्तिफलप्रदा यद्वा लोकेषु सुंदरी आत्मरूपत्वेनानौ
पाधिकप्रेमविषयत्वादित्यर्थः ८४ विद्यासुंदरीति वित्ज्ञानेनतायातीतिपूर्ववत्यस्या
अगस्त्यग्रहमेव तदुक्तं तत्रैव कामराजाख्यविद्यायास्तामीयेहरपूजिते शक्तिकौ
जे सहायेस्याद्यागस्त्यस्य प्रपूजिता विद्यारूपा सुंदरीति वा सरस्वतीरूपत्वात् सोय
यमत्वरसप्राप्रायइत्युपक्रम्य वेदितव्यो महाराशिरिति महाभाष्यकारवचनात् ८५
नीतिसुंदरीति नीतिशास्त्रवक्तृत्वान्मनोरूपादाने कामराजाख्यविद्यायादस्त्युपक्रम्य
वेदाद्येतत्तृतीयेस्याद्विद्येयं मनुनिपूजितेति ज्ञानार्णववचनात् यद्वा नीतिः प्राप्तिः तद
त्वात्सर्वव्यापकत्वात् आकाशवत्सर्वगतश्चनित्यइतिश्रुतेः ८६ गुणसुंदरीति गुणाः
सत्वादयः सत्यस्य देवत्रयीरूपत्वादितिसूर्यग्रहः त्रयीमयः यात्रिगुणात्मधारिणे
इतितन्मेश्लिंगात् तदुक्तं लोपामुद्राख्यविद्यायाइत्यारभ्य एषाविद्यावरारोहेत्रि
पुरासुरपूजितेति तदेवं द्वादशविद्यासुंदर्युक्ता उक्तं हि ज्ञानार्णवे एभिर्द्वादशसं

न·रा·
टी·
५८

ख्याते नमस्त्रैलोक्यसर्ववेदिने द्वादशान्ते स्थिता देवी परब्रह्मस्वरूपिणी राज्ञी ये सर्वविद्यानां
सर्वाम्नायैर्निषेविता इत्यादि ८७ १२ द्वादशैव चबलसुंदरीपदान्यत्र पूर्वपदभाजि संति
यत्तु तन्मया त्रिपुरसुंदरीभिदो न तत्समानगणना: प्रदर्शिता: माल्लिकाहाररसिके
ति मल्लिकाविचकिलं विचकिलं इति हलायुधः हारपदस्य मुक्तावलीमात्रवा·
चित्वेपि सापपदस्य माल्यमेवार्थतात् मल्लिकात्रितयमिति विहितपुष्पप्रकरणे सत्त्व
स्तत्क्वात् उक्तं च भविष्यपुराणे स्वर्णपुष्पैर्यो भक्त्या पूजयेदपि चंडिकां मालत्या वा
मल्लिकया सोऽश्वमेधफलं लभेत् तथा प्रत्येकमक्तपुष्पेण दशसौवर्णिकं फलं
स्वर्णभिश्च तपसा हृत्वा तदेव द्विगुणं भवेत् ८८ माल्लिकाहारशोभितेति पूर्वेणाव्याख्याते
यद्वा मल्लिकाः हंसविशेषाः मल्लिनेर्मल्लिकाख्यास्ते इत्यमरः तन्मयस्याहारावलिरू
पः तत्सिजनकत्वसाधर्म्यात् तेन शोभिता सत्त्वष्टेति यावत् कयोन टिहिभ हंसवकवा
केवलावकमिति वलिप्रकरणे महाकालसंहितावचनात् यद्यपि मलिने स्वचुचरणे
शोभिता मल्लिकाकारा दन्ताः शुक्लापांगानादिति दीरस्वामिना व्याख्याते तथापि मल्लि ५८

काशाद्देवसन्तः मल्लिकाक्षुणामम्लायमानमृतात्रभेदयोः मल्लिकोद्धंसभेदेपीतिविश्वदर्श
नात् ८९ नवचंपकवर्णाभितिनवेंचंपकेनतुल्यंतस्यवर्णः यिशोगानेतद्बदाभावस्याः अ
न्यथावर्णापदयोनरूक्त्यायतेः नवदुर्गामंत्रेवेदंशेये हेमप्रस्थामिंड खंडान्तमौलिमितिप्र
पंचसारात् ९० नागकेसरशोभितेतिचांपेयः केसरोनागकेसरइत्यमरः नाप्रियाणिके
सरवेतिपुष्पाणियस्येतिस्वामी रक्तपुष्पेविल्वपत्रेनागकेसरमेवचेतिमुंडमालावचना
त् ९१ जवाकुसुमसंकाशेति ओडुपुष्पंजवामतेतिविश्वः तुल्यसंकाशनीकाशेत्युप
माप्रस्तावेदंडी ९२ जवाकुसुमशोभितेतिरक्तपुष्पमित्युदाहृतवचनात् जवाकुसुमहो
मेनकुंडेनस्त्रीवशीभवेदितिवीरचूडामणिवचनाच्च ९३ प्रियेति इगुपधज्ञाप्रीतिकःप्रत्य
यः आत्मस्वरूपेत्यर्थः ९४ विष्णोः प्रियंकरीति हेमप्रियभद्रेतिखचू भगिनीवासुदेव
स्येत्युक्तेः ९५ दानवेंद्रविनाशिनीति दनोरपत्यानिदानवाः अपत्यार्थेण् ९६ ज्ञानेश्वरी
ति ज्ञानस्यकैवल्यकारणस्येश्वरी तमेवविदित्वामृत्युमेतिइतिश्रुतेः उक्तंहिकूर्मपुरा
णेभगवता मामनाश्रित्यनभवेत्सभावविमलेशिवे ज्ञायतेनहिराजेंद्रततोमांशरणं

त.रा.
टी.
५९

व्रजेति ४७ ज्ञानदात्रीति विवृतप्रायं यद्वा जानातीति ज्ञः इगुपधज्ञाप्रीकिर इति कः प्र
त्ययः तासां ज्ञः प्राणो जीवनमिति यावत् तस्य दात्री स्वभक्तस्य चिरजीवनहेतुत्वात् त
दुक्तं फेत्कारीये विद्यावेदमवाप्नोति कीर्त्तिमायुः सुतान् बहून् निवासः श्रीसरस्वत्यो
र्यत्र स्वास्ते स्वतो मनुः ४८ ज्ञानानन्दप्रदायिनीति तत्त्वज्ञानजन्यश्चानन्दो मोक्षः यद्वा ज्ञा
नानन्दे इति कर्मधारयः तत्स्वरूपं ब्रह्मेति वेदान्तिनः स्पष्टमपरं तदुक्तमाथर्वणब्राह्मणे
य एतां मन्त्राणां श्रगतां जटाधारिणीं सर्ववेदमयीं सर्वार्थदां जपन्ति स्मरन्ति चिन्तयन्ति धार
यन्ति गुरुमुपास्ते स नाम मन्त्राणां श्रगतां जटाधा चतुर्वर्गफलभाग्भवति निर्लेपो निष्कल
को द्वन्द्ववर्जितो विगतज्वर इत्यादि तथा कूर्मपुराणे भगवद्वाक्यं तेषां नित्याभियुक्तानां
मायातत्त्वं समुत्थितं नाशयामि तमः कृत्स्नं ज्ञानदीपेन नो चिरात् ते तु तिर्हि तत्त्वमसा
ज्ञानेनैकेन तन्मया सदानन्दास्तु संसारे न जायन्ते पुनः पुनः ४९ गुणगौरवसंपन्नेति
सर्वपदार्थप्राधान्यमिति भाष्यकारादिप्रयोगाद्गुणेन षष्ठीसमासनिषेधोऽनित्य इति कै
यटेन व्याख्यानाद्गुणानां गौरवमिति समासः गुणानां ब्रह्मसेवीनां इत्यर्थः तथा वक्ष्यति ।५९

59

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप इति ५ वाक्प्रमाणपदसागरपारगस्य लक्ष्मी
धराभिधबुधस्य नन्दवेगविशेषस्फुरणेन विहिते गिरिजाभिधार्थचिंतामणौ व्रजति षष्ठमयू
खपद्धः ६ धनमोहनमाक्कदातिदानेन खर्वेंद्रीकर .... माप्यमाने न जहातु कदाचिद्दो
ग्रतारेश्वरणींदीवरमुकमेन राज्ञा १ अथ षष्ठश्लोकं व्याख्याति गुणशीलसमान्वितेति शो
ड्धातोः संपदादित्वाङ्गावे क्विप् तेन शीयं समभावपरं गुणेनोपि यमभावं लाति शृणो
ति गुणशीलः ततो भावप्राधान्यमाश्रित्य गुणशीलत्वं गुणभावं स्यति नाशयति गु
णशीलसः येतिकर्मणीत्यस्मात्कप्रत्ययः सवासौ मनुमंत्रश्चेति न इता प्रमादेव तान्यसं
वेधेनेत्यर्थः तदुक्तं फलकारीये न कदापि भवति मूर्खो मनुमेतं वेत्ति यो मनुजः त्रिजगति
भवति ख्यातो विधाय पूजाम मनुष्यमंत्रस्य रूपयौवनसंपन्नेति रूपमाकृतिविशेष
इति भारते देववोधः यौवनं तारुण्येन तत्र सर्वदा एककावस्थापन्नत्वे न न तत्तवस्थान्तर प्रा
प्ताविकारितापत्तेः नवयौवनसंपन्नामिति फलकारीयं २ रूपयौवनशोभिनेति रूप
स्य यौवनेन समतापकर्षेण अतिरेकेणोत्कर्षीवस्थानेन शोभिता यद्वा रूप्यत इति रू

त॰ रा॰
टी॰
६०

प्यसमानतीयैयौवनेयुवतिसमूहः महाभाष्यमतेभिक्षादिगणेषुयुवतिशब्दपाठाभावे
वद्भावः यौवनमितितुप्रकारांतरेणसाधितंव्याख्यानमितेनशेणमितिन्यर्थः ३ गुणाश्र
येति गुणान्सत्वादीनाश्रयतिप्रकृतिरूपत्वेनेत्यर्थः ४ गुणमयीति विकारेप्राचुर्येवा
मयट् गुणवतीतिपाठांतरेनित्ययोगेमतुप् ५ गुणगौरवसुंदरीति मनोमयः प्रा
णशरीरइत्यादिगुणानांगौरवेणसुंदरीनतुणैर्ब्रह्मणउपास्यत्वदर्शनात् ६ लसत्ता
रायतिप्रख्येति लसदतिपूर्णात्परंतारायतिनिर्देशः प्रख्यप्रतिनिधीश्रपीतिसदृशार्थे
षुआचार्यदंडी सरस्वतीरूपेणवेदं इंदुकुंदावदातानामितिप्रपंचसारात् यद्वा तारायं
तिहंहस्पतिसत्तस्यप्रख्याबुद्धिः लसंतीतारायतिप्रख्यायस्या इतिपंचम्यर्थेबहुव्रीहिः
भक्तानांतहस्यबुद्धिदत्वात् ७ नाटकहयशोभितेति नाटकंस्त्रीणांकर्णाभरणभे
दः सर्वाभरणभूषितामितिहृतीप्रस्तावेउत्तरतंत्रे ८ हत्वमलासियतेति प्रह्लादी
नांहृत्वातलेवलिदानविधानात् तथाचप्रयोगसारे कदंवश्चकरंजश्चविभीतोनिंब
एवच अश्वत्थोडुंवरश्चैवश्लेष्मातकविभीतकौ मातृहत्वाः क्रमेणैताः पूर्वादीशा ६०

60

लदिगणाः एषामेकं समाश्रित्य वलिं दद्यात् प्रयोगोविन्ते यद्वा त्रिपुटामंत्रपरं अयं श्लोकः
स्यहृदयस्य निषण्णां देवतां स्मरेदिति तत्र ध्यानोक्तेः ९ देवीति देवानां स्त्री देवी तज्जलन्ती
त्यर्थ शुभेयो गादाख्यायाडी सुप्रस्य यस्य कैशाल्यया मा विस्तखे नरामः प्राक् केकपीतांभर
नस्तनो भूदित्यादि प्रयोगानुसारेण जन्यजनकसंबंधोपस्थाक्तनतान् ९ हृदयशाखोपरि
स्थितेति ये हृदयेषु शाखिंजरा नीलग्रीवा विलोहिता इत्यादि श्रुतेः यद्वा लतारूपतया
शाखायामुपरि वाचस्थानात् हृदः मूलाद्युपरि देवः मूलपाणिप्रियालनेति लिंगपुरा
णोक्तेः ११ हृत्कमलमध्यागनिलयेति तथा च श्रुतिः द्वासुपर्णेति हृदयपदमुपचारेण शा
रीरपरं अनेन जीवपरमात्मरूपत्वमुक्तं १२ हृत्कमलमध्यनिवासिनीति तदुक्तमेतद्देहेषु
नेत्रान्तरे चंपकाशोकपुंनागकदलीमंडितेवने दोलारूढां प्रसन्नास्यां चेटीभिः परि
वारितां १३ कुमुद्वतीति कुमुद्वती कुमुदिन्यां कुशपल्यां कुमुद्वतीति विश्वः यद्वा
कुत्सितानां मृत्तीतिये षां ते कुमुदः मूर्खाः दरिद्रादयस्तेभ्योत्यस्यानुग्राह्यत्वसंबं
धेनेत्यर्थः १४ कुमुद्दिनीति पुष्करादिभ्यो देशे इतीनिप्रत्ययः यद्वा कुमुदं कैरवे र

न·ना·
टी·
८१

६/

कपंकजे इति विश्वः पद्मपुष्पेणार्केन संतुष्टाः सर्वदेवता इति मुंडमालावचनात् १५
कुमुदेति मानसे कुमुदा नामेति मत्स्यपुराणे देव्युक्तेः यद्वा कुमुदानि संत्यस्याः
कुमुदैर्वशयेद्विप्रान्नृपतीन्पद्महोमतः इति वनदुर्गाप्रकरणे शारदातिलकोक्तेः १६
कुमुदाकरेति कुमुदाकरस्तडागोस्त्यस्याः साधकस्यानन्तेत्यर्थः शून्यागारे श्मशा
ने यदि जपालेजनडस्त्वेकलिंगे तडागे इति वीरतंत्रोक्तेः १७ कौसुंभपुष्परसिकेति कुसु
भं हेमन्ति महावज्रतेचेति विश्वः रक्तपुष्पैर्महादेवीति सामान्यतो विधानात् यद्वा केव
लं स्वर्णपुष्पैस्तु त्रैलोक्यं स्तंभयेद्ध्रुवे मासमात्रेण पापानि सप्तजन्मकृतान्यपि नाश
येन्मोहयेत्सर्वां समुद्रवलयां धरां इति ज्ञानार्णवोक्तेः १८ कौसुंभारुणमस्तकेति यु
द्धादौ क्रोधेन रक्तमस्तवरागोस्त्यस्याः यद्वा कौसुंभवद्रुणानि मस्तकानि मालासंबंधीनि
यस्याः तादृशामुंडमालालंकृतत्वात् १९ स्वयंभूपुष्पसंकाशेति पलाशस्य ब्रह्महृदु
त्वात्स्वयंभूपदं तत्परं तत्संबंधि पुष्पवद्रक्तवर्णत्वात् २० स्वयंभूपुष्पसंकाशे निधारिणी
ति पूजायां तत्पुष्पाणां विहितत्वात् वल्लनः कौलिकसंमतः संकेतार्थो विवादितः तद ८१

क्तं मुंडमालायां स्वयंभूकुसुमं देवि त्रिविधं संविजायते शाकं षोडशेण दन्तच्छायाउत्तमा स
र्वसिद्धिदा वलात्कारेण कुच्छायामध्यमाभोगवर्द्धिनी रजोयोगवशाद्दन्यास्त्वधमा सर्व
दायिनी २१ स्वयंभूपुष्पसरसिमध्येति तेन पंच लिखनविधानात् तथा च कुलचूडामणौ
कुंडगोलोद्भवैर्द्रव्यैः स्वयंभूकुसुमेन च रोचनालादयावकैः कुंकुमाद्द्यैश्चंदनैः यंत्र
कृत्वा तत्र पूजां कृत्वा जपमथाचरेत् यद्वा तेनार्घ्यदानविधानात् यदा मुंडमालायां स्वयं
भूकुसुमैर्देवता भवेत् षट्कर्मभाजने २२ सदाध्यानवतीति सदाशब्दस्य पाणिग्रहीतासं
भवात्तस्या नो मांतर्भाव एव साधीयान् तथा च तारिणीध्यानं तेजोंतरं प्रावस्योपरि दे
वेपीनस्योपरि कपालके नासाग्रध्याननिरता महाघोरा वरप्रदा २३ शुक्रप्रियेति शु
क्रो दैत्याचार्यः स्ववादयत्तत्तद्देवीमूलोद्घनकरेयति प्रवृत्तमगमद्देव्या वारितिशोकरेवसा
इति मोत्तयर्भे शुक्रस्य शिवजठरनिर्गमसमये देव्याः पुत्रीकृतत्वात् वा यद्वा शुक्रपदं
वीजपरं कुंडगोलोद्भवैर्द्रव्यैरित्युक्तवचनात् २४ शुक्ररतेति शुक्रेवन्हौरता होमेनतत्
त्फलदत्वात् मन्माव स्तत्तथा मीव दिविसर्वेचदेवताइतिशातातनपोक्तेः स्त्रोक्रियाव

न॰रा॰
टी॰
६२

तोदेवाइतितत्रहोमात्मकपूजाविधानात् स्त्रीवेरेतसिशुक्रेनाभार्गेयज्येष्ठवह्निषु
इत्यमरः २५ शुक्रमज्जनतत्परेति शुक्रः प्रोक्तेः क्रामतीतिक्रमः तदुदावरन्क्रम
नुवेचलइतिपावत् शुचाक्रमनंशुक्रामन् सचासौजनश्चशुक्रेमज्जनः अत्रतत्परा
तदुद्दाराससक्तत्वादित्यर्थः यद्वा शुक्रेजेष्ठमासेमज्जनेस्नपनेजनोसिमज्जनात् परउ
त्कृष्टोयस्याः वाजमः सिध्यतेमंत्रोनाद्भुतस्यफलप्रदइति तत्तायुदानः तदुक्तं भ
विष्योत्तरे वसंतसमयेस्नात्वाहृतादेवालयंपरे शिवस्यविष्णोरर्कस्यइष्टदेवस्यवापु
नः सोवनेकारयेत्कुंभमदिन्नेदेवमस्तके अनेनविधिनादेवनरोमासवतुष्टयं इत्या
दि अथवाऽर्घ्यदानप्रकरणेमेडमालायां कुंडगोलस्यवीजेवोसर्वासिद्धीध्रुवाभवेत्
सप्तवारतिसेक्तंकुंडमन्त्रमसप्ततिदं विषवारतिसंसक्तंगोलमन्त्रमसिद्धिदम् २६
पूर्णेति पूर्णावपूर्णिमावेदेइतिहरिवंशे चतुर्दश्यष्टमीचैवअमावास्यावपूर्णि
मा पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवचेति विष्णुपुराणोक्तेः पूर्णिमायांचर्वन
स्यप्रशस्तत्वात् तथाचभविष्यपुराणे सर्वकालेषुसर्वेषुवेडिकांयः प्रयच्छति विमा ६२

62

नवरमात्रच्छोत्सवज मालाकुलत्न्वय ब्रह्मलोकं न रोगता मोदते शाश्वतीः समाः २७ अप
र्णेति अपगतं ऋणं धनादिचक्रविचारो यस्याः सिद्धविद्यात्वात् तथा च मुंडमालायां ना
त्र सिद्धाद्यपेक्षास्ति न च तत्रादिविचारणा कालादिशोधनं नास्ति न चामित्रादिदूषणं २८
अपर्णेति पर्णः स्यात्किंशुके पत्रे इति विश्वः तत्सम्बैः पूजाविधानात् किंशुकैः स्वर्गरे
श्चैवेति देवीपुराणोक्ते अथवा अपर्णो गृहडो यस्याः भुवनेशेनेलितया विलक्षणया भ
गवत्स्वंशाजत्स्योक्तत्वात् २९ निःपर्णेति पत्राणां हृदाद्यवयवत्वाद्युपचारेण निरवयवे
त्यर्थः अखंडरूपत्वात् ३० पापनाशिनीति व्यापकीभूतयापतस्य नाशप्रतावच्छेदकता
भिधाने ब्रह्मवधादिजन्यतावच्छेदकावांतरवैजात्यावच्छिन्नपापनाशकत्वलाभार्थं
भविष्यपुराणे मेरुमंदिरमात्रोपि राशिः पापस्य कर्मणः चंडिकां वेशमासाद्य नश्यते
दुष्टरोगवत् सर्वावस्थागतोपापि युक्तो वा सर्वपातकैः दुर्गां नत्वा नरः सोपि प्रयाति
परमं पदं ३१ मदिरामोदसंपन्नेति ततः कुरु जगन्माता चंडिकापानमुत्तमं इति मा
र्कंडेयपुराणोक्तेः प्रायेकालीकरालास्यामित्युपक्रम्य कुलचूडामणौ मदिरा

तं॰रा॰
टी॰
६३

63

मोदनासालकेदिनादि समेदिनी यद्वा मदगंधनार्थामेतत्पूजाविधानात् मदगं
धावयानारी मदस्खलनमंथरा सोम्रतादेत्ति संप्रोक्ता मत्ता पापविनाशिनी निभावहं
डामणिवचनात् ३२ मदिरामोदधारिणीति मदिरामोदं प्रीतिं धारयतीति तथा कुल
चूडामणौ मद्यमांसे विना यस्तु कुलपूजां समाचरेत् जन्मांतरसहस्रस्य सुकृतं तस्य
नश्यति श्रीब्रह्मसंहितायां मकारपंचकैर्युक्तं दद्याद्देव्यै विशेषितः पंचद्रव्यविहीने
न न सिद्ध्यति कदाचन ३३ सर्वाश्रयेति आश्रयपदं भावप्रधानं सर्वेषामाश्रयतेयः
स्यो सर्वाश्रयणीयत्वात् तथा च स्कंदपुराणे लोमशोक्तिः सा सेव्या सेवजमवात्मनं
वासामनीषिभिः संसारतारिणी सैका भोगस्वर्गापवर्गदा ३४ सर्वगुणानंदकंदलं
कारिणीति सर्वगुणस्य सर्वोत्कृष्टस्यानंदकंदलस्य मोदरूपस्य हेतुत्वात् कंदल
पदं नित्यत्वपरं एतस्यैवानंदस्य सर्वाणि भूतानि मात्रामुपजीवंतीति श्रुतेः तथा च भ
विष्यपुराणे यः सदा पूजयेद्दुर्गां प्रणमेद्वापि भक्तितः स योगी स च निर्धी मान्स भक्ति
मान्सकरे स्थिता ३५ नारीपुष्पसमप्राणेति तडंकं नीलतंत्रे महाचीनक्रमे देवीप्या ॥ ६३

त्यातत्रप्रपूजयेत् तदुक्तोऽन्नवपुष्पेणपूजयेद्भक्तिभावतः २८ नारीपुष्पसमायुक्तेति
विषयतार्थकसप्तम्यासमासः तथावर्गोऽयर्वतंत्रे पृथ्वीमङ्गमेतीवीदयसहस्रैयदि
नित्यशः तदावादीस्तसिद्धांतहतः क्षितितलेव्रजेदिति २९ नारीपुष्पोत्सवेति त
देवउत्सवः प्रीतिर्हि तुरस्याः तदुक्तं श्रीक्रमे कुंडगोलोद्भवं द्रव्यं स्वयंभूकुसुमेन
या अर्घ्यंदत्वामहेशानिसर्वसिद्धीश्वरोभवेत् ३० नारीति श्रीभवान्याद्याहि
उपासकानुकंपार्थंगृहीतरूपस्य परमेश्वरस्यस्त्रीरूपाणीतिवदंतिशास्त्रविदः २९
नारीपुष्परतेति तदुक्तं कालीतंत्रे लतापुष्पान्विकृता ॱॱ पर्णांतांप्रातकंतुषः ता
निसेमेत्राविधिवदसंकृत्साधकोत्तमः ततोवैहोमयोनानि संस्कृते ग्रेपथाविधि
युगानामयुतेनेन पूजनेजायतेशिवे ३१ मृगीति मृगीत्वव नितांतदेशतिविश्वः
तथावभरतः स्वलीदरीसमनासानजंघावनप्रियेत्यादिप्रक्रम्य कोपनावल
स्तावमृगमतांगनास्मृतेति अथवामुद्राविशेषरूपतात् तदुक्तंरुद्रयामले
मोमुद्रात्रयंप्रोक्तं मृगीहंसीवसकरी सूकरीकरसंकोचे मृगीमुद्राकवनिष्ठि

त॰ रा॰
टी॰
६४

के हंसीस्थानजैनीभुजकात्रिधाभुजाप्रकीर्तिता तथाशोणितकेचभृंगीशेयेति ४१ च
तुर्भुजेति तथाचतंत्रचूडामणौ चतुर्भुजा रक्तमांसखंडमंडितमुखीत्यादि ४२ दश
भुजेति इदंचमहिषमर्दिन्यामवधेयं कात्यायन्याःप्रवक्ष्यामिरूपंदशभुजंतथेतिम
त्स्यपुराणोक्तेः ४३ अष्टादशभुजेति हेमाद्रौविश्वधर्मोत्तरे अष्टादशभुजाकार्या
भद्रकालीमनोहरा पीनाःस्त्रशास्त्राःपरिधायमाश्वभुजास्तथाष्टादशभोतियस्या
इति वामनपुराणेमहिषासुरप्रतिचंडमुंडोक्तिः तथादशावतारीप्रस्तावेमुंडमाला
या अष्टादशभुजोनित्यासिंहपृष्ठसमाश्रितामित्यादि ४४ द्विभुजेति तथाचगौरी
विवाहप्रकरणेहयशीर्षपंचरात्रे कारयेद्विभुजांदेवीं सर्वालंकारभूषितां तथाजल
नाराम्भपक्रम्यष्टादशपत्रान्तरमंत्रमुक्तावीरचूडामणौ नीलवर्णात्रिनयनाद्विभुजांतो
यपंकजेइत्यादि ४५ षड्भुजेति इदंचकामेश्वरीरूपेणतथाचकादिमते षड्भुजात्रीक्ष
णामिंडकलाकलितमालिकामित्यादि ४६ अष्टारपंकजोपरिसंस्थितेअष्टौआर
णिपत्राणियस्यनादशकमलेषुजाविषितात् तडक्तमाथर्वणब्राह्मणे पूर्णस्या ६७

नमस्याः अतः षट्कोणमष्टदलनलिनमोन्तत्वात् अथवा कुंडलिनीरूपत्वात् तथावरणाना
णीवेतां प्रक्रम्य ज्ञेभनेवाङ्कृतासात्त्वहृत्पद्मेष्टदलेस्मिन्नेमादि ४७ कौवेरीत्ीति कुवेरस्येयं
यक्षिणीरूपत्वात् अथवा पूज्यपूजकभावात् कौपैश्वर्यं कुवेरेण गृहणाशाकगौरवमि
तिरुक्तदशरणात् अथवा उत्तरादिकस्थितत्वात् तदुक्तं कालिकापुराणे दिग्विभागेतु
कौवेरी दिक् शिवा प्रीतिकारिणीति यद्वा कुवेरभार्यारूपत्वात् वेद्वार्हमौलिर्यदीदं
स्वयमृद्धिरुमास्यनेति लिंगपुराणोक्तेः यद्वा उत्तराम्नायत्वात् तदुक्तं समयाचारे
कालिकाभेदसहिता नानाभेदाश्च संयुता मातंगी भैरवी छिन्ना तथा धूमावती मता उत्त
राम्नायकथिता शीघ्रकालफलप्रदेति ४८ कौरवीति युधिष्ठिराराधितत्वात् तथा च
भारते विराटनगरे रम्यं प्रविशन्नेव भूपतिः अस्तौत मनसा देवीं कुंतीपुत्रो युधिष्ठिरः
अथवाव संतराजा पुत्रकमागभेदेना ऽस्तुभस्त्वकतथा कुन्तितोरवोयस्याः यद्वा प्रजा
वतिरेकेण निष्ठावहत्वात् कुन्तितो रवो यस्याः पशुरूपपरा देवी योनावेपतति निर्जने
शिवाराधनेन सा पशु सर्वं तस्य विनश्यति निवेशितमिति वचनात् तस्मादियं कौरवी

त॰र॰
टी॰
६५

शिवेत्यर्थः तदुक्तं कुल[चूडा]मणौ कालिकालीति विख्याता तत्र सा शिवरूपिणी पशुरू
पोऽसमायाति पविचारगणैः सह ६४ कौलेति कौलाः कुलाचारिणः तत्र साधुयत्प्रत्य
यः यद्वा कोलो वराहः कोलः क्रोडः सूकरः स्याद्वराह इति हलायुधः तस्येदं कौलं तन्मा
से तत्र साधुः वराहाजमृगोद्भवमिति शिवोक्तयामलवचनात् यद्वा कोलं मरिचं तत्प्रत्ययात्
देवत् तदुक्तं डुर्गाकल्पे मरीचहोमात्स्मरणं विद्वेषो भ्रान्तिसर्वदा मरिचं कोलकं कृष्ण
मित्यमरः ५ कुरुकुल्लेति तथा च दक्षिणकालीप्रक्रम्य वीरचूडामणौ कालीक
पालिनी कुरुल्ला कुरुकुल्ला विरोधिनी मित्यादि यद्वा कुरुरुइति शब्दस्वरूपपरं तस्य कु
लसंघातो वीप्सयाद्विर्भावो यत्र कुरुशब्दद्वयोपेतो मंत्र इति यावत् तं लाति आदत्ते दे
वतात्मत्वेन पठेत्यर्थः कुलसंघातेऽत्यस्य भावो वा किपू बलिमंत्रस्य कुरुपदद्वयघटितत्वा
दित्यर्थः ५। कपालिनीति उक्तदेवतास्वरूपत्वात् कं सुखं ब्रह्मादीन्वा पालयतीति
वार्थः यद्वा कं सुखं याति रक्षति कपः आली हस्तिका यस्याः इति पंचम्या बहुव्रीहिः कोद
न्तात्समासान्ताभावः आलिद्वयोंति हस्तिके इत्यमरः आलमनर्थो वास्या लीति दारि ६५

65

स्वमी वृश्चिकभयनाशिकेतियावत् तदुक्तं ब्रह्मसंहितायां वृश्चिकालोकनाजातेक्रूपे
न्मंत्रमनन्यधीः सर्वोंकारोस्तदाजप्यात्तस्यानेकरमर्दने हरीभवतितत्सर्वं सर्वेश्वरीप्र
सादतः ५२ विपरीतकदलीजंघेति यथास्थितकदल्याश्चाधोवच्छेदेनपीनताभवतीति
विपरीतेत्युक्तं अतएवनैषधीये विधानमूर्ध्नानमयमरंरवेन्न्यचेतयोगिश्वमसारभावं
जाड्यंचवनीचेत्कदलीवलीयत्तदायदिस्यादिदमूरुयुग्मं यद्वादिःपदाकदलीहरिणा
विशेषः सर्वोपलक्षणार्थः जंघापदमपिमांसमात्रोपलक्षिणं यद्यपिकदलीकं
दलीचीलइत्यमरव्याख्याने इत्येनतमितिक्षीरस्वामिनोक्तं तथापिकदलीवैजयंत्योवरं
भायांहरिणंतरेइतिविश्वदर्शनात्ग्रहणेननदोषः यद्विहरिणपोरुपादानेवजलचरस्या
प्युपलक्षणार्थं तदुक्तं मांसंतत्रिविधंदेविजलखेचरभूचरं त्रिविधंमांसकंप्रोक्तंदेवा
नाप्रीतिकारकं ५३ रंभोरुरिति रंभावदूरूयस्याः ऊरूत्तरपदादौपम्येइतिऊङ्प्रत्य
यः यद्वारंभोरुरितिच्छेदः रंभाऊरूप्रियतेनमहनीयस्याः रंभाजातीवीजपूरश्चगोधिया
रिमिश्रेणेतिश्रीध [illegible] दयादरूप्योवविशेषतः इतिमत्स्यसूक्तात् कादलीफलहो

न॰र॰
टी॰
६६

मेनदेवी संतुष्यते तस्मादिति वीरचूडामणिवचनात् यद्वा तद्वते जपादिविधानात्
तदुक्तं समयाचारे जपस्थानानि देवेशि सिद्धतीर्थानि यानि च सिद्धपीठे सिद्धक्षेत्रे गु
रौ देवालये तथा वटवृक्षे बिल्ववृक्षे रम्यायां विपिनेऽपि वा नदीतीरे चतुष्कुर्याद्गुहा
पर्वतमस्तके ५४ रामेवल्लभेति भार्गवाराध्यत्वात् अथवासीनात्वात् चित्रकू
टे तथासीनेति पूर्वोक्तमात्स्यात् यद्वा बलस्यसहोदरात् भगिनी बलदेवस्येति ह
रिवंशगात् ५५ निष्पापचरीति तथा च नागरखंडे निशीथे तिभूता निष्पापकाय :
मूलमृषयः अन्तस्थावत्तुर्दशयां सतां सत्पूजनं भवेदिति शिवरात्रिकल्पे रात्रावेव महा
पूजाकर्तव्या वीरवेदिते दक्षिनेत्रोत्तरे वीरपूजा महे पूजानियामिन्याः प्रहरे गते इति वीरचूडा
मणौ यद्वा पूर्णेतन्त्रकरणे निष्पूर्वात् स्मादातश्चोपसर्गे उत्प्रत्यये ऽपि इति सूक्ष्मतया
चरतीत्यर्थः अणोरणीयानिति श्रुते ५६ निष्पापमूर्त्तिरिति निष्पापस्य ब्रह्मणो मूर्त्तिर्यस्याः
प्रपामतत्वात् रात्रिरूपत्वाद्वा दिवसो जः शिवानिशेति लिंगपुराणोक्तेः अजोऽहमत्र
र्थः यद्वा णिशामसमाथोऽइगुपपक्षत्वात् कः अविद्यमानाम् निर्मोहो यस्यां सा ऽमूर्त्ति निशा ६६

नोसमादितानाममूर्त्तिरितितत्सुरूपः समाधिगम्यत्वात् ५७ निशाचंद्रसमप्रभेतिदि
नेचंद्रस्यनिःप्रभत्वान्निशोत्सुकें यद्वानिशाहरिद्रा चंद्रःसुवर्णं निशादारुहरिद्रायांसा
त्रियामाहरिद्रयोरितिविश्वः समस्तेकोवनेचंद्रेचंद्रस्तुमृगलांछनेइतिधरणिस्ततः हरि
द्रारसेनप्रयोगार्थ्यंमंत्रस्यसुवर्णशलाकयावमंत्रस्यलिखनविधानात् तथावफेत्का
रिण्यां वर्णस्यनिलिखेन्मंत्रंत्वारउक्तहरिद्रयेत्यादि तथा सुवर्णेवाथवाभूर्जेरौ
प्येवाप्यथसुखने विलिखेद्विमलेखनावाहरोपसमन्वितं ५८ चांद्रीति चंद्रस्यसुवर्ण
स्येयं तामेवचकानिदंयंत्रेसुवर्णजंशत्रुनाशनमित्युक्तेः यंत्रदेवतयोरभेदस्योक्तत्वात्
यद्वाचंद्राधिदेवतात्वात् भास्करस्यगुरुर्विषाडमोचशशिनस्तथेति ग्रहाधिदेवतोक्तौ
मत्स्यपुराणात् ५९ चंद्रकलेति भक्तानामाल्हादकत्वात्मडपवादः यद्वा अमृतामान
सीतुष्टिःपुष्टिःप्रीतिरतिस्तथा ह्रीश्चश्रीश्चस्वधारात्रिर्ज्योत्स्नाहैमवतीतथा छायाचपू
र्णिमानित्यात्वमावास्याचषोडशीतिशास्त्रात्वर्णेवाप्युक्तषोडशेंदुकलात्मकत्वात् अथवा
कामप्रशस्तोक्तचंद्रकलाविचारवत्त्वीणांद्रावणहेतुत्वात् कंदर्पसदृशास्त्रीणांयेनदेवी

तं॰ रा॰
टी॰
८७

समर्चितेतिकुमारीतंत्रात् ८० चंद्रेति चंद्रोस्यस्यावामनेत्रस्यतद्रूपत्वात् यद्वाचंद्रोमस्त्वेसा
प्यवसानलक्षणमश्रयणात् सोस्यस्यास्तद्दर्शितेजपविधानात् यथोक्तं स्थानथाविंवमिति नी
लतंत्रेपश्यश्चंद्रेनमस्त्वेवाख्यानात् ८१ चारुचंद्रसमप्रभेति कर्पूरमिश्रितैस्तोयैर्मासमात्रेहि
तर्पयेत् वशीकृत्यनृपान्सर्वान्भोगीस्यायावदायुषमितिनीलतंत्रोक्तेः ८२ स्रोतस्विनीति
स्रोतस्वतीह्रीपवतीतिनदीपर्यायेष्वमरः तत्रस्नायनविधानात् यथोक्तंभवतारिणीश्म
न्यालयेप्रमपूजनेनदीतीरेऽस्यार्थ्यवर्णकृतेः ८३ स्रोतस्वतीति स्त्रइतिसकाररेफयोः
स्वरूपं श्रोतंतत्त्वस्वयः तेवातिप्राप्नोतिस्रोतस्वतीऽइतीत् इतिव्यंजनस्यदकारस्यचग्रह
णं तेनवध्रूवीजलाभः सकारोनन्तरंतकारस्तदनंतरंरेफईकारश्चेति वध्रूवीजया भृगुराषा
ढीशोवामाक्षीदिवास्वरोपांत्यसंयुतमित्याथर्वणोक्तेः भृगुःसकारः आषाढीशस्तकारः
वह्निरेफः इंदिराईकारः स्वरोपांत्योनुस्वारः प्रत्येकवीजानामपिमंत्रतस्मरणात् ८४
सर्वदुर्गतिनाशिनीति दुर्गतिर्दारिद्र्यंरोगादिकंपापादिकंच तारिणीमंत्रोपासकाविरा
यान्सवागीशोभवति सर्वैश्वर्यवान्भवतिसर्वासंपदमीष्टे इत्याथर्वणब्राह्मणात् ८५

67

68

सर्वाधारेति सर्वेषामाधारोऽस्याः अन्यथास्थितासंभवात् आधारपदं भावप्रधानं सक
लनिष्ठाधेयतानिरूपिताधारतावतीति यावत् यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः स
ह प्राणैश्च सर्वैरिति श्रुतेः ६६ सर्वमयीति जगदभिन्नोपादानत्वात् नेह नानास्ति किंच
नेति श्रुतेः ब्रह्मैवेदं सर्वमिति श्रुतेश्च ६७ सर्वानंदप्रवर्द्धिनीति अद्विवेयनेभावेधञ् अं
दोवेषः तस्य भावोऽनंदः मुक्तिरिति यावत् सर्वेषां तं प्रवर्द्धयतीति तया जीवन्मुक्तो भव
तीत्याथर्वणात् ६८ सर्वचक्रेश्वरीति तत्तद्देवताप्रकृतिभूतत्वेन सकलयंत्राणामधिष्ठा
तृत्वात् अतएव समस्तचक्रेषु पूर्णा सर्वविद्यास्वरूपिणीति प्रार्थनमंत्रलिंगं यद्वा सर्वत्राप्रतिह
तत्वात् एषसेतुर्विधरणएषांलोकानामसंभेदायेतिश्रवणात् चक्रेशब्दस्याज्ञार्थ
कत्वात् प्रवृत्तचक्रताऽप्रतिहताज्ञत्वमिति विज्ञानेश्वरव्याख्यानात् ६९ सर्वेति असं
कुचितसर्वत्वपदेन वस्तुमात्रतादात्म्यं बोध्यते ७० सर्वमंत्रमयीति तथाचमुंडमाला
यां यानारायपरमाविद्यावतङ्गीकथिताश्रुता एतस्याः भेदभावेननानामंत्राभवंतिहि
सर्वस्वनीरूपताद्या ७१ सहस्रनयनप्राणेति तथाचकूर्मपुराणे एतावड्काविंश

नेदंतावद्धिमवते स्वयं स्वरूपंदर्शयामासदिव्यंतत्पारमेश्वरं इतिप्रक्रम्य सर्वतःपाणिपादां
ना॰र॰ तंसर्वतोक्षिशिरोमुखामित्यादि ७२ सहस्रनयनप्रियेति इंद्राराधितत्वात् तथाचभारते
टी॰ दिक्पालैर्लोकपालैश्च प्राकाश्येविबुधेश्वरैः स्तूयसेत्वंमहाभक्त्यानित्यंत्रैलोक्यवंदिते मु
९८ डमालायां भुवनेश्वरीमहाविद्यादेवराजेनवैपुरा आराधितेत्यादि यद्वा तत्रैवत्वांभगिन्य
र्थेग्रहीष्यंतिसवासवाइतिहरिवंशोक्तेः एतत्कवचप्रस्तावे यक्षाधिपःकुबेरोपि देवाः
धिपःशचीपतिरिति भैरवीतंत्राच्च ७३ सहस्रशीर्षेतिउत्तमांगंशिरःशीर्षमित्यम
रः कूर्मपुराणेदेवींप्रतिहिमवदुक्तेः सहस्रमूर्द्धानमनंतशक्तिं सहस्रबाहुंपुरुषं
पुराणं शयानमंतःसलिलेतथैवनारायणाख्यंप्रणतोस्मिरूपं सहस्रशीर्षापुरुषः
सहस्राक्षःसहस्रपादितिश्रुतेरीश्वराभेदोक्तेः अत्रादिपदंज्ञानेंद्रियाणां पादपदंच ७५
कर्मेंद्रियाणामुपलक्षकमितिमंत्रभाष्यकाराः मंत्रांतरमपि विश्वतश्चक्षुरिति
सुमनाइति शोभनंमनोयस्याः स्वाराध्यत्वात् यद्वासुमनामालतीजातीत्यमरः
सास्त्यस्याइतिमत्वर्थलक्षणयाप्रयोगः होममप्रकरणेमल्लिकाजातिपुंनागकदंबैः ९८

68

पुष्टिमाप्नुयात् इति सिद्धसारस्वतवचनात् ७५ सद्मेति दमयति पुरादिगणेनोदना
र्थः भावबुद्ध्युत्पादपापापनोदपरं वत्साद्दिमं तत्कारणत्वात् यद्वा स्त्रेभः शब्दः स्त्रेमि
भूषनाविति कल्पद्रुमपाठात् विद्यमानः सद्यस्याग्रदहानिपतत्वात् ७६ सर्वभ
क्तिकेति तथा वक्ष्यमपुराणे हिमवदुक्तिः दंष्ट्राकरालं त्रिदशाभिवंद्यं युगान्तकालान
लकल्परूपं अशेषभूतांडविनाशहेतुं नमामि त्वं पनवकलसंज्ञे ७७ षष्ठिकेति ष
ष्टीपवष्ठिकाजन्मदानाम्नी देवतेत्यर्थः यद्वा षष्टिकाधान्यविशेषा मंत्रसाधने भोज्य
त्वेन संत्यस्याः षष्टिका षष्टिरात्रेण पच्यंते इति निपातः हविष्याशी मुक्तकेशो जपपाद
युतमादरात् गद्यपद्यमयी वाणी तस्य सर्वविद्या भवेदिति मन्त्रमहार्णववचनात् षष्टिका
कालरूपाकेचेति भविष्यपुराणोक्तेः यद्वा षष्टिसंख्यायाकेशिरः तदधिकापह्नः षष्टि
संख्येतियावत् साहल्पस्याः समवायसंबंधेनेत्यर्थः तावत्संख्यदेवीविशेषरूपत्वात् त
थाच कल्पतरौ देवीपुराणे ब्रह्म ·· शिवस्यैवानो विद्यते शक्रपूजने त
थावानेनपश्यामि वन्नषष्ठे स्तनपूजने अश्वमेधसहस्रेण वाजपेयशतेन च यत्फलं लभ

ता॰र॰
टी॰
६९

69

नेकर्त्तृफलेतत्स्थापनेस्मृतं इत्यादितं कलौयुगेमहाघोरेयर्मेवतमसाहते चतुःषष्टो
वकर्त्तृवाक्षुजावाङ्मायकर्मणेति ७८ षष्ठचक्रस्येति षष्ठंभ्रूमध्यस्थंआज्ञाख्यंचक्रं तत्रति
ष्ठतितथाकुंडलिनीरूपत्वात् यद्वाश्रीचक्रेषष्ठचक्रस्यप्रणकत्वात् तत्स्यतंतदधिष्ठात्
त्वात् तदुक्तंनवरत्नेश्वरे बौद्धंब्राह्मंतथासौरंशैवंवैष्णवमेवच षडंकेषष्ठेघविज्ञेयंच
क्रेषड्दर्शनात्मकीमिति ७९ षड्वर्गफलदायिनीति षड्वर्गस्य संधिनोविग्रहोयान
मासनेद्वैधमाश्रयइतिषड्गुणात्मकस्य फलंददातिस्यातुकूल्येनतस्यफलजनकत्वा
त् यद्वा कामःक्रोधस्तथालोभोमोहोमानोमदस्तथा षड्वर्गमुत्सृजेदेवंतस्मिंस्त्यक्तेसु
खीनृप इतिसारोक्तस्यफलमनिष्टघातिखंडयतितथा यद्वा षस्मांगवावर्गो ज्योतिष्टो
मादौसवनत्रये दध्यर्थंषस्मांषस्मांगवांदोहविधानात् षड्वर्गीयदंनैवतत्रयाज्ञिकव्यवहा
रात् तत्संबंधियागानांफलंसम्पन्नयाददातीत्यर्थः तदुक्तंकालीकुलार्णवे समेधमपाईस
व्रतीसमन्यासीसदीक्षितः इतिप्रक्रमयपनोवेतितततः ८० षड्विंशापद्ममध्यस्थेति
विप्राशाद्वेत्रब्रोदसतयाप्राख्यानः प्रेतान्यचायजेततयावाविंशांत्सख्यायरः षड्गुणाविं ६९

शतिदि मध्यमपदलोपिना विंशात्युत्तरशतको लाभः तावत्संख्यगतमुपलादितेन पत्पर्यंतत्व
श्वेति हृति कुंडलिनीरूपत्वात् हृत्पद्मेहि पंचभूतक्रमेण कुंडलिनी त्रिंशात्युत्तरशतप्राण
संख्यया पूर्वपद्मे गच्छति तथा च यामले षेचभूतात्मकं सार्द्धत्रिंशत्पष्टि खेनंदव स्वसूर्या
खतिथिप्राणान्युत्क्रमेण प्रयात्यसौ ८१ षड्विंशदलमध्यगेति षड्भिर्भक्ताविंशादिति श्री
णिलभ्यंते तथा च त्रिवारंहृत्पद्मदलचारिणीत्यर्थः एकदिने निशि हृत्पाकुंडलिन्याहृद
येधारप्रसिद्धेः एकैकास्मिञ्शरीरे सप्तसहस्राणि शतद्वयं च प्राणा भवंतीति त्रेगुहाय षट्
शताभ्यधिकैकविंशतिसहस्राणि प्राणा जायंते तथोक्तं यामले एवमष्टदलेचैव भ्रमात्स
मसहस्रकाः विंशतिं अभ्यधिकाः प्राणा जायंते वीरवंदिते एवं परिभ्रमात् स्याक्षिराह्नमा
दिवानिशं षट्शतान्यधिकान्येकविंशत्सहस्रसंख्ययेति ८२ हकारवर्णनिलयेति
ह एव हकारः वर्णनिर्दिष्टो वर्णोत्कारः स एव वर्णश्चतुर्थी यत्र तादृशं मूलाधारपद्मंनि
लयश्चाश्रयो यस्याः यद्वा हइति सरूपपरं कशब्देन ग्रथिवाख्यानात्तृतीयग्रहणं श्रुत
क्रमगणनयात्तृतीयश्चाकारो यस्मादिति काशब्दे नईकारग्रहणं रइति रेफग्रहणं

ता॰र॰
टी॰
७०

तथा च हकारेकाररेफे यथा प्रागुदितो मायाबीजरूपो यो वर्णस्तदाश्रया तस्य शक्तिरूपत्वात्
अत एव प्रपंचसारे स्य जगन्मूलते ऽकं ऊकारान्तास्तकाराद्याः षड्वर्णाः षडङ्गा एव च प्रभेदेभ्यः स
मुत्पन्नाः हकारस्य महात्मनः लृकाराद्याश्चत्वारो रेफोत्थाल्लृपतस्मृताः एकारादिविस
र्गान्तवर्णानां षडङ्गसम्भूते ईकारस्य षडंगेभ्यः इतीदं षोडशांगवत् यस्य संस्थितवंगेभ्यः स्व
राः षोडश सर्वशः तेभ्यो वर्णान्तराः सर्वे ततो मूलमिदं विदुः गतो ऽतो बीजनामेष प्रा
णिषु चैव व्यवस्थितः ब्रह्माण्डं यस्तमेतेन व्याप्तं स्थावरजंगमं ८२ हकारान्तरभूषितेति
हकारोपलिप्ततन्मध्ये क्रोधबीजं तेन भूषिता कश्याः तत्सुकृतत्वात् तदधस्ताद्बीजयु
क्तवत्कालकर्णोपरामिति तत्र चूडामणिवचनात् यद्दोकारीत्याहूंकारयुक्ता यो सविक
त्रीरूपे देशे उषिता स्थिता तदुक्तमाथर्वणे तस्योपरि ततो ध्यायेत्कत्रिंकाबीजभूषिता
तस्योपरि महाविद्यां खर्वां नीलघनप्रभां ८४ हारिणीति महापद्माख्यनागमयो हारो
स्त्यस्यास्तथा महाहिपद्मो हृदि हारभूषणमित्युपनिषद्दर्शनात् ८५ हरवनितेति ह
रंति दुर्गतिमिति हरा वनिताः स्त्रियो यत्र महाचीनद्रुमलतावेष्टितसाधकोत्तमः ता ७०

70

त्रो यदि जपेन्मंत्रं सैव कल्पलता भवेत् इति नीलतंत्रोक्तेः ८६ हारहीरकभूषितेति हारका
णां हार इति राजदंतादित्वात्परनिपातः केवलहारशब्दस्य मुक्तावलीमात्रवाचकत्वमिति
वामनादिभिरुक्तत्वात् नानालंकारभूषितामिति फेत्कारीये ८७ ह्रींकारबीजसंज्ञिते
ति बीजांतःकर्मधारयः देवतायाः मंत्ररूपत्वेन तत्साहित्यं प्रथमं भुवनानामुद्धरेदित्या
थर्वणश्रुतेः अथवा मंत्रे आदौ तद्योगस्मरणं .... महाविद्याः मायाद्यास्सक
ले इदेतिमत्स्यसूक्तात् ८८ ह्रींकारैकरूपशोभितेति तद्बीजयुक्तनानाविधमंत्रैः शोभि
तांतदेवतात्वात् नववर्णसमुदायात्कथंकारप्रत्यय इति वाच्यं उच्चैस्स्वरो वा वषट्कार इति
ज्ञापकात् अत एव श्रुतपथे श्रूयते वाचं धेनुमुपासीत तस्याश्चत्वारस्स्तनाः स्वाहाकारो व
षट्कारो हंतकारः स्वधाकार इति तस्यै द्वौ स्तनौ देवा उपजीवंति स्वाहाकारं च वषट्कारं
च हंतकारं मनुष्याः स्वधाकारं पितर इति ८९ अत्र भगवत्या मातृकारूपत्वात्ककारादि
क्रमेण नामान्युच्यंते कंदर्पकलेति कामबीजस्वरूपत्वात् मत्स्यरवाला मंत्रबीजानां प्रत्येक
मपि मंत्रतत्त्वश्रवणात् तथा च प्रपंचसारे रक्ता कल्याहणनरडक्रूलाञ्जवालेयहृद्योमोनी

स्ता.र. टी. ७१

भूमशानिमग्नविनिविष्टोजपेल्लक्षमेकं वीजंमंत्रीव्रतिपतिमयंप्रोक्तहोमावसाने यो
सौलोकेसस्वरमनजैसेवतेष्वन्पतेव ग्रथ्यवाः स्वाध्वमेदेषुतद्वीजयोगात्‌ तथाचतंत्रांत
रे वाग्भवेस्तवनेशानीकमलामीनकेतनइत्यादि तृतीयककवचास्याणिरतीशोवाग्
भवांतिमत्युत्पादिवितत्रतत्रदृष्टव्यं यद्वा कामकलात्मकत्वात्‌ तदङ्केहानार्णवे ददपा
दादिमूर्द्धांतंवामपादादिहृदरि पादांतंपूजयेत्सर्वाः कलायैकामसोमयोः ९० कु
ल्लेति कुल्यःकुलोद्भवेमान्येश्रुतिविश्वः कौकंसङ्कुल्यमास्यिवेस्मरः तदस्यस्याः
ग्रास्थिभूषणत्वात्‌ जपेत्तन्मालाविधानाद्वा महाशंखस्यापिनद्धिशेषत्वात्‌ सौका
योर्थस्थानेतरस्याप्यस्थिग्राह्यमितिटीकाकारोक्तेर्वा यद्वा जपस्थानेमहाशंखनिवे
शपोर्द्धंजपेद्वरेदितिवचनात्‌ कुल्लेति लकारद्वयपाटेनदेवतारूपत्वात्‌ कालीकपा
लिनीकुल्लामित्यादिसर्वोक्तवीरचूडामणिस्मरणात्‌ ९१ कौलिकेति कोलोवराहः
सोस्यास्यकौलिकंतद्रुधिरमर्थात्‌ तस्यबलौतर्पणीयत्वात्‌ हास्यसारस्यरुधिरैः सूक
रस्यवपुःशोणितैः प्राप्नोतिसततंदेवीतृप्तिंद्वादशवार्षिकीमितिकालिकापुराणवचनात्‌ ७१

यद्वाकुलेनघादितीरेषु स्थिताःकुलिकाः अत्रइतिठनाविनिठन् तेषामियंकौलिकीतत्
स्थानेजपादिकर्तुर्हेम्यतिप्रसन्नत्वात् तदुक्तंमुंडमालायां नदीतीरेबिल्वमूलेश्मशाने·
शून्यवेश्मनि महालिंगेपर्वतेवायत्रवासात्मनोलयः ५२ कुलतर्पिकेति वेशांतर्पय
तिप्रीणयतीत्यर्थः मंत्रस्यज्ञानमात्रेणकुलकोटिं नंदंतिपितरःसर्वेगाथांगायंतितेम
देतिकालीकुलार्णवोक्तेः यद्वा तृप्यतिकर्त्तरिरावल्कुलद्रव्येणात्मत्वात् कुलद्रव्यैर्वि
नाकुर्याज्जपपूजादितपोव्रते निष्फलंतद्भवेद्देविभस्मनीवहुतंयथेतिवचना ५३ केतकीकु
सुमैः सिद्धाविटकावारिधेस्तटे इतिकाम्यकल्पेकादिमतात् यद्वा मासिभाद्रपदेपूज्या
केतकैःशंकरप्रियेतिविशाखिदत्तात् ५४ केतकीदलभूषणेति केतक्याःसहोरोत्पत्तेः
पूर्ववत्पूजयेस्त्रियं उपपातकसंयोग्यमासमात्रेणनाशयेत् इतिज्ञानार्णवात् यद्वा
कोविहिःतेन्यस्तंप्रामंकेजलं केतकं तत्प्रसादकमितियावत् ततस्तदित्वतीतिकपडोता
त्मावेक्षिपू दलनेदलः यज्ञैर्ककविधानेनस्वभूरुत्पत्तिस्थानं उषःणोमरिवंयस्याःत
न्निश्रोत्मजलतर्पणस्यशत्रुनाषाहेतुत्वात् मरिवमित्रिशैरसतोयेःशत्रुंविनाशयेदि

ना॰र॰
टी॰
७२

न्ति नीलस्रैतेत्र्यात् ९५ केतकीकुसुमासक्तेति केतयति भावप्रकाशाद्यागाद्धृहर्षं संकेत
यतीति ख्यातस्मात्केतकीपदे स्त्रीपरं तस्याः कुसुमे आसक्तेति परमार्थः यद्वा भविष्यपुरा
णे दुर्गामुद्दिश्य यः पेयं प्राशि केतकवासितं यः प्रयच्छति राजेंद्र सगणाक्षिपतिर्भवे
त् प्राश्य कर्पूरं ९६ केतकीपरिभूषितेति परिभवति तिरस्करोतिपरिभूः केतक्या
स्तिरस्कारकोरुद्रः केतकीवातिमुक्तं वेति लिंगपुराणे शिवपूजायां तन्निषेधात् तत्रउषि
नेति तिनादात्म्याभिप्रायमाधारत ९७ कर्पूरपूर्णवदनेति कर्पूरशाकलोन्मिश्रतांबूलपू
रितानवनामिति श्रीविद्याध्यानात् यद्वा तांबूलं च सकर्पूरं नारिकेलं सशर्करमिति नै
वेद्यप्रक्रमे कुमारीतंत्रात् ९८ कलाताथसमप्रभेति तथा च याज्ञादिश्रुजिनैतद्विद्याभेदानु
क्ता तंत्रांतरे कर्पूरेंदुनिभां सितांबरपुगांरलोल्लसद्भूषणामित्यादि ९९ कलेति वस्त्रा
दिकलात्मकत्वात् यद्वा चतुःषष्टिकलाभिज्ञत्वात् चातुर्यौदार्यदाक्षिण्यकरणान्विता
मिति हृतीप्रस्तावे उत्तरतंत्रात् १०० वाक्यप्रमाणपदसागरपारगस्य लक्ष्मीपराभिषवु
यस्यानन्तभवेन विश्वेश्वरेण विहिते गिरिजाभिधाप्पीविताम णवजनिसत्तमकोमयूषः वि ७२

72

चित्रनानाविश्ववाग्विलासैर्विजृंभते यापि तु षां मुखाग्रे ब्रह्मस्वरूपा त्र सरस्वती सां विभावयं
तीभवतोस्तु भवं अथ सप्तम शतव्याख्यांते केलिप्रियेति विपरीतरतां तत्र कालिकाहृद
ये पराति वीरचूडामणिवचनात् अथवा इतीरूपतात् सीत्कारीमंत्रतपस्तु वचने स्तवनं
भवेत् नात्वदं चूतलतादीनि पुष्पाणि विविधानि चेति ज्ञानार्णवात् १ कीर्णेति भावे कः प्रत
यः केपुष्पैर्दानदस्यस्याः कंपलवदोनां योसौ मुक्तकेशीव तु भजामिति कालीतंत्रात् २
कदंबकुसुमोत्सुकेति कदंबैः खेतकुसुमैः कुंकुमैः कांचनैस्तथेति नारिणीतंत्रात् यद्वा
सरस्वत्यां तद्धोमविधानात् कदंबकुसुमैः स्यान्न फलैः श्रीहृत्संभवैः अविरात्प्रियमाप्नो
ति वाचं कुंदसमुद्भवैरिति वचनात् अथवा कंदजातिपुष्पाभ्यां कुलद्रव्यैः शिवां यजेत्
मासेन सिद्धाः यद्विप्यः प्रत्यक्षा वांछितप्रदा इति कादिमतात् ललितारूपेणैवायं
यद्वा कदंबैः पुष्टिमाप्नुयात् इति ग्रंथैर्व होमविधौ सिद्धसारस्वतात् मासत्यामहतीप्रज्ञा
कदंबैः कालवंचनमिति वीरचूडामणिवचनात् ३ कादंबिनीति तद्वत्कुसुनात् का
दंबिनी मेघमालेत्यमरः अथवा कादंबः कलहंसः स्यादित्यमरः सोस्त्यस्याः हंसवा

ता॰र॰
टी॰
७३

73

हननात् तथ्यस्वतारामंत्रभेदप्रकरणेतंत्रांतरे त्रिविधंध्यानमाख्यातंसृष्टिस्थितिलय:
क्रमादितिप्रक्रम्यप्रथमेध्याने शाद्ङ्गंमोनिधिमध्यस्थाहंसयानेविचिंतयेत् ४ करिग
तिरिति करिगतिरिवगतिर्यस्या: उपमानपूर्वपदोवहुव्रीहिरुत्तरपदलोपश्चेतिवार्त्ति
कं कविगतिरितिपाठांतरेकवितुजननीत्यर्थः यद्वा कवय:क्रांतदर्शिन: तेषांगति
र्व्रह्मरूपतयातत्प्राप्यत्वात् ५ कुंजरेश्वरगामिनीति इंद्राणीरूपत्वात् शाक्रीगजा
सनाकार्यावज्रहस्तासहस्राभेनेति वत्त:षष्टिरूपोक्तौदेवीपुराणात् ६ इतिककार
प्रज्या खर्वेति खर्ववांसहस्राणामितितंव्रह्मसंहितोक्त: अथवा खदितिप्रत्याहार: पाणिक
प्रसिद्ध: तत्रवातिगच्छति स्वनामघटकतकारस्यतत्रांतर्भावात् ७ खंजनप्रख्यलोचने
ति खंजरीटस्तुखंजन इत्यमर: तत्तुल्यनेत्रा यद्वाखंजनस्यप्रख्यापकंप्रायकंलोचने
प्राणहंयस्या: तत्प्रख्यवान्यथाहइतिजैमिनिसूत्रेतथार्थदर्शनात् खंजनेपिखरत
येतिनीललनेत्रोक्ते: स्त्रीनेत्रंदृष्ट्वाजपंकुर्यादित्यर्थ: ८ खगमस्थिनेति खग:सूर्येग्रहेदे
वेमार्गणेचविहंगमेइतिविश्व: चंद्रसूर्याग्निभेदेनत्रिलोचनसमन्वितामितितारिणीतंत्रा ७३

त् अथवाम्भूमिन्नपेक्षुकहस्तत्वात् वेषव्याल्पअवेवुथुकललितकरा प्रोल्लसन्नीलोत्पला
चेति प्रपंचसारात् यद्वा बाणहस्तत्वात् महिषमर्दिन्यां नीदृशां बाणां गदा शक्तिं वामतोपि
निवेयदिति मत्स्यपुराणात् ८ खद्योतद्भवङ्कलेदेति तेजसा सूर्यवद्दर्शनात् अत्रेऽइव
पदेन समासो वोध्यः तथानामत्रसतर्थ्यंतत्वेपि खद्योतपदस्य न विपरिणामः प्रातिप
दिकार्थप्रकारकवोधमात्रेतात्पर्यात् अतएव हरीतकीं सुत्त्ववानन्मातेव हितकारिणी
मित्यादौ तथा दृष्टं तद्वत्याकरे स्पष्टं ९ खद्योतद्भवचेवलेति खद्योतो ज्योतिरिंगणइत्य
मरः स्त्रीरूपत्वादिदं वोध्यं १० एकाक्षरेत्यगयेति गयाख्यस्यास्य आश्रयत्तयेति भावः गया
यो मंगला नामेति मत्स्यपुराणात् तथाव गयासुरशरीरस्थैर्याय गाप्यर्थं ब्रह्मादीनां तदा
क्रमणोक्ति प्रसंगे वायुपुराणे लक्ष्मीः सीताभिधानेन गौरी च मंगलाह्वया ११ गदेति
वैस्नवीरूपे तदायुधत्वात् अथवा गदो भ्राता विविस्नोस्यादिति विश्वः सोस्त्यस्याः एका
नंशास्वरूपेण तद्भगिनीत्वात् यद्वा बाणासिकुलिशंगदेति नवार्णमंत्रध्यानात् १२
गुणप्रीतेति गुणेन नंद दुहिता वा रपालनरूपेण तुष्टत्वात् १३ गीतवाद्यप्रियेति यद

स्वरतालात्मकं गांधर्वं मार्गादिकं गीतमिति स्वामी वाद्यवीणादिकं च प्रियं यस्याः
ता॰र॰ टी॰ ७४ तथा च संगीतशास्त्रे शिवशक्तिसमायोगाणां संभवो भवो भवेत् पंचाशात्स्वरागास्तु :
षट्सहस्रं तु गिरिजामुखात् प्रपंचसारे तथा त्सर्वाणि विद्यानि दिव्यं विज्ञाय यत्नतः १६ ग
तिरिति गतिर्स्त्रीगैर्दशायां च ज्ञाने यात्रामभ्युपाययोरिति विश्वः ज्ञानरूपताज्ञत्वदात्री
चेत्यर्थः यद्वा गतिर्मार्गरूपा स्वर्गापवर्गोभयप्राप्तिहेतुत्वात् १७ गणेश्वरीति गणेश्व
रो महादेवः तु योगे ङीष् गणानां गंधर्वादीनां मातृगणादीनां मातृगणादीनां वा गण
वलिभागिन इत्युदयनाचार्याः १८ गणे ज्येति गणशब्दोऽत्र आदित्यविश्ववसवस्तुषिता
भास्वरानिलाः इत्यादिरमरः एते द्वादशतादिना संघेन युक्ता गणदेवता इति स्वामी
भारते शृणु यसेरिति प्रक्रम्य स्वर्गेष्वमरनाथेंद्रैर्गंधर्वकिंनरैः विद्याधरगणैर्दि
व्यैर्दैवैश्चाप्सरसां गणैः आदित्यैर्वसुभिः साध्यै रुद्रैर्भ्यां विश्वनायकैः मुनिभिर्वाल
खिल्याद्यैः पुराणऋषिसत्तमैः १९ गणपूज्येति संघाते प्रथमे गण इत्यमरः गणैर्वि
समस्तैः पूज्या तत्र पुरश्चरणविधानात् अष्टमीसंधिवेलायां महोत्तरलनाष्टहे प्रविश्य ७४

मंत्री विधिवत्समभ्यर्च्य प्रयत्नतः पूर्वोक्तकल्पमासाद्य पूजादिकमथाचरेत् केवलंका
मदेवोसौ जपेदष्टोत्तरेशतं इति वचनात् २० गणप्रदेति गणं पुत्रादिकुटुंबरूपं ददाति
तथा अथवा गणं सैन्यविशेषं दैत्यानां समूहं वा प्रकर्षेण द्यति खंडयति छांदसत्वात्कप्र
त्ययः २१ गुणाढ्येति गुणैरुपास्यब्रह्मसंबंधिभिः पूर्णा २२ गुणसंपत्तिरिति भक्ता
नामनेकगुणसंपत्तिहेतुत्वात् यद्वा प्रधानेसंपत्तिर्धनादिस्वर्गादिरूपायस्याः मो
क्षपरमफलकत्वेनतस्याऽवांतरफलत्वात् २३ गुणदात्रीति भाष्यकारप्रयोगबले
ननिषेधस्यानित्यत्वात् षष्ठीसमासः इति कैयटादिस्थितेरत्रापि समासः २४
गुणात्मिकेति गुणीभूता आत्मानो जीवा यस्याः ब्रह्मस्वरूपत्वात् २५ गुर्वीति सर्वो
त्कृष्टत्वात् वोतोगुणवचनादिति ङीष् महत्त्वाद्वा गुरुर्महति वाच्यवदिति विश्वः
तथा च श्रुतिः ब्रह्मैवेदममृतं पुरस्तात् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण अधश्चोर्ध्वं प्रसृतं ब्र
ह्मैवेकमिति २६ गुरुतरेति अतिशयार्थे तरप् अथवा पृथिवीरूपेण गुरुत्वाख्यगुण
युक्तत्वात् यद्वा गुरुत[illegible]दः महत्तरो बलं यस्याः सर्वशक्तिरिति श्रुतेः २७ गौरी

ना॰र॰ टी॰ ७५

ति षोडशात्मकमेव देवतारूपत्वात् अथवाऽनवामरजा गौरीति अङ्गिरसस्मृते
स्तादृशाकुमारीरूपत्वात् यद्वा गौर्वाणी राद्भवे अर्थे रैविभवावपीत्यमरः गौश्चरा
श्चेति गौरी समाहारद्वन्द्वः एकवद्भावेन नपुंसकत्वेन ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्र
स्वः तस्यां पदात्वतस्मे वे येनेति अणंतान्ङीप् निवासः श्रीसरस्वत्योर्यत्र सा रस्वतो मन्तुः
इति पैकारीयवचनात् २८ गाणपत्यफलप्रदेति प्रथमेश्वररूपं फलं ददातीति गा
गा ऐश्वर्यं गणे श्रेनेति स्कंदपुराणात् पामागाध्वप्राप्तमित्यगुषगाः २९ गकारव
ज्या घर्मांशुगृहिणीति सूर्यरूपे गृहे आश्रयोऽस्यास्याः सूर्यमंडलमध्यस्थां ध्यायेद्दे
वीमसमभ्यसेदित्यादिना संध्यात्रयेध्यानभेदस्मरणात् यद्वा घर्मांशुपदं लक्षणयार्क
र्कपुष्पपरं अर्कषकभयेन तत्रावस्थानात् तथा च वामनपुराणे तद्भयान्नो विशाहो शीर
श्वेतार्ककुसुमेषु वि विजयाशालतागुल्मे संप्रयाता लयं मुने ३० घर्मेति घर्मः स्याद
तपे ग्रीष्मेऽप्युष्णस्वेदाम्भसोरपीति विश्वः गुणवचनां गुणिपरत्वेन तल्लिङ्गत्वावगमात्तीक्ष्ण
स्वभावेत्यर्थः ३१ घर्मसिंधुनिवासिनीति सिंधुः समुद्रेन यां च नदे श्रीभदानयोरिति वि ७५

घ्नः सिंदूरं गजमदः गजमृगमदकाश्मीरैर्मिश्रितमः सुरभिरोचनोपेतैः विलिखेद्दलकं कर
वल्लितैर्यंत्राणि सकलकार्यार्थीति प्रपंचसारात् २२ घर्घरेति अव्यक्तशब्दानुकरणमेतत्
घोराट्टहासारवेति फेत्कारीयं २३ घोरवदनेति ध्यायेत्कालीं करालास्यामिति कालीतंत्रा
त् २४ घोरदैत्यविनाशिनीति स्पष्टार्थं २५ घोषेति घोषश्चाभीरपल्लीस्यानंदगोपगृहो
त्पन्नत्वात् यद्वा घोषयति प्रसिद्धं करोति भक्तमिति पचाद्यच् अल्पतममपि विद्वांसं मानपि
ष्यतीति वा गिमिते हसतीमिवाचार्यपुष्पमेवत्तमन्नममित्युक्तेः २६ घोषवतीति वीणाह
स्तत्वात् प्रोक्ता घोषवती वीणेति हलायुधः तथा चैतद्देवे सिद्धसारस्वते नीलांबुकामर
णिमयीवकेरबुचीणामिति २७ धूम्रेति अरणिस्वरूपेण धर्षणयोग्यत्वात् तथा च ह
रिवंशे देवीप्रतिहस्मोक्तिः तापसानां च देवी त्वमरणी चाग्निहोत्रिणां २८ घोरस्वरीति
घोरे भीमे महारवे इति विश्वः तथा च कुलचूडामणौ स्वतः कार्यक्रमायत्रे भुवनेऽपि वर्तते
तां विना जनकः कोपि नैव कार्यविभावकः अतस्त्वमेव जननी नान्यस्तोपि कथं च नेत्या
दि २९ घनालयेति घनेस्याः कांस्यतालादिवाद्यमध्यमनृत्ययोरिति विश्वः तथा च

ता॰र॰ टी॰ ७८

संगीतशास्त्रे तकारेशंकरः प्रोक्तो लकारे पार्वती स्मृता शिवशक्तिसमायोगात्तालना॰
म्नानिगद्यते शृंगाहारे शिवः प्रोक्तो यनिल्लत्र शक्तिः सूक्ष्मयनिर्मता अतोद्वितयमेत
स्याशिवशक्तिसमभेदतः पुरावैतेविन्यसेदग्रेशिवतालेस्वदक्षिणे वामेशक्तिंततः कुर्यादा
यादादिक्रियाइति बकारप्रश्न्या चर्चरीति झल्लरीचर्चरीपरीति स्त्रीलिंगशेषेष्वमरः चर्च
रीहर्षक्रीडेतिसम्भ्रमादयः यद्वा रीङ्रवतेरे भावेक्विप् चर्चभर्त्सने यज्ञर्थकः अभि
भवस्परत्नणहेतुः इत्येश्वाख्यातेत्यर्थः श्रात्वा नराद्यन्तादिप्रत्यये ङीप् पचैरमभिभाव
नेतिफेत्कारिणीवचनात् यद्वापूर्वदेशप्रसिद्धदेवतारूपत्वात् यद्वावर्वेशाद्दोपालिसततना
मत्वात् चर्चिकेतिशुभनामयस्मादुपरिचर्चितेनिशागुरुवामनपुराणात् ७१ चाहनयनेति
अतिरोहितार्थमेतत् यद्वाचरोर्होमद्रव्यस्यनयनेप्राप्तिः तदेववाहनयनेस्याश्च ॰ एप्रत्य
यः तदस्त्यस्याः वह्निरूपत्वात्तदधिष्ठातृरूपत्वाद्वा यागप्रत्युदेश्यभूतत्वाद्वा ७२ चारु
वक्त्रेति स्पष्टार्थं स्वरूपतोभीमत्वेपिभक्तानामानंदजनकत्वात् यद्वाचारुवम्यंवक्त्रिक
ययनिचारुवक चर्चेर्विच् तेवायतेरवतीत्यर्थः परहृषणेषुमौनीतिफेत्कारिण्युक्तेः ७३ ७८

चतुर्गुणेति चतुर्षु युगेषु गुणाः प्रीतिप्रसादादयो यस्याः यद्वा चतुर्थे कलियुगे गुणाः य
स्याः वृत्तिविषये त्रिभागवत्त्वं व्योमशब्दस्य पूरणार्थत्वात् ४४ चतुर्वेदमयीति तथा च रुद्रयाम
ले ब्रह्मा पप्रच्छ देवेशं विष्णुं त्रिभुवनेश्वरं कस्याः विद्यां समाराध्य चतुर्वेदो निगद्यते विष्णुस्तं
प्राह देवेशं हरं पृच्छस्व शंकरं सरस्वती महाविद्या शिवदेहे प्रतिष्ठिता तस्य तद्वचनं श्रुत्वा
ब्रह्मा पप्रच्छ शंकरं कथयास्माद्देवेश नाम्ना नीलसरस्वती ब्रह्मणो वचनं श्रुत्वा प्रज
हास महेश्वरः शृणुष्वावहितो विप्र विद्यां नीलसरस्वतीं यस्याः प्रसादमासाद्य चतुर्वेदा
न्वदिष्यसीत्यादि ४५ चूर्णेति चूर्णं पटवासादि दन्तादशनिस्वाम्यादिश्याव्यानात् तदस्य स्याः तृती
यपत्वात् तथा चोत्तरतन्त्रे विलिप्ता रक्तगन्धेन रक्ताम्बरविभूषिता स्रगपि रक्तकुसुमा सर्वाभ
रणभूषिता सुधूपधूपिता तां तन्वी तु तीकर्मसु योजयेत् ४६ चन्द्रासेति कर्पूरेण होमविधा
नात् तदुक्तं नीलतन्त्रे कर्पूरागरुकाश्मीरकस्तूरीहोमतः पुनः मंत्री नीलसरस्वत्याः सर्वा
भीष्टमवाप्नुयात् ४७ चतुराननेति तथा च जलताराध्याने सिद्धसारस्वते उपाञ्चतुर्मुखव
हन्कविताप्रबोधं नीलां भजामि हृदये न सरस्वतीं तां ४८ चलच्चकोरनयनेति कर्मधार

यगर्भौ बहुव्रीहिः यद्वा चवन्‌ चकोरस्य पक्षिणो नयने प्राप्तणे यस्याः वलितेन दातव्येक्षैः श
शालिनि निरे मत्स्यां कलविंकं चकोरकमिति महाकालसंहितावचनात्‌ ४९ चलत्खंज
नलोचनेति पूर्ववत्समासः यद्वा चलनं गतिमत्तां खंजने खंजीकरणं गतिनिरोधकमि
ति यावत्‌ लोचनेन नमस्कारादिरूपज्ञानं यस्याः इति विषयतार्थकषष्ठ्यंतेन समासः देवेन्त
सस्य हानिः स्याज्जवहानिस्तु रंगमे इति फेत्कारिण्यादिवचनात्‌ ५० चलद्दंभोजवदने
ति यद्वा चलद्दंभसो महाजलप्रवाहस्य जवे वेगो बलिना प्राप्यति चलद्दंभोजवदः चोन
मस्कारो यस्या तथा च दक्षिणाद्ररमेव मुक्ताव्रज्ञसंहितायां जलाड्यं भवेत्तैव जगदंबा॰
प्रसादनः ५१ चलद्दंभोजलोचनेति तथा च सिद्धसारस्वते पद्मजपं तथा कृत्वा दक्षिणश्यामा
सितोत्पलैः श्राज्याक्तैस्त्रिकृपात्मंत्रीत दक्षांशेन तर्पयेत्‌ ५२ चकारप्रज्ञा छात्रीति
छात्रेण गुरुसेवालक्षणेन दस्यस्याली तिछात्रः शिष्यः तस्येयं गुरुं विनास्य ये ग्रहणानि
षेधात्‌ तथा च महोग्रताराकल्पे कल्पेटच्छात्रयस्तारोस्य नष्टग्रहणीयात्तापनाप्रिनी ५३
छात्रप्रियेति छात्रमात्र पत्रे प्रियेयस्याः तथा च ज्ञानार्णवे मुक्ताफलामलमणिस्फुर॰

छत्रेशाशिप्रभमित्यादि ५४ छत्रेति छेदनेछः तस्मात्त्रायते रक्षतीति छत्त्रा सर्वतो रक्षाहे
तुत्वात् ५५ छत्रचामरशोभितेति तथोक्तं ज्ञानार्णवे गंगातरंगधवले चामरद्वयमद्रिजे
भविष्यपुराणे दुर्गाप्रस्तावे दद्याद्देवाय चामरं मणिदंडविभूषितं हेमरौप्यादिकं दंडं तस्य
पुण्यफलं शृणु चामरव्यग्रहस्ताभिर्दिव्यस्त्रीपरिवारितः महाभोगविमानस्थश्चिरं भो
गेविमोपुरे वसेत् ५६ छिन्नेति सत्यभामा सत्येत्यादिवाछिन्नमस्ताशब्दे उत्तरपदलोपः
उक्तं हि महाभाष्ये विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपः इति ५७ छदिरिति छिन्नगलत
या रुधिरोद्गिरणात् छिन्नात्मीयशिरः समुच्छलदसृग्धारां पिबन्तीं परामित्यादिध्याने सद्यः छि
न्नात्मकंठप्रगलितरुधिरे डाकिनीं तर्पयन्तीमित्यत्र तन्त्रे दर्शनात् ५८ छिन्नशिरा इति
तत्रैव रूपे मूर्द्धरहितत्वात् छिन्नमस्तकं करे वामे धारयन्तीं स्वमस्तकमिति विश्वसारवचनात्
यद्वा छिन्नो शिरो दैत्यानां सेनाग्रभागो यया शिरः प्रधाने सेनाग्रभागमस्तकयोरपीति
विश्वः ५९ छिन्ननासेति छिन्नाद्दासत्वान्मध्ये विलक्षणीभूता नासा यस्या निर्यस्याः अ
थवा छिन्नो नासो मत्कानां हतिर्यया उभयत्र णमतुङ् रूपेणोणस्तङ्गः एतत्समाधानमिति कल्प

ता॰र॰ टी॰ ७८

डुमपठितात्भ्यांभावेधन् ८० छलानितेति भक्तानांतज्ज्ञानदत्वात् तस्यस्ववाक्येवर्जनार्थेम
पयुक्तत्वात् वचनविघातोर्थविकल्पोपपत्त्याछलंतत्रिविधं वाक्छलं सामान्यछलमुपचारछ॰
लंचेति नैयायिकसूत्रात् आद्यंयथानवकम्बलाभिप्रायेण नवकंबलोदेवदत्तइत्युक्तेनास्य
नवसंख्याः कंबलाएकएवप्रत्यक्षइतिवचनं तृतीयथातेजस्विन्याभिप्रायेण अग्निर्माण
वकइत्युक्ते नायमग्निरदाहकत्वादिति अमानधीयानस्तर्कागमेत्याद्यार्थवेणात् ८१
छलाढ्येति छलः प्रतारणंतेनाढ्या वादिनांविपरीतभाषणात् तथाचरुद्रजामले
हास्यायथासदस्यानामशुद्धमपिजल्पयेत् वादिनश्चाथराजानंमंत्रिणंवशमानयेत् वा
दिनश्चिन्तस्यपूर्वपदान्वयः ८२ छलमंत्रस्येति छकारंलातिगृह्णातिछलः वाङ्मल
काक्कारप्रत्ययाभावः तादृशोमंत्रेनिहन्तितथा हृतीविशेषार्थकच्छेदनीशब्दप्रथमवर्णे
पालिहृतमंत्रदेवताभूततत्त्विनाहृपत्वात् तथाचज्ञानार्णवे छिन्नछेदः समालिख्यता
मुक्तावरितानामविधियंत्रिषुलोकेषुदुर्लभा सर्वसिंहासनमयीबालेवकुलसुंदरी यद्वाप्र
योगागवलिमंत्रस्यैव छकारोपलक्षितत्वा त्रुटिछिंधीतिवछिंधेतिफेत्कारिणीवचनात् ८३ ७८

कलरूपेति उपासककार्यार्थं आजेन रूपं यस्याः उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पनेति
:::: कलाक्षिरेति कलेनी शिरा नाडी यस्याः तथा च माला ग्रथनविधानात् तथा च मंडमाला
यां नरागल्यस्थिभिर्माला ग्रथिता सर्वकामदा नाड्यां सेयध्यनेकार्थं रज्जौ न वा ससत्वमपि ना
डीत्वयमनिःशिरेत्यमरः यद्यपिषिन्नवंधन इत्यतः सकारादि सिरा शब्द इति स्वाम्यादिभिर्व्याख्या
ते तथापि शकारादिरपि वैशाखश्च शिरः शिरा चेति तालव्यादिषु विश्वदर्शनात् उक्तमपि प्रामाणि
कं ६८ ककारवर्णनिलयेति ककारोपलक्षितवर्णाः कादयो यत्र तत् हृदयं द्वादशाब्जं दह
त्यब्जे कादीन् द्वादश विन्यसेत् इति ज्ञानार्णवात् हृदयदेशवासिनीत्यर्थः अथ यदिदमस्मि
न् ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतराकाशस्तस्मिन् यदंतस्तदन्वेष्टव्यमिति श्रुतेः ई
श्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठतीति स्मृतेश्च स्पष्टं चैतदुत्तरमीमांसायां ६९ ककाराख्ये
ति छेदने क्षः समाख्यान इत्येकाक्षरकोषः क्षो छेदने इत्यस्मात् यजर्थे कविधानमिति सुत्र
तेः जाड्यस्य तत्रार्थात् प्रतियोगितेनान्वयः जाड्यस्य छेदं करोति ककारः कर्त्रीरूपो स्त्रा विशे
षः खड्गकर्त्रीपरशूसमाः इति नीलतंत्रात् यद्वा कारेति भावप्रत्ययः जाड्यछेदकारेणना ।

ना॰र॰
टी॰
७५

ध्येत्यर्थः जाड्यंतमस्यकपालकेत्रिजगतांहेतुभूतत्राश्रयं इतिफेत्कारिणीतंत्रात् ८६
कुलप्रियेति कुलेननिर्गुणस्यापिपुरुषस्यसगुणत्वज्ञापनेनरूपं तत्प्रियाप्रकृतिरूपत्वात्
तथाचप्रकृतिपुरुषयोःपृथक्त्वज्ञानान्मोक्षइतिसांख्यसिद्धांतः ८७ कुहकिनीति कुहय
यतिमोहयतिलोकं यन्मार्कंडेयपुराणे ज्ञानिनामपिचेतांसीत्यारभ्य प्रयच्छतीत्यंतं ८८
कुहनिलयेति कुहनाव्याजेननितरांलयोनाशोयस्याः ब्रह्मणउपहितरूपेणाशो
नतुस्वरूपेणेतिवेदांतिनः सांख्यमतेतुकुहनाप्रकृतिमोक्षव्याजेननितरांलयोआत्यं
तिकैकांतिकदुःखाभावरूपोमोक्षोयस्याः प्रकृतिधर्मयोर्बंधमोक्षयोरात्मनिष्ठत्वेन
प्रतीतेः तदाहुः तस्मान्नबध्यतेनापिमुच्यतेनापिसंसरतिकश्चित् संसरतिबध्यतेमुच्यते
चनानाश्रयाप्रकृतिः तथाचवाचस्पतिमिश्रैर्व्याख्यातं भोगापवर्गयोश्चप्रकृतिगतयोरपि
विवेकाग्रहात्पुरुषसंबंधःप्रतीयादितिइति ८९ कुहसद्मनिवासिनीति कुहनःकुलाचार
गोपनरूपस्यसद्मतदाश्रयःपुरुषः तत्प्रियत्वादितिभावः तथाचकुलचूडामणौ कुलघ्
जादिलिंगैस्तुरहिताविस्मृतत्परः गच्छंस्वपन्भ्रमन्वापिस्खलन्वित्तपरायणः जपवि

79

७५

स्तोहरेब्रह्मज्ञानार्थपदेविस्तरैः स्मर्तव्यादं कुल्लाभिश्चैरारण्येरण्येजलाशये ७० त्वकाख
ज्या जगन्नाथप्रियेति तन्नाथ विस्मयः कार्यो योगनिद्राजगत्पते मोक्षतेजगदित्यनेमाः पुरा
णे ७१ जीवेति जीवयति भक्तानितियचाप्यच जीवजप्याऽजपास्वरूपत्वात् हंसात्मिकां भ
गवतींजीवोजपतिसर्वदेति वीरचूडामणिवचनात् यद्वा जीवो बृहस्पतिः तदाराध्यत्वात्
गुरुणाशक्रगौरवमिति स्कान्दात् यदर्चयाप्राप्तमित्यन्वयः ७२ जगन्नाथरतेति विशदार्थं
यद्वाजगतोसंसारिणोनाथ्यः प्रार्थनेतत्ररतातत्प्रदत्वात् तदुक्तं फेत्कारीये विद्यावेकौ
दमवाप्नोतिकीर्तिमायुःसुतानुवहन् निवासः श्रीसरस्वत्योर्यत्रसारस्वतोमनुः ७३ जवेति
तथाचकौलावलीये यत्रापराजितापुष्पंजवापुष्पंचविद्यते करवीरे शुक्लरक्ते द्रोणे वायदि
ति एति तत्रदेवीप्रसीदेत्रिसंतर्पणेनपरिकीर्तिता ७४ जीर्णेति अनादित्वात् जीर्णत्वंप्रकृतेः
सांख्यमतेअनादिभावरूपत्वेमतिज्ञाननिवर्त्यत्वमेषाऽविद्यालक्षणं रूप्योपादानमज्ञान
मप्यनादि चैतन्याश्रितत्वादतोयैव उत्तरकालीनेशुक्त्यादिकंतत्तदवच्छेदकमिति वदतो
वेदांतिनामप्यनुकूलमेवैतत् साम्यस्यद्व्यर्थः तैरविद्यायाः शुद्धब्रह्मविषयकत्वस्वीका

ता॰र॰
टी॰
८०

रात् ७५ जीमूतवलिनेति इंद्रस्थापितत्वात् सतेर्विंध्येन गर्भेहे स्थानं दास्यति इत्यगस्त्यतः
मितिहरिवंशोक्तस्लोकैः वनितेति पाठांतरं तत्रेंद्राणीरूपत्वात् ७६ जीमूतेति रूपशोभि
तेति पर्वते दुर्गाप्रतिष्ठायाः प्रसिद्धत्वात् तथा च देवीपुराणे गंगातमेदवि आद्रि उज्जयि
न्यथवार्बुदे हिमवत्विषये द्रोणेऽन्यास्थापिता भवेद्देवि सर्वकामार्थसिद्धिदा ती
र्थानार्थे पुष्कराद्यैः द्वौ .... योषके च ने इति विश्वः ७७ जामातृवरदेति जामाता दुहितुः प
तिरित्यमरः कन्याप्रतिनिषिद्धे न ब्राह्मणकृता होमा तथा च शारदायां लाजैस्त्रिमधु
रोपेतैर्होमः कन्याप्रयच्छति अनेन विधिना कन्यावरमाप्नोति वांछिते जामातृत्वेन च
कन्यापित्रे प्रदत्तया वाचा यज्ञार्जिते तये संयदादित्वात् भावेक्विप् तस्या मातारो ज्ञाताः
अनिष्टछायत्वात् तेषु वरान् श्रेष्ठान् अतिमृशंसा नयति खंडयतीत्यर्थः ७८ जंभेति
देवदत्ताख्येवायुरूपेण जंभणाहेतुत्वात् छतकृत्कलो देवदत्तो जंभणकर्मकृदि
ति प्रपंचसारात् ७९ जमलार्जुनधारिणीति जमदग्रदने वर्गात्तनीयादिः भावप्रत्ययजा
मोऽप्राप्ते तत्स्लाति ददाति जमला लोकानां योगक्षेमनिर्वाहकत्वात् यज्ञानेवेशादिरूप ८०

80

मप्रानेलातिशहृणातितथा अर्जुनः कादेवहृदतः नेधारयतिस्वपृजगाहेतस्तेवेषेनतथा
हयोः कर्मधारयः कादेवस्यकरेजश्रेतिप्राप्तकवचनात् न्निवाम्बस्यकदेवकमितिव
दसमाणवचनाच्च ८० जवेति जगतीसोत्रः जवोगमनेत्तानेवातयोगात् जवाकुसुम
होमिनकुंकुमाद्दीवर्णीभवेदितिवीरचूडामणिवचनाद्वा ८१ जवान्वितेति वायकतयो
न्नरदेशसंयोगवत्तसाधर्म्येणवेगवत्तोपचारः तथाचश्रुतिः अपाणिपादोजव
नोग्रहीतेति श्रुत्यन्तरमपि अनेजदेकंमनसोजवीयइति अनेजदेकं परहितं
मनोपेतयाजववत्तरंचेति विरुद्धमाशंक्य ब्रह्मलोकादिहृदयएवस्तस्तानेनमनोवेग
वत्तलोकप्रसिद्धं तदाचप्रथमंप्रासइवात्यचैतन्याभासोगृह्यतेअनोमनसोजवीयइ
त्याहेतिमवेगंत्यादैर्व्याख्याते ८२ जंभेति जंभावहार्यातिशयहेतुत्वात् तथाचभार
तटीकायामुदाहृतं जंभणेनहिसूत्राणांवलंतेजश्चवर्द्धते यच्चाजंभतइतितथा
चूर्णिनावस्यपिलक्षणं सेत्रायतिचूर्णितेतिभावनाप्रसमावेमतस्यसूक्तात् ८३
जंभारातिवरप्रदेति जंभारातिरिंद्रः तदुक्तंस्कांदे देवाधिपतिमिंद्रेणेति यदर्वयाश्रा

ना॰र॰
टी॰
८१

ममित्यनुषंगः ८४ जितेति जितमिति उत्कर्षो प्याजयनेभावे क्तिप्रत्ययः परा
भिभूताद्युत्कर्षे जयन्तेनेत्यकर्मक इति मदृमल्लोक्तेः उत्कर्षश्च प्रतियोगिविशेषा
नपादानात्सर्वापेक्षः नदुक्तमस्याः ब्रह्मरूपत्वात् ८५ जयित्रीति असतामभि
भावकत्वात् क्वोदमसत्वादिडागमः यद्वाजयपश्चौक्तिवंनात्तन्प्रत्ययः ८६ जयदे
ति संग्रामादौ जयदत्वात् दुर्गेषु विषमेषु तांसंग्रामेषु वनेषु च नमस्कृत्य प्रपद्यन्ते
ये तेषामभयं कुरु इति स्कांदात् यद्वाजयमभिभवं ददाति सोपासकवादिनां स्वो
पासकानामभिभवं घातित्वं उपनिव ८७ जयदात्रीति स एवार्थः यद्वा अत्रेरियं
आत्री उपास्योपासकत्वसंबंधात् जयदिति हेतौ लदाण्णेवाप्राप्तुं प्रत्ययः सा चासा
विति कर्मधारयः ८८ जयप्रदेति जयो जयंते विजये इति विश्वः जयंतं प्रतिष्ठरयतिज
यप्रद इति यावत् भावप्रधानत्वादृत्पदद्दातीति तथा तदुक्तं ब्रह्मसंहितायां देवत
ममरेषु तं गंधर्वत्वं च भोद्विजा यत्न विद्याधरत्वं च तथान्यं तं प्रयच्छति ८९ जकारखज्वा
झल्लरीति झल्लरी वाद्यविशेष इति स्वामी झल्लरी झिल्लरी च हौडुक्के इति विश्वः मात् ८१

रूपेणात्तदेवतात्वात् तथा चडुडुकालदलाणम्तुकासोगीतशास्त्रे देवतामातरः सप्त प्रोक्ता
हंसीरभसजा ९० प्रीतकृतिरिति शून्यागारेश्मशानेइत्याद्यर्थेणात् शून्यागार
स्यकिल्यादिमयत्वलादीणेनेव्यक्तानुकरणद्वारातत्परत्वे तत्प्रियत्वात् ९१
झिल्लीति भृंगारीचीरुकावीरं झिल्लिका च समा इमा इत्यमरः झिल्लीवाद्यविशेषस्त
त्स्यप्रिहेतिस्वामी कुंडलिनीरूपेणातत्सदृशशब्दत्वात् झिल्लीवाद्यकमधुरा
कलेतीसततोषितेतिस्वतंत्रतंत्रोक्तेः फल्लीतिपाठांतरं तत्र फल्लयस्ताहारविशे
षो व्याकरणप्रसिद्धस्तत्रलीयते मातृकारूपत्वादित्यर्थः आखातरायंतादित्यपियेत्त
नोडीविति व्याख्येयं ९२ करीतिप्रवाहो निर्झरोझर इत्यमरः मृणाल्यादिवत्स्त्रीत्वे
साधनस्यानत्वेन तत्प्रियत्वात् ९३ कुर्कुविकांतरेति कुर्कुरः स्यात्कलियुगे वाद्यभा
डनदांतरे इति विश्वः सोस्यस्या इतिमत्वर्थे ठन् अंतगतावित्सतोवज्ञ गत्सर्थोता
नार्थाइति आतेशानेरुक्तेतियावत् रुद्राद्विषड्भक्तमंर्यणातिददातितत्प्या उभयोः
कर्मधारयः तथा च कलौपिसिद्धिदामेशास्तानध्याश्महेवयमिति उपक्रमस्यमतद्रा

मरे त्रिजटैकजटाकालीनीलसूर्वोसरस्वतीत्यादि ९४ ठकारवज्रया टीकारकारि
ना॰र॰ णीति यत्नुःशद्बस्यटंकारेतिप्रसिद्धिः टंकारःसिंजिनीधनाविति विश्वः ज्योभिता
टी॰ शेषपातालोयत्नुर्ज्यानिःस्वनेजत्यामिति मार्कंडेयात् वस्तुतस्तुटांकारोपरिगत
८२ कोषवीजस्यकर्णुपरिगतत्वात् तथाचाथर्वणे श्रूयते तस्योपरि ततोध्यायेद्धां
कारान्तश्वेतपंकजे इतिप्रक्रम्य तस्योपरिमहाविद्यामिति ९५ टीत्कारकारि
णीति अनुकरणपरयवात्रटीत्कारः यद्वाटीइतिप्रणाह्विकसंज्ञा तथाचसूत्रे अ
वैात्पादिटिस्त्रेत्यादयः प्रभृतिशद्बस्यटीमंत्रेत्यर्थी इत्यत्रपिलोकप्रयोजकसं
ज्ञाविशेषः उपदेशेजनुनासिकइत्यादिसूत्रात् कारःप्रत्ययविशेषः वर्णनिर्दे
शेवर्णत्कारइत्युक्तेः तान्कारयतिज्ञापयतितथा व्याकरणज्ञानहेतुत्वात् ९१
टकाधारिणीति इदंवाणीरूपादौज्ञेयं तथाचप्रपंचसारे ठकान्ताभयवरान्
दधतीचत्रीक्षणेंडखकलितजटा वाणीवापरस्यादिशादाकलानयेस्वरस्त्रेवं ९२
टकारवज्रया ठकुरान्तीति टकारेककारेचकायतिअभिधत्तेइतिठकुशद्बेनात्र ८२

82

मृदंगोग्राह्यः कैश्चिद्देनश्यमृगयोदराक्रुतिमगणतानकः तत्रहिठकारककारयोःप्रवेशउक्तः
सोगीनश्चास्त्रे कवर्गश्चठवर्गश्चतवर्गश्चत्रवर्जितः रहाम्पोसंयुताव्रणोमृदंगेषोडशोवहि
तेनचतद्देवतोपादाने मुनिभिर्मर्दलस्योक्तादेवतानांदिकेश्वरइत्युक्तेः तस्यराशीगण
तेन नदीश्वरत्वात् यद्वा ठकइतितद्धितप्रत्ययविशेषः तेकायतिपूर्ववत्कः तथाताद्धि
कानोराशीत्यर्थः १८ ठकारवत्या डमरुकेति डमरुवाद्यविशेषे कायतिवादयतितथा
तेषांप्रभेदाडमरुमरुडिंडिमझर्झराइत्यमरः त्रिशूलेडमरुवत्कमितिरुद्रभैरवीकल्पेत्ताना
णीवे १० वाक्यप्रमाणपदसागरपारस्यलक्ष्मीधराभिपद्मयस्यतन्तद्भदेनविश्वेश्वरेणवि
हितेगिरिजाभियार्थेचिंतामणावगादक्षमकोमयूषः कर्मरस्यजडतोविजत्याखंडयेत्स्पति
स्तिताश्चककभ्यो नारिणीकिमुममापितदंतर्वर्तितोनलवितेतितिष्ठतिमे अथयत्रहमशात
व्याख्यानेत्युत्काकारीति डात्इतिशाद्वंकरोति शिवरूपत्वात् तथाच गुंजत्कंजकुटीरकोशिक
यराष्ट्रत्कारसंवालितः केदम्फेरववंडडात्कृतभूतप्राग्भारभीमैस्तटैरितिमालतीमाधवे
चमोके ध्वत्कारडात्कृतीश्चत्रकरणशब्दाविति जगद्धरः १ डमरुप्रियेतिस्पष्टार्थं यद्वा

ना॰र॰ टी॰ ८२

योगिनीरूपत्वात् तदुक्तं मंत्रमहोदधौ कपालडमरूपाशलिंगसंविभ्रतीः करैः श्रोत्राकल्या
रक्तवस्त्रा योगिनीकृतनैर्यजेत् ढक्कारवाद्यानि ढगितिकायनिढक्केति स्वामी अरवः शाद्दा
भावः ढक्कायाश्च प्रतियोगिनिरदेन्वयः ततोर्शआदित्वादच्प्रत्ययः अर्थाद्धस्तग्रहणं वि
वंचैत्य गृहे ढक्कामितित्रतहादननिषेधात् तस्यआयाहत्वात् तथाचश्रुतिः योद्धस्ता
णे विदधाति पूर्वमिति ३ ढक्कारीति ढक्कावाद्ये इयं तिष्ठाप्रोतियद्वा ढक्कं तालविशेष
रागविशेषंवा इयतीत्यर्थः ४ तुलसीति तुलसीमंजरीभिस्तु सर्वकामार्थसिद्धयरु
ति कालिकापुराणे काम्यपूजायां विधानात् शिवार्चने निषिद्धस्यापि केतकीपुष्पस्य
केतकीपात्रुमाराणीनि शिवधर्मसमुच्चये विधानात् ५ तालभंजिकेति तालफलभं
वस्यमयुनः प्रसिद्धेः तालफलजमेकादशाभिरिवावस्पति मिश्रोक्तेः तदाहपुलस्त्यः
पानसेक्षालमापूकेखार्जूरं तालमेतयं ६ गुलेति दिव्यभूततत्त्वलाधिष्ठातृत्वात् यद्वा
प्रीयतां पार्वती गुडेति विश्वामित्रोक्तेः कुंकुमस्य तु पार्वती त्रिभविष्णा नरो केशल्ल देवता
तात् घृतादित्वलाप्रक्रमे हेमाद्रौ विष्णुधर्मोत्तरे संवेसंपत्प्रदाः सर्वाः सर्वपापक्षयंकराः ८२

योददातित्वलांगौर्याः सगौर्यालयमाप्नुयात् मंत्रेण दद्यादभिमंत्रितांत्सहस्रतूलामेकतमांद्वि
जेभ्यः सयातिगौर्याः सदने सहस्रपनशौकदौर्भाग्यमपास्तनेव ७ तौलिलिकेति तूलित्व
लांतर्गर्भिता शय्या लाति गृह्णातिति लिलिला तूलिकाकथितालेख्यकुंचितातलययाथोरि
तिविग्रहः स्वार्थकप्रत्ययांतस्यैवायमर्थे निर्देश उणा उ प्रत्ययांतसैयपरुत्सनेः ततः स्वार्थेणता
कप्रत्ययः तथा वहूतीप्रकरणे उत्तरतंत्रे निवेशयतूलिकामध्ये नानापुष्पसुगंधिना चंदना
गरुकर्पूरकस्तूरीकुंकुमादिभिः समाकीर्णे निवेश्यायपूजयेत्कुलनायिकां ८ तौर्स्मिति प्र
पंचान्तर्गतत्वात् ९ तारेति नक्षत्ररूपत्वात् कनीनिकाप्रित्वात्ता यद्वांतरक्षिणिपुरुष
इतिश्रुतेः चक्षुषीप्रक्रमपठितेस्तेनेजा वैश्वानर इतिश्रुतेश्च वैश्वानरशब्दस्यतत्रपरमात्मपरत्व
मित्युत्तरमीमांसायांस्पष्टं १० तारिणिकेति स्वार्थेकप्रत्ययः नवाक्षरो मन्त्रदेवितारिण्याः सम
दीरितः इयमेवमहाविद्यास्वर्गे मर्त्ये सुदुर्लभेत्युक्त विशेषरूपावा ११ तंत्रविदेति मंत्रशास्त्र
वेदित्वात् कदाचिच्छिष्यपवहीतिकुलचूडामणौ भैरवं प्रति देव्युक्तेः १२ तंत्ररतेति आगमप्र
तिपाद्यत्वात् १३ तंत्रविधेति तंत्रमितिप्रक्रम्य शास्त्रप्रधाने सिद्धान्ते इति विग्रहः गोप्यत्वात्ति

ड्रोतभूतेत्यर्थः नडक्तंकुलार्णवे वेदशास्त्रपुराणानि स्पष्टाः वेश्यांगनाइव एषेत्तु शाम्भवी विद्या
गुप्ता कुलवधूरिव १४ तंत्रपेति प्रकाशनादिभ्यो रक्षणात् प्रयोजकस्यापि तत्प्रयोजको हेतुश्चो
ति कर्तृत्वस्मरणात् सगुप्तकौलिकाचारमनुगृह्णातिदेवताः वांछासिद्धिं प्रयच्छंति नाशयेत्ति
प्रकाशकान्निति कुलार्णवात् १५ तंत्रिकेति तामयति स्तनभारेणेति ताम् तमु ग्लानौ कि
प्रत्ययः अनुनासिकस्य क्विझलोरितिदीर्घः मोनोधातोरितिनत्वं तादृशं त्रिकं यस्याः हृश्रा॰
मध्यमेत्यर्थः पृष्ठवंशाधरे त्रिकमित्यमरः तथाच देवीपुराणे भाषितानंतुमध्येन मध्येचत्रि॰
वलीभृतेति १६ तंत्रविधेति स्वतंत्रः कर्तेति स्ववेतंत्रमिधे ब्राह्मणीप्रधानमितिगम्यत
इतिमहाभाष्यदर्शनादुक्तदोषाद्व प्रधानभूता विधेत्यर्थः १७ तंत्रसारेति तंत्रेषु सारः सार
त्वंयस्याइतिव्युत्पत्त्या तत्किं त्रिभुवनसारातारानाराधिताभवतेत्यादिवत्प्रीत्वे १८ तंत्रपो
ति तंत्रशब्दे प्रक्रम्य तंत्रवायेणवांतरेइति विश्वः तंत्रेरोगविशेषेपिपतिनाशयतितथा य
द्वा तंत्रेशास्त्रेपिवतीत्यंतभूतणिजर्थभक्तानो तदवबोधकत्वात् १९ तंत्रधात्रीति तंत्रस्यधा
रिकादस्यधारणात् २० तंत्रकारीति तंत्रंभक्तविवदांसाधयतिइतितथा हस्तग्रहणमतंत्रमि ८४

त्यादौ तंत्रशब्दस्याविवक्षितार्थकत्वदर्शनात् यद्वा अनाहतं निःप्रवाणि तंत्रकं च नवांबरे इत्यमरः
तंत्रादचिरापहृते इति कप्रत्ययः तंत्रकं नूतनवस्त्रं इयर्ति प्राप्नोतीत्यर्थः २१ तंत्रणाचरेतेति
तंत्रैर्वर्णनात् तंत्रणं कर्म्मकरणं ज्ञात्यर्थे इति णिजंताद्भावे युच् तयाचरता श्रेष्ठतंत्रयस्याः तेषां
माहात्म्यज्ञापकत्वात् छांदसत्वाद्वाधिकरणेपि बहुव्रीहिः तद्रूपाचरतायस्येति व्या
ख्येयं २२ तुरेति तुरेति शाद्वोपलादितमंत्रांतरत्वात् प्रणवं पूर्वमुद्धृत्य तारे तारे तुरे तुरेत्ये
ति गंधर्वतंत्रे दशाक्षरमंत्रोक्तेः अथ श्रद्दाने तरिभवति त्वरात्वरलिवेगे इति कल्पद्रुमे वै
दिकत्वेन पठितात्त्वरतेः पचाद्यच् तथा च ब्रह्मसंहितायां अन्येतु साधिता मंत्राः सर्वे स्युः फ
लदायकाः गृहीतमात्रफलदो मंत्रोयमप्यसाधितः २३ तपःप्रभावेति उभाभ्यामुक्तत्वा
त् देहादर्शाद्यायच् यद्वा तपोदयाः प्रकृष्टाभावाः कौलिकाचाररूपा यस्याः प्रसादेन प
शुभावव्याहृतिः तत्पदोत्तस्यापकृष्टत्वात् तदुक्तं भावचूडामणौ वीरभावो मयादेव
कथ्यते शृणु भैरव निर्द्वंद्वमानसो मत्तो हृद्दाकामकलानंदः निशाख्यप्रवराष्टजाहेतु
गुह्यकामसदैवहीत्यादि २४ तंत्रेति इति कर्तव्यता योवेति तंत्रशास्त्रार्थ पुविद्यः लोकस्रष्टा

ता॰र॰
टी॰
८५

वितिकर्त्तव्यताभिज्ञत्वात् २५ तंत्रसारफलप्रदेति तंत्राणांसारः कुलाचारः तस्यफलंप्रकर्षे
णददातितथा कुलाचारंविनादेवि नैवसिद्धिप्रवर्त्तेकमिति कुलचूडामणिवचनात्
प्रदाज्ञोरितिकप्रत्ययः २६ तपस्येति तपस्तपः कर्मकस्यैवेतिकाडे॰ तादप्रत्ययेटाप्
साल्यस्याः इतिवार्थः उद्देश्यपत्तेषष्ठ्यर्थः तत्याम्यधेतपसोविधानात् तमेतंवेदानुवच
नेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेतिश्रुतेः यद्वा तपस्यःफा
ल्गुनमासोस्त्यस्याः तपश्चतपस्यश्च शैशिरावृतू इतिश्रुतेः तथाचमत्स्यपुराणे
फाल्गुनादितृतीयायांलवणंयस्तुवर्जयेत् मासांतेशयनेदद्यात्सर्वोपस्करसंयुतं सं
पूज्यविप्रमिथुनंगौरीमेप्रीयतामिति गौरीलोकेवसेत्कल्पंसौभाग्यव्रतमुच्यते २७
तौलिनीति तुलंतिजेतन्नकर्षतिभीषणत्वादितितुला म्रतपिपणवाद्याः तुलक
र्षेश्चस्मादच्प्रत्ययः यद्वा तुलयंतिपूरयंतिद्रष्टव्यार्थानितुलादेवादयः तुलपूरणेचु
रादिः पूर्ववत्प्रत्ययः तेषांसमूहस्तौलं तदस्त्यस्याः २८ तीर्णेति समवद्धमध्यास्थितत्तौनौ
कारूढाभ्यांतीर्णा तरीतुमारब्धवेलादिकर्मणिक्तः प्राणप्रतिष्ठारूपत्वात् रक्तोभोपिस्त ८५

85

योतोल्लसदरुणसरोजायितहृदिनिप्रपंचसाभात् यद्वारलांभोनिधिमध्यस्थानौकात्
ध्यांविचिंतयेदिति एतद्वेदेश्यितिध्यानेनेत्रांतरदर्शनात् २९ तार्त्तीयेति स्वार्थेणिद्वो
दसष्टाप् तारैकगटानीलसरस्वतीभेदेन त्रैविध्यात् क्रमनियमाभावेनसर्वासामपि
दृतीयत्वात् यद्वा त्रिमुनिव्याकरणप्रसिद्धेर्मुनित्रयमध्येतृतीयः कात्यायनः व्याकर
णवार्त्तिककारत्वात् ततः स्वार्थेणप्रत्ययः सोस्यास्याहत्यर्थः तथाचवामनपुराणे
देव्युत्पत्तौ तथैकतोपर्वतकूटसन्निभेजगामतेजः प्रवरामराणां कात्यायनेनाप्रति
मस्यतेनमहर्षिणातेनउपाहृतंच तेनर्षिसृष्टेनचतेजसाहतेज्वलत्प्रकाशार्कसह
स्रतुल्ये तस्माच्चजाताम्ब्विशालनेत्राकात्यायनीयोगविशुद्धदेहा कालिकापुराणे
प्युक्तं तत्रतेजोद्भूतवपुर्देवीकात्यायनेनवै संयुदितापूजितावतेनकात्यायनीस्मृ
ता ३९ तुलसीति विरोधेमत्वर्थलक्षणयातत्पूजननिषेधात् बिल्वैर्मरुवकाद्यैश्च
तुलसीदलवर्जितैरितिमात्स्यसूक्तात् यद्वा तुलस्याः दुर्गापूजायांविहितनिषिद्धत्वा
त् तिलकंमालतीबाणतुलसीभृंगराजकं तमालंशिवदुर्गार्थेनिषिद्धंविहितंभवे

दितिभविष्यपुराणाद्वा ३१ तुषेति तुष्यन्ति प्रीयन्ते सोपासकानामिति तया तुष्यतेरि
ता॰र॰ टी॰ ८९ गुपधलक्षः ३२ तुषारकरस्यार्णास्येति तुषारस्य दधोरत्यन्तमवदातैः करैः किरणैर्हा
सपेशोभा सूर्यैः पूर्णमासं यस्याः ३३ तुषारकरमण्डितेति यद्यपि अत्रोभ्यः सर्वभू
ष्वन्यास्त्रिमूर्तिर्नागस्य पदशक इति भावचूडामणिवचनात् मौलावद्धोम्य मूषिनामिति
वचनेः द्वोम्यपदस्य अविनाशित्वं दकलापरत्वव्याख्याने प्रामादिकमिति कल्पलता
यामुक्तं तथाप्येतन्मंत्रान्तरध्याने चंद्रार्द्धांकितमस्तकां त्रिनयनामिति तंत्रान्तर
वचनादिदं बोध्यं यत्तेन पुनाब्जकापिचितकलापिशंगजूटसत्कलेति श्रीमत्पितृच
रणानामुक्तिरपिव्याख्याता ३४ तुहिनांशुसमानास्येति तुहिनांशुपदं तत्कलापरम्
तासां षोडशसंख्याकत्वात् षोडशसंख्यासमानावर्षाणि यस्याः हायनाद्बशरत्समा इत्य
मरः अविद्यमानमासम्भवं यस्याः तथा चाभिन्नमस्ताध्याने सदाषोडशवर्षीयां
पीनोल्लतपयोधरामिति षोडशाद्वेनयुवतीमिति ह्जीप्रस्तापोत्तरतंत्राद्वा ३५
तुहिनांशुसमप्रभेति अंशुर्लेशे रवौ रश्मौ इति विश्वः तुहिनांशोर्गनांशु समास्त ८९

येतुल्याचप्रभायस्याः सदसतोरुपकारापकारजनकत्वात् ३८ तुषारकरतुल्यांगीति चं
द्रतुल्यं श्वेतवर्णमंगं हृदयशिरोदेवतारूपं यस्या तथा च शारदायां तुषारस्फाटिक
श्यामनीलकृष्णारुणविग्रहाः वरदाभयधारिण्यः प्रभातत्तनवस्त्रियः ध्यानध्याविंद्धबा
तेचक्रमेणैवांगदेवताः ३७ तुषारकरसुंदरीति तुषारे हेमंतर्त्तौ कं आरामताजलं सुख
रं तिदर्दतीति तादृश्याः सुंदर्यो गोपकन्या यस्याः कांदसत्वात्समासांतामावः यद्वा
सुंदरीणां सर्वविशेषणेन समह कर्मधारयेहृकागानसोई लक्ष्मीः भगवत्याभिन्नपे पदत्वात् इ
ति सुंदरीशाद्वेन रईकार प्रश्लेषो वा बोध्यः तथा च श्रीभागवते दशमस्कंधे हेमंते प्रथमे मा
सिनंदगोपकुमारिका चेरुर्हविष्यं भुंजानाः कात्यायन्यर्चनव्रते कात्यायनि महामाये
महायोगिन्यधीश्वरि नंदगोपसुतं देवि पतिं कुरु नमोस्तु ते इत्यादि ३० तुषारधामतु
ल्यासेति तुषारशाद्वेन धामशाद्वेन च सांद्रं तुल्यं समानं आस्यं स्थानं यस्याः नामनुत्ता
राशाद्वस्य धामशाद्वाद्यादरेण तुषारशाद्वांत्यादरेण च तुल्यस्थानत्वात् तवर्गस्य दंतः
स्थानत्वात् इत्यर्थः आस्ये भवमास्यमिति व्युत्पत्त्या आस्यशाद्वस्य तालुादिस्थानवाचक

ता॰र॰
टी॰
८६

87

ते तुल्यास्यप्रयत्नमिति सूत्रे महाभाष्यादौ स्पष्टं ३८ तुषारांशुसमाननेति तुषारस्तेन
प्रोत्येन चंद्रे अंशुः सूर्यस्तत्तुल्ये तेजस्तत्वेन मग्निस्यति खेडयति प्रसिद्धधर्मधर्मिप्रयोगेनेति तुषा
रांशुसमाश्रोनकर्मणीत्यस्मात्कप्रत्ययः माटशीमानननामक्रियेयस्याः वदंस्यातिव वह्निः
प्रीत्यं करोत्येवस्तन्वस्यास्य प्रकीर्तनादिति ४० तुहिनाद्रिसुतेति तुहिनः पूर्णतोऽडः
खदानप्रोक्तिहीन अद्रिसुतः सूर्यपुत्रो यमो यस्याऽ इति हे तव पंचमस्यावकुव्रीहिः या
पत्वयहेतुत्वात् सूर्यपुत्रः शनैश्चरो ग्राह्यः ग्रहपीडानिवारकत्वात् अद्रियोत्नु
मशैलाको ग्रत्यमरः ४१ नाडीनिमर्यभयवारकत्वात् तथाच ब्रह्मसंहितायां बालेदृष्ट्वायदिभयं
सर्पदष्टे हि जपेन्मंत्रं बालेबालेसमुद्वार्य गरुडायनतः परं स्वाहास्वाहेतिवक्तव्यं बालभीतिर्नजा
यते इत्येतत्रे देहस्थके ४२ तालांगीति तालफलतुल्यमंगं स्तनरूपं यस्याः यद्वा तालः खड्ग
मुष्टिः तत्संयुक्तमंगं हस्तरूपं यस्याः तालः खड्गादिमुष्टिषुद्रुमभेदेकरतालेश्च इति विश्वः ४३
तालवर्जितेति तथाच बृहत्समाहेश्वरतंत्रे ब्राह्मणो मदिरां दत्वा ब्राह्मण्यात्पतति हीयते श्रीक्रमे
पि नदद्याद्ब्राह्मणो मद्यं महादेव्यै कथंचन वामकामो ब्राह्मणोपि मद्यं मांसं न भक्षयेत्

तारस्वरेण सहितेति तारा ध्यात्रयं भर्तेन संबंधेनेति तारो बृहस्पतिः तद्वाचकः स्वरः शब्दः ते-
न सहिता हितसहिता हितं भक्तानिष्टसाहित्यं तज्जनकत्वेन बोध्यं तथा च विद्यावतः द्रुमगुण-
मूलक हहति प्रादुःप्रतिपाद्यता तत्स्वरूपभक्तहितजनिकेत्यर्थः वागीशा इव शास्त्रेषु काव्येकाव्यस-
मः स्यात् इति भैरवीतंत्रे मंत्रं प्रक्रम्याभिहितत्वात् ४५ तारस्वरविभूषितेति तारे शुद्धे हि
मा ऽसंकीर्णो खे स्वर्गः तज्जनको विमर्षो वलिरूपः तेन भूषिता प्रीता अजाविकानां रुधिरे
पंचविंशतिवार्षिकीं तृप्तिमाप्नोति कालिकापुराणोक्तेः शुद्धपदेन वेधहिंसाया अपि पुरुष
दोषावहत्वमिति सांख्यमतनिरासः न हिंस्यात्सर्वभूतानीत्यस्य वैधान्यहिंसानिषेध एव
तात्पर्यात् ४६ नकारवर्ज्या थकारकूटतिलमेति यश्चकश्चप्रश्चेति द्वंद्वः यदि तत्राजाद्यंत
मित्यनेन अकारस्य पूर्वनिपातापत्तिरित्याशंक्यते तदा छंदः समतात्समाधेयं यद्वा थकारेण
सहितोऽकार इति मध्यमपदलोपो व्याख्येयः वस्तुतः स्वसौष्ठवौदार्यविशेषशालिनी मि-
त्यादिप्रयोगात् द्वंद्व नियतत्वमिति द्वंद्व एव निर्दोष इति ध्येयं थकं वज्रावेन संस्कृत हस्वथकं त-
निरूपं थकं श्यत्री नित्थकारः कर्मण्यण् अकथक्रमेण वाच्यप्रकारैर्विमार्ग्य विपरीतकमे

ता॰स॰
टी
८८

ण्योक्तिः तादृशस्फटोपलनिलयश्चक्राद्रूपोयस्याः श्रीचक्रस्यहि त्रिकोणे अकाराद्याः षोडशस्वराः
ककाराद्यास्तकारांताः थकाराद्याः सकारांताः क्रमेणमध्येवहदे ऽ र्णद्वयंतिष्ठतीतिप्रसिद्धिः तथा
वर्णज्ञानार्णवे आदि कादिकादिकिलयादिन्यासकं वर्णमंडलमखंडलसिद्धिदं अंतरोल्लसित
हृत्तमन्तरंलतयेतिपशवः कथंशिवे ४७ तथारात्सरमालिनीति यवर्णस्यकेशिरः आद्या
त्तरमितियावत् तेनतकारलाभः आकारयोगेनाइतिसिद्धंतडत्तरेराकारउत्परमालास्यस्याः
वाचकत्वसंवेधेनेतिश्रीह्मादितादिभिः तारोत्तरराशाहवाच्येतियावत् यद्वाथकारोत्तरस्य
मइतिसमासः पूर्ववत्तिंसंवेधः तथाचमथेत्यस्यलाभः अयोगवलिंअत्रस्समयेतिप
दद्वयग्रुक्तत्वात् यद्वा वतः पथ्यमयेविधिजपेदष्टादशाक्षरी प्रणवंपूर्वमुद्धृत्यमयग्रुग्मं
तथैववेतिब्रह्मसंहितावचनात् ४८ पकारखंजा दयावतीति दयापूर्वंव्याख्याता नित्ययोगादो
मत्वप् तत्रदयातादात्म्य अत्रत्वतद्वत्वमुक्तमितिभेदः ४९ दानरतेति दानेभक्तानामंतःकर
णशुद्धौरतातद्धेतुत्वात् तेषांनित्याभियुक्तानांमायातत्वंसमस्थितं नाशयामितत्त्वःकृत्स्नंज्ञान
दीपेनतोचिरात् इतिकूर्मपुराणेभगवदुक्तेः दानेगजमदेत्यागेपालनच्छेदशुद्धिषु इतिविश्वः ५०

दुःखदारिद्र्यनाशिनीति दुःखप्रयोजकं दारिद्र्यं नाशयतीति तथा वैश्रवणो भवतीत्याथर्वण
श्रुतेः ५१ दौर्भाग्यदुःखदलनीति दौर्भाग्यं दुष्टादृष्टं तेन तत्सूचकतादृशग्रहादिदशावर्त्तेन
जन्यदुःखं तं दलति पीडयति तादृशस्याभिचारादिविधानात् तदुक्तं कुलार्णवे अन्ये
पि च दिवा योगाः स्युरनिष्टसंसूचकाः ज्योतिःशास्त्रोक्तदारुणास्तत्प्रारंभे मारणादिकं य
दि साध्यग्रहो दुष्टो मासः संवत्सरस्तथा तदा तस्य शुभकर्म न कुर्यादिति निश्चितं दलिनी
ति पाठे णिनौ कृदसत्त्वाद्वृद्ध्यभावः ५२ दौर्भाग्यापन्नाशिनीति दौर्भाग्यं च आपच्च दौर्भा
ग्यापदं द्वंद्वाच्चुदषहांतात्समाहारे इति समासांतो टच्प्रत्ययः महत्यापदि महत्यापे महाग्रह
निवारणे इत्याद्युक्ते स्मरणादेव नाशयेदिति कालीकुलार्णववचनात् ५३ दुहितेति
कुमारीरूपत्वात् कुमारिकास्वहं नाथ यतस्तेन कुमारकेत्यादियामलोक्तेः यद्वा दु
ह प्रपूरणे भावे घञर्थे कः दुहः संजातोस्याः दुहिता पूर्णत्वात् पूर्ववद्दुहितृशब्दस्य ऋ
कारांतः अत्र तु आकारांत इति विशेषः ५४ दीनबंधुरिति दैत्यनिराकरणात् अथवा दी
नाः ब्रह्मस्तंबानभिज्ञाः एतेहि तदज्ञानमार्गविदितायाः स्मार्त्तलोकात्प्रतिसकृपणा इति श्रुते

ता॰ र॰
टी॰
८९

तेषांवेदुगात्मबोधहेतुत्वात् ५५ दानवेंद्रविमर्दिनीति दानवदानवरिविक्रांतेरितिविष्णुः
दात्तृणांविक्रांतानांवाश्रयेदानवः तस्येदमिति शैषिकोण्प्रत्ययः तादृशमिंद्रंश्रेष्ठं
विशेषेणमर्दयति स्वनिष्टोत्कर्षनिह्नपिनाकर्षाश्रयंकरोतितथासर्वोत्कृष्टत्वात् ५६
दानदात्रीति दानस्यगजमदस्यदात्रीखंडनहेतुः मत्तगजस्तंभहेतुत्वात् तदुक्तंब्रह्म
संहितायां पंचांतकेविंडकेगणेषूरायनततःपरं यन्नेगजेस्थिरीकृत्य ॐ ॐ स्वाहेतिवह्नि
या गजवश्यकमंत्रोयंराजपुत्रप्रियंकरः ५७ दानवरेति दानेषुश्रुराउदेष्यपत्वात्
यज्ञार्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनइति भगवद्गीतोक्तेः ५८ दानसंमानतोषिते
ति दानेस्वद्रवेसंमानेसम्यक्ज्ञानेनताभ्यांतोषिता स्वरूद्भूतसभावत्वात् ५९ दैत्यादिसेवि
तेति दैत्यःसकारोऽर्थसामर्थ्यात् तेआदौस्वपूर्वभागेसेवनइति दैत्यादिसेवीतकारोय
स्याः वधूबीजस्यसकारेणतकारघटितत्वात् यद्वा दंतीतिशब्दस्यादिंसेवते इतिदंत्या
दिसेवीनकारोयस्याः एकदंदंतिकापदेतकारोनवंदंतीतिशब्दस्यसत्वात् तदुक्तंमार्कंडेय
पुराणे पुनरप्यतिरौद्रेणरूपेणत्यारभ्य· स्तुवंतोवाहरिष्यंतिसततंरक्तदंतिकां य ८९

द्वादेत्यः नकारः तेन अग्रादौ सेविता नाराशब्दस्य नकारादित्वात् ॥८०॥ दान्तेति दान्ता उपरते द्वि
पवापारः संत्यस्याः स्वज्ञानाधिक्तत्वसंबंधेन तथा श्रोतेऽदान्त उपरतस्मिन्निति द्व्रः अग्रद्वार
चितोऽभूत्वात्मन्येवात्मानं पश्येदिति श्रुतेः अथवा दान्तं दन्तघटितमाल्यमस्यास्याः तदुक्तं
कुमारीतंत्रे दन्तास्थिमालयावैवराजन्हेतेनमेहपणा विवासाः प्रजपेन्मंत्रमयुतं सर्वदेवते ॥८१॥
दामोदरपरायणेति विष्णुपरायणमाश्रयो यस्याः संदरीत्वेण पंचप्रेतासनारूढत्वात्
यद्वा उदरशब्दः परायणे परवर्त्तियन्नामसु उदरपरायणाः सर्पः इति यावत् तत्पर्यायिका
कोदरपदे उदरपदस्यान्तरवर्त्तित्वात् द्रामकटिसूत्रभूतः सर्पो यस्याः स्वमेखलायामथ देवि वा
स्ताकिरिस्मपनिषद्दर्शनात् ॥८२॥ दधीचिवरदेति दधीचिर्मुनिविशेषः तस्य वरदा रुद्रः
तत्तत्त्वं पिनीतपर्थः एवमाराध्यदेवेशं दधीचीमुनिसत्तमः आपावध्यात मध्ये वैवज्रास्थिनते
प्रयत्नतः इति लिंगपुराणोक्तेः यद्वा दधि श्रेयतिप्रसर्वयात्र इति दध्यद्रु. तस्मिन्दधीचिपुरुषे
उविभिन्नपदे तत्र वरदेत्पर्थः अंबतेः किंतेतस्य समस्य कृतेरूपं तदुक्तं महाकहानते च ततो
क्तेः उगपेनवापिदआवानकेणपयस्तापिवाप्तरपेदयेपात्राणिप्रशालेन सर्वं एवं तः ॥८३॥

ना॰र॰
टी॰
९०

दानवेंद्रविनाशिनीति दाशुद्धिः दाप्शोधने असमोभावे क्तियोवुत्पत्तेः उहेदोषः
उषवैकृत्ये भावेक्तप्रत्ययः अवतिगच्छतीत्यवः ततोनञ्समासः ततश्चाविद्यारूपेण
दोषणाशुद्धिः निःप्रपंचतं नअवतिगच्छतिउहदानवः अविद्यासंवलितइंद्रोंतरात्मा
अवूरक्षणेगतौकांताविति कल्पद्रुमः उइंद्रः शचीपतौवेनरात्मन्यादित्ययोगयोरिति
विश्वः तंविशेषेणाऽपुनराहन्तिरूपेणनाशयति ब्रह्मतादात्म्यापन्नंकरोतितथ्या
स्वेनरूपेणाभिसंपद्यतइतिश्रुतेः विशेषेणेतिसद्युक्तिव्याहतिः तत्राविद्यासंवलि
ततयापुनर्जीवभावप्राप्तेः ९४ दीर्घनेत्रेति दीर्घेअतीतानागतव्यवहितादिविषय
केइंद्रियेनेत्रेयस्याः दतिहेतुपंचमीवहुव्रीहिः सर्वज्ञातहेतुरितियावत् कथमीशा
नसर्वज्ञमलभेस्तेनयोथना इतिप्रश्ने एतद्विधोपन्यासेनअस्यास्तत्कारणत्वप्र
तीतेः हृदेवयोगीप्रत्तिवेत्तिवेत्तिसर्वमितिश्रुतेः ९५ दीर्घकचेति आयतकेशांता
त् यद्वामहादीप्तिमत्वात् कचदीप्ताविति तो धनर्थेकविधानात् यद्वा कचोवृह
स्पतिपुत्रः कचः केशोगुरोः सुतेइतिविश्वः सोस्याल्लिजनन्यत्वसंबंधेनेतिवृहस्प ९०

तिग्रहणे दीर्घ उत्कृष्टो ह्रस्व इति पाश्याः इति हेतुरेवमस्या बहुव्रीहिः यद्वा कचोऽस्या लि
भ्रान्तत्वसंबंधेनेति कचपदं गोतमपरं उत्तमत्वह्रस्वत्वयोर्भ्रान्तत्वेन तत्तु उभयोः कचगोत
मयोरपि भ्रान्तत्वात् अन्यत्सर्ववत् उक्तं वपेक्षाकारीयं यत्र प्रस्तावे इयं स्वात्मा गुरावह्नाततानां
र्थी गोतमादिभिरिति ९६ दीर्घनासेति स्पष्टार्थे दीर्घनासाः दीर्घजंघादी दीर्घांगीदीर्घ
जिह्विकामिति नवाक्षरव्याने तारिणीकल्पदर्शनात् ९७ दीर्घकेति स्वार्थे कप्रत्ययः स
र्वोत्तरमहिमशालित्वात् अत एव यद्वा प्रमेयत्वे गतात्वदीयदेहसंगता तथापि देवि पर्व
तात्मजेत वा स्त्रियाखर्वंनेति श्रीमत्पितृचरणाः ९८ दारिद्र्यडःखनाशिनीति दारिद्र्यप्रयो
जकं यत् डःखं अवशीकृतत्वं मनोरूपमिन्द्रियं तत् नाशयति वशीकरोति भक्तानामित्य
र्थः ग्रामादिर्ब्रह्मजिज्ञासायामधिकारिविशेषणत्वात् ९९ डष्टासुरनिसूदिनीति सुष्टुरा
यं तिवदंति सुराः देवा इति अस्मात् कप्रत्ययः तद्विपरीताऽसुराः अत एव तत्र डष्टाभेदा
न्वयः तत्राशहेतुत्वात् तथा च कौषीतकिब्राह्मणोपनिषदि देवोदासिं प्रतर्दनं प्र
तिवाक्यं अरुन्मुखान्यतीन् शालावृकेभ्यः प्रायच्छमिति ब्रह्मप्रतिपादकशास्त्रानवधा

ना॰र॰
टी॰
९१

रकत्परममोपनायकवाक्याभिधायकान्वायतीन् अशएपशम्भोऽहेदत्तवानित्यर्थः तत्रप्रा
णोस्मिप्रज्ञात्मेति तत्रत्यवाक्येप्राणपदस्यब्रह्मपरत्वात्त्वस्यब्रह्माभेदज्ञानवत्ताविंद्रेणाअ
हंप्राणोस्मीत्युक्तेर्नविरोधइत्युत्तरमीमांसायांस्थितत्वात् तद्वाक्यस्य ब्रह्माभेदज्ञानवादंद
वत्कत्वात् असद्धत्वनाशादेर्ब्रह्मकर्तृकत्वात् ७० दंभिकेति दंभयतिनुदतिअनिष्टार्था
निति कर्त्तरिएवुल् ७१ दंभदेति दंभोव्याजेनधर्मानुष्ठाने तथातिखंडयति तयानात्रैवेयकश्ण
स्वप्रणेतृत्वात् ७२ दांतेति सामर्थ्ययुक्तत्वात् तथावभामत्योवाचस्पतेमिश्रैरुक्तं दांतोह
षभःवहनसमर्थइतिगम्यतइति परास्यशक्तिर्विविधैवश्रुतेः ७३ दनुजेंद्रविनाशिनीति
दनोर्जातादनुजाः पंचम्यांजनेर्डः अन्यद्व्यक्तं ७४ दकारवर्ज्या धनधान्यप्रियेति धनपदंधा
तिरिक्तपरं तत्कामानांप्रियात्वेप्रतिहेतुत्वात् ७५ धन्येति धनेसाधुर्धन्यातत्प्रदत्वात् यद्वा
धन्याः पुण्यवंतः संत्यस्याः स्वामित्वसंबंधेनतया सधन्यः सचविज्ञानीसकविः सचपंडि
तइति कालीकुलार्णवोक्तेः धनदस्तवपुण्याल्लाभोमेत्रस्यास्यभवेत्प्रियेइतिफेत्कारिणीवचना
त् ७६ धनेश्वरधनप्रदेति कोशाधिपःकुबेरोपि इतिकवचप्रस्तावेभैरवीतंत्रोक्तेः ७७ धमि ९१

णीति आनंदादिधर्मवत्वात् तदुक्तं पंचपादिकायां आनंदविषयानुभवो नित्यत्वचेति तेन·
ब्राह्मणोऽभिन्नत्वेपि पृथगिवावभासेत इति ७८ धार्मिकेति धर्मः पुण्ये धर्मे न्याये इति वि
श्वः धर्मो धर्मोऽस्यास्तीति स्वार्थिकतद्धितांतत्वात् अत इनिठनाविति ठन् ७९ धर्म्येति ध
र्मादनपेतत्वात् धर्मपथ्यर्थन्यायादनपेत इति यत् चित्तशुद्धिमुद्दिश्य प्रवृत्तत्वात् यागादेस्त
द्वारा श्रवणमनननिदिध्यासनज्ञानमिति वाचस्पत्यादौ व्यवस्थितत्वात् ८० धर्माधर्मप्रवाह इती
ति विहितक्रियासाध्यपुंगुणो धर्मः निषिद्धक्रियासाध्यस्त्वधर्म इत्युदयनाचार्याः तथा
च श्रुतिः एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्नीयते एष उ एवाऽसाधु कर्म
कारयति तं यमधो निनीषत इति नचैवं रागद्वेषप्रसंग इति वाच्यं पुण्यः पुण्येन कर्मणा भ
वति पापः पापेनेति पूर्वकर्मसदसत्वस्यैवोत्तरकर्मसदसत्वनियामकत्वादिति स्थितमु
त्तरमीमांसायां द्वितीयाध्याये ८१ धनेश्वरीति तद्दानाधिकारत्वमत्वात् ८२ धर्मदात्रीति
धर्मं यागादिक्रियां द्यति खंडयतीति धर्मदाः तेषां अत्री भक्षिका धर्मशब्दोऽदृष्टजनकक्रि
योऽधर्मदात्रीति धर्मं यागादिक्रियां द्यति खंडयतीति धर्मदाः तेषां अत्री भक्षिका धपर इति

ना॰ रा॰ टी॰ ९२ मीमांसकाः अदभ्रलक्षणेऽन्यस्मात्तेजेन स्वर्गस्त्रेभ्योऽडीषिति ङीप्प्रत्ययः ८२ धर्मानन्दप्रवर्द्धिनीति
धर्मजन्यानन्दं प्रवर्द्धयतीति तथा श्रुतिः ये शतं गंधर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो
ये कर्मणा देवत्वमभिसंपद्यन्त इति श्रुतेः धर्मेण येषां देवत्वप्राप्तिर्भवति ते कर्मदेवा इति व्याख्ये
यं देवत्वममरैश्वर्यमिति शाङ्गकब्रह्मसंहितोक्तेः ८४ धनाध्यक्षेति धनं पुष्टिं नाथ्यते प्रार्थ्य
त इति धनाधिः धशब्दः पूर्वं व्याख्यातः नाथ्यना याच्ञोपतापैश्वर्याशीःष्विति गणत्स्यत स्मृ
ये यस्यां पुष्टिकामैरध्रिस्यमानत्वात् ८५ धनधान्येति धनैर्वा धान्यैर्वापि सम्भवेन्मम पूजकः
त्युक्तेः ८६ धनाढ्येति नित्यपूर्णत्वात् प्राप्तकाम इति श्रुतेः ८७ धनतोषितेति धनपदस्य
निधिपदेन पृथिव्यादिवाचकद्रव्यपदेन वा समानार्थकत्वात्तत्र वसंख्ययरत्नपानवमीपरत्वे तत्रतो
षिता तथा च भविष्यपुराणे मासि मासि पुजेदीरं शुक्लपक्षे त्रिशूलिनी नवम्यां पूजयेद्यस्तु
तस्य पुण्यफलं शृणु अश्वमेधसहस्रस्य वाजपेयशतस्य च तत्फलं लभते वीरदिविदेवगा
णैर्वृतः ८८ धीरेति धियं बुद्धिविशिष्टज्ञानं राति ददाति भक्तानामिति तथा यद्वा धियं
ईरयति प्रवर्त्तयति परमात्मरूपत्वात् धियो यो नः प्रचोदयादिति श्रुतेः ८९ धैर्यवतीति धर्मा ९२

र्यैकामसंयुक्ताशुभाशुभसमन्वितात् धवसायादवलनं स्थैर्यमित्यभिसंहितमितिभरतः १०
धवेति जिघृक्षाप्रागल्भ्यपरत्वस्मात्कर्त्तरि भवगीयेत्यादिनाकृतिगणत्वाद्यप्रत्ययः कर्मप्रवच-
नीयेतिप्रयुंजानेनसूत्रकृतातस्याकृतिगणत्वज्ञापनात् स्पष्टंकृतंवेदवत्वर्थे तात्पर्यंशुद्धौउदा-
यनाचार्यैः ११ धवलांभोजसन्निभेति कर्मविशेषेस्तेनवर्णेनविन्नीयत्वात् १२ धारिणीति
पालकत्वाधारकत्वाभ्यांधारयतीतितथा १३ धरणीति भूरूपत्वात् धरिणीति पाठांतरं
धरः पर्वतोस्त्यस्याः स्थापनस्थानत्वात् उजरेपर्वतेवापिनिर्जनेवाचतुष्पथे इतितंत्रांतरात् १४
धात्रीति धात्तवियंधात्री तस्यदमित्यणंतात्डीप्प्रत्ययः तथाचभविष्यपुराणे पूजयित्वाम-
हादेवीनवम्यामत्रचंडिकां महत्त्वंप्राप्नुवन्वीरब्रह्माविष्णुस्तथापराः तस्मादियंमहापुण्यान-
वमीपापनाशिनी उपोष्यासाध्यतेनसततंसर्वपार्थिवैः १५ धरीशेति धराबसुविशेषास्ते
षांसमुदायघटकत्वेनेतिधरिणोवसवः तेषामीशानउपास्यत्वात् आदित्यैर्वसुभिः साध्ये-
रितिमहाभारतात् ज्यासेत्यमित्यन्वयः १६ धवलास्यदेति धवलः सुंदरेसिते महादेवाप्यय-
वलीसौरभेय्यामुदाहृतेतिविश्वः वर्णादिभेदात्संज्ञाः स्युः शवलीधवलादयइत्यमरः तयोरास्यत्वं

दानोद्देश्यत्वेयस्याः तथाचहेमाद्रौभविष्यपुराणे हर्षेणलोकिनेयश्चभगवत्यैनिवेद-
ता॰रा॰ येत् ग्रामसमंसमकुलेमहादेवलयंव्रजेत् तथा यश्चोभयमुखींगांतु भगवत्यैसुशोभ-
टी॰ नांसमद्वीपांधरांदत्वायत्फलंतदवाप्नुयात् पूर्वोक्तैर्ददातीतिशेषः ९७ धार्मिकेति धर्मा-
९३ नुष्ठानप्रियत्वात् तथाचकूर्मपुराणेदेवीवाक्यं वेदार्थवित्तमैःकार्यंमत्स्मृतंकर्मवैदिकं
तत्प्रयत्नेनकुर्वंतिमत्प्रियास्तेहिनेतरा ९८ धर्मसहितेति तदुक्तंकौर्मे पूर्वंपितामहेन ध-
93 र्मिमनुव्यासादयःपरं स्थापयंतिममादेशाद्यावदाभूतसंप्लवं ९९ धर्मनिंदकवर्जितेति
तथाचभावचूडामणौ कुलशास्त्रेषुयेपापागर्हिकुलनाशनं स्वकुलेमहतीनिंदापरत्रेयेभा
कुलेश्वर तस्मादपिमहापापंपशुसंगात्प्रजायते इत्यादि कौर्मेपि श्रुतिस्मृत्युदितंसम्य-
क्कर्मवर्णाश्रमात्मकं अध्यात्मज्ञानसहितंमुक्तयेसततंकुरु धर्मात्संजायतेभक्तिर्भक्त्या
संजायतेपरं श्रुतिस्मृतिभ्यामुदितोधर्मोयज्ञादिकोमतः नान्यतोविद्यतेधर्मोवेदार्था-
त्साहिवर्त्तते तस्मान्मुमुक्षुर्धर्मार्थीमद्रूपंवेदमाश्रयेत् ममैवैषापुराशक्तिर्वेदसंज्ञापुरात-
नी ऋग्यजुःसामरूपेणसर्गादौसंप्रवर्त्तते तेषामेवतुगुप्त्यर्थंवेदानांभगवानजः ब्राह्मणा ९३

दीन्समर्जोयस्वेस्वकर्मणएयोजयेत् येनकुर्वंतितंधर्मंनदर्थंब्रह्मानिर्मितं तेषांमध्यस्लान्तर
कांस्तामिश्रादीनकल्पयत् ८०० वाक्यप्रमाणएयेदसागरपारगस्यलक्ष्मीधराभिधबुधस्यतन्
ज्ञवेन विश्वेश्वरेणविहिते गिरिजाभिधार्थचिंतामणेमयमगान्नवमोमयूखः प्रणमदमर
मौलिप्रोतमाणिक्यदीपावलिसमुदितरोचीराजिनीराजनीयं सकलकमलेवशप्राप्तसा
म्राज्यमंघ्रिद्वयमवलम्बनायाःभावुकेनःप्रतायात् अथनवममयूखस्यव्याख्यानं नुवीनेति
नवशब्दाभ्यासार्थेत्वप्रत्ययः नवत्वंचअनादित्वेपिपिकारानुदयात् तथाचपंडितवरेणैकम्
विरचितश्चिरंतनीस्तुतेगपीवरस्तनीत्यादि यद्वानविद्यते २ विधिाहृग्भुर्नियामकोयस्या
इति नकारेणसमासः नचास्यकश्चिजनितानचाधिपइतिश्रुतायतराणांमंत्रवर्णात् १
त्नीरजेतिहृदमध्यसमुत्पन्नत्वात् यद्वारजोहीनत्वात् तमोवावीतमोऽदंतोरस्वावावीरज
स्तथेतिद्विरूपकोदादकारांतत्वे २ निंदेति निंदतिजाड्यंपदेत्यानुनकारानूवाहिनस्ती
तिनिंदा णिंदिकुत्सनेइतिकल्पद्रुमस्यवकारात् हिंसेचितिकामधेनोआख्यानात् ३
निम्ननाभिरिति निम्नंगभीरंगंभीरमित्यमरः उदयसामुद्रिकोक्तत्वात् यद्वानाभिंदधाः

जपस्यविहितत्वात् तिलपुष्पसरोवरमितिमन्त्रस्यसत्त्ववचनात् सरोवरपदेनतत्रनाभि
विवक्षितत्वात् ४ नगेश्वरीति नगानां स्वर्णपर्वतादीनामधिष्ठातृत्वात् नगपदं स्तन
परं वा पर्वतेहस्तमारोप्यनिर्भयोऽखेदमानसः कवितांलभतेसोऽपिअमृतत्वंचगच्छतीति
तिगयर्वतेत्रेजपविधानात् ५ नूतनतांभोजनयनेति नूतनः प्रशस्तः नेतनमस्कारोयेनता
दृशः अंभोजनयनोविष्णुर्यस्याः एतस्तुतौ दीर्घता कुटादिः अतएवपरिणताखिलो
दय इति भागवतेदीर्घ इतिश्रीधरव्याख्यायाः प्रामादिकत्वंमनोरमायामुक्तं ६ नवीनांभो
जसुंदरीति सुकुमारत्वात् वर्णसाम्यविवक्षायांतु अंभोजंनीलंग्राह्यं यद्वा नवीनं सृष्टौ
प्राथमिकं अंभोजं लयस्याः नाटशास्य अजस्य ब्रह्मणः सुंदरी तदाराध्यत्वात् अपएवस
सर्जादौतासुवीर्यमयासृजदितिस्मरणात् जलस्यादितत्त्वखेनरमाविभूतसृष्टपदंयैव
अन्यथा एतस्माद्वा आत्मन आकाशःसम्भूतइत्यादिविरोधादितिस्थितमुत्तरमीमांसा॰
यां ७ नागरीति वैदग्ध्ययुतत्वात् विशेषवैदग्ध्ययुताः सर्वाएवकुलांगनाइत्युत्तरतंत्रा
त्वात् गणिकानर्त्तक्यादिवीरचूडामणिवचनाच्च तृतीयरूपत्वात् ८ नागराजेष्टेति तथाच ९४

भारते पूज्यसे त्वं महाभागे पातालतलवासिभिः अनंतप्रमुखैर्नागैस्तथान्यैस्तक्षकादिभिः रा
ज्येति पाठे पिकलिंगः पूरइतिवत् छंदयात्रस्यानामेव ग्रहणं सर्वेषां पूजकत्वप्रतीतिः अनंतप्रयो
जने यदाश्राज्ञं पृष्टेनेनेन हृद्याग्रपिच्छिन्नाज्यक्षाराद्विधानात् तथा च भविष्यपुराणे कृताभिषेकं
यः कुर्यादहोरात्रं नराधिपः सहस्रधारेणतामनेण भगवत्याः विचक्षणः मासि चाश्वयुजे वीर
नवम्यां श्रद्धयान्वितः गीतनृत्यप्रदानैश्च शंखवादित्रनिस्वनैः कुर्याज्जागरणं चैव नानापुष्पो
पशोभितं सर्वपापविनिर्मुक्तो दिव्यतेजोमयस्तथा मोदते दुर्गया सार्द्धं ब्रह्मलोके महीयते ५
नगराजसुतेति हिमवंतं वशैलानामिति राज्यप्रकारेण हरिवंशात् यद्वा न विद्यते गरं विषं तत्
न्नूपः अजसुतो ब्रह्मपुत्रो यस्या इति हेतुपंचम्या बहुव्रीहिः न विषब्रह्मणः पुत्र इति वचनात्
विषविकारनाशिकेति यावत् विषक्षयकरी विद्या अमृतत्वप्रदायिनीति मत्स्यसूक्तात् १०
तोगति नगा वृक्षेति नगागमनस्य मत्तैर्धर्मत्वात् तदभावे व्यापकत्वलाभात् ११ नागराजगतिरिति
नगपदस्य स्वार्थं तद्धितांततया नागानां हृन्नाणां राजेति पारिजातग्रहणं तस्यैव गतिर्यस्याः वांछि
तार्थदत्वात् १२ नागराजमाल्यविभूषितेति महापद्माख्यनागरूपमालालंकृतत्वात् यद्वा नाग

राः शरीरसंबंधिनः अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकमित्यादौ पुरशब्देन शरीरव्यवहारात्
अजाः जीवाः तेषां मालेव मालं परंपरेति यावत् तत्र विभूषिता शुद्धब्रह्मरूपत्वात् १२ नगेश्वरी-
ति श्लेष्मातकेंकरंजेवेत्यादीनां कुलवृक्षाणामधिष्ठातृत्वात् १३ नगात्मजेति हिमवत्कैला-
सादाववस्थानात् यद्वा नगम्यते ज्ञायत इति नगा वक्ष्यमाणेनो अरूपात्रूपादिहीना तद-
विषयत्वात् शुद्धब्रह्मणः शब्दशक्तिगम्यत्वाभावात् शब्दजन्यवृत्त्युपहितत्वेन वृत्तेश्च मिथ्या-
त्वेन तदुपहितस्य शुद्धत्वाभावात् अत एव श्रुतिः यतो वाचो निवर्तंते अप्राप्य मनसा सहेति १४
नगराजकुलेश्वरीति हिमवद्वंशप्रधानत्वात् यद्वा नगरो दोषहीनो ऽजो विधिर्यत्र गरपदे ला-
क्षणिकं तादृशकुलस्य पित्रादेस्तस्य ईश्वरी स्वकुलेनापि भागमात्राधिगम्येति यावत् तदुक्तं
रहस्यादाहृते कालीकुलार्णवे मंत्रस्य ज्ञानमात्रेण कुलकोटिं समुद्धरेत् नंदंति पितरः सर्वे
गाथां गायंति ते मुदा अपि नः स्वकुले कश्चित्कुलज्ञानी भविष्यति १५ नवीनेंदुकुलेति दूती-
रूपेण कामशास्त्रप्रसिद्धार्धचंद्राख्यनखदंतविशेषालंकृतत्वान्नवत्वात् यद्वा नवीनेंदुवत्कंस
वलाति गृह्णाति जनकत्वसंबंधेन स्वीकरोतीत्यर्थः १६ नंदीति मंगलहेतुत्वात् तथा च मदनः ९५

श्रीशीर्षवनसंयुक्तानित्यं यस्मात्प्रयुज्यते देवद्विजनृपादीनां तस्मान्नांदीति गीयते नंदस्यापत्यं
स्त्रीनांदीति वा बोध्यं १८ नंदिकेश्वरवल्लभेति नंदः स्यान्नंदिकेश्वर इति हलायुधः नंदिनाशि
वत्वल्पतेति स्कंदपुराणे यामाराध्यशिवेति शेषः लिंगपुराणे सर्वलोकाधिपत्यं च गणेशतां
तथैव च दातुमर्हसि देवेशि शैलादिस्तनयो ममेति देवीवाक्याच्च १९ नीरजेति नितरां इरा
वाणी यस्याः सा नीरा प्रतिवादीन् जयति अभिभवतीति नीरजा तदपकर्षहेतुत्वात् इरा भूवाक्सु
रा प्सु चेति मेदिनी २० नीरजाक्षीति षष्ठ्यर्थे यद्वा रः पावके वह्नौ त्रणोवेति विश्वः रादग्नेर्निः
क्रांता नीरः स्कंदः तत्र जाते तदासक्ते अक्षिणी यस्याः पुत्रत्वेन स्नेहविषयत्वात् २१ नीरजं
हल्लोचनेति रजोगुणकार्यात् हर्षात्सखेदः खेदनिःक्रांतं लोचनं ज्ञानं यस्या इति विषयत्वार्थ
कषष्ठ्या समासः २२ नीरप्रसूनेति दशाहसूतीद्वणार्यः मादृशाड्डः खादिकं प्रसूनमिति किंपु
तस्याभावो वा रप्रसूतात्तेनोनिःक्रांतानि रादयः क्रांताद्यर्थे पंचम्येति समासः २३ नीरमवेति
नितरां इरा वाणी येषु तानि नीराणि यानि नदज्ञाणिनानि वानि प्राप्नोति तथा तन्न्यासस्य प्रप
न्नत्वात् तथा च सर्वाण्येवेतंत्रे रोहिण्यादि महान्यासकृतानरवरः सखीः रोहिणीस्तत

ना॰रा॰
टी॰
९८

वनस्थानमपूर्णो योभवतिफ़वं गयपयमयीवाणीसमार्योत्तसजायते अदृष्टाकृतपाश्रा॰
णावाख्याताभवतिफ़वे अकृतातारकाभ्यामंता रिणीपूजयेयदिशातलद्व प्रजमोपिनमंत्रः
सिद्धिदायकः २४ नीरनिर्मलदेहिनीतिजलवत्स्वच्छशरीरत्वात् यद्वाजलेपूजाविधानात्
अप्सुगौरीहृदयेसूर्येइतिपूणतानयवचनात् जलस्थांवाशिलास्थांवापूजयेत्परमेश्वरीमिति
योगिनीतंत्रवचनात् २५ नागयज्ञोपवीताढ्येति नागानांयज्ञेवधहेतत्वेसंवयः उपवेति
प्राप्नोतिपरिशोषवीः सर्वसत्रसमाप्तिहेतुस्तत्ककइतियावत् तदागमसमयेआस्तीकेनतत्र
निवेषकरणात् यद्वासर्पसत्रप्रहतिहेतुतादेवतमुहः तत्कृतपरिरक्षितयादेवजनमेजयेनतत्
दारंभात् तस्यइतेप्रापेतेनआप्या जटासनेतः अविणावततदाकइत्युपनिषद्दर्शनात् २६ ना
गयज्ञोपवीतिकेतिजकारोगणेशइत्येकाक्षरकोशः अतएवगंगाणपतिंअवितपीलमस्य
ति गवीतिशाहृत्खंडे पदाधरमित्रेव्याख्यात तेयातिजनकतेनेति गयः शिवः तंजानातिग
यज्ञः तद्विपरीतोऽगयज्ञः वालरूपशिवान्नमित्तंइद्रइतियावत् नविद्यतेतन्निर्मिताउः शि
वः तत्रिष्टापर्वेवेत्रस्यर्इनिरूपद्रवोयस्याः तथाचभारतेशांतरुद्रीये वालमेकगतेकृतास्वयंप ९८

वशित्वे पुनः उमां जिज्ञासमानो वै कोयमित्यब्रवीत्सुरान् अस्मयत च शक्रस्य वज्रेण प्रहरि
ष्यतः बाहुं सवज्रं तेन तस्य क्रुद्धस्यास्तंभयत् यक्ष इत्यादिना देवानां ब्रह्मप्रसंसत्तु निंघात्का ततः प्र
सादयामासुरुद्वहमो हङ्कते च ततः अभवद्बाहुः पुनर्बाहुर्यथाप्रकृति वज्रिणः २७ नागकेसरसंतुष्टे
ति नृनि पुष्पं च केसरमिति मत्स्यसूक्तात् नगे भवो नागः सवासौ केसरः केसरवान् चेति नाग
केसरः सिंह इति यावत् तेन संतुष्टा तद्वाहनत्वात् शूलिन्यां सिंहस्कंधाधिरूढेति अपि च सारा
त् महिषमर्दिन्याः प्रागुक्तमत्स्यपुराणात् एतदेवे सिंहपृष्ठसमाश्रितामिति मुण्डमालावचना
त् यद्वा केसरपदेन बकुलपुन्नागपरं बकुलैर्हेममात्रेण सौभाग्यं लभते नरः मल्लिकाजातिपु
न्नागकदंबैः पुष्टिमाप्नुयादिति सिद्धसारस्वतात् सिंहकटायां पुन्नागकिंजल्कबकुलेष्वपि इति
केसरशब्दार्थेषु विश्वः २८ नागकेसरमालिनीति नागहस्तिनः कंशिरो य— सः नागको ग
णेशः तत्र सरति तदुपादानोऽहङ्कारेन विषयकापरोदानानवतेनेति नागकेसरा हलदंतादटनिस
प्रम्याग्रनुक् मालिनीति व्रीह्यादित्वादिनिः द्वयोः कर्मधारयः यद्वा मालाकारस्य कन्या च
नवकन्याप्रकीर्तिता इति कुमारीतंत्रात् सप्तवर्षकुमारीरूपत्वाद्वा सप्तमिमो मालिनी सासादा

ना॰
टी॰
५८

97

दितियामलोकेः वामनपुराणे मालिनीस्तुस्मीत्यास्थायपमुद्धर्त्तेनेशुभे देवीमुद्धर्त्तयामासकरां
भोकनकप्रभा इतिप्रक्रम्य ततःसागतवायोशैलेयीस्वमलाद्गजाननं चतुर्भुजंपीनस्कंधंशुभलं
क्षणान्वितं हृष्टोत्ससर्जभूम्यावुस्थितंमहामतिशुभरित्यादि मालिनीहंसभेदस्यान्मालाकार
स्त्रियामपीतिविश्वः २९ नवीनकेनकीकुंदमकरंदप्रपूजितेति नवीनमनतुभूतस्पर्शंकेतकद्य
इतंशामंयत्केसरंवं केवलेति कांदेरेपि नाविकितंसंप्रत्पश्रिभिःषट्पदेःपुरात्त तत्रात्मनश्च
तीति नवीकेतकीकंजनात्किंप्र नाटशेनभक्तेन कुंदैर्मकरंदैर्मधुमिश्रप्रजिता प्रपुराण
शाक्तप्रवक्ष्यामिपुष्पाध्यायसमासतःइत्युपक्रम्य कुंदपुष्पैस्त्रिरीठकैरिति देवीपुराणात्
मधुपायसंसंयुक्तंइतिवचनाद्बलिरिनेनमकरंददानं यज्ञातर्पणविधानात् मधुनातर्प
णं देव्याः सर्वकामफलप्रदं मंत्रसिद्धिकरंसाक्षान्महापातकनाशनं इतिमत्स्यसूक्तात् २
नायिकेति नायकंपातिशक्रस्तुनायिकांतुसरस्वतीति भरतोक्ते नाट्येसरस्वतीरूपेणान
द्र्तकत्वात् ३१ नायकप्रीतेति नायकःशिवः तद्विषकप्रीत्याश्रयत्वात् ३२ नायकप्रीतिते
षितेति नायकनिष्ठप्रीतिविषयइत्यर्थः आदौवाक्ष्वित्रियाणाद्द्यालंकारिकवचनात् अने ५८

तरेनायकानुरागकथने ३३ नायकानंदनिलयेति नायकोनंतरिंखेहेहारमध्यमणाव
पीतिविग्रः श्रेष्ठस्यआनंदस्यमोदनस्यजनिकावाराणसीनिलयआश्रयोयस्याः वाराणस्यां
विष्णलादीतिमात्स्यात् सनत्कुमारसंहितायां येयेभिवांछंतिसमस्तभेषानिहापि
मुक्तिंपरंतोप्यविप्र तेभ्यः समस्तंददतीभवानीवसत्यजस्रंहृहिणीमृडस्य ३४ नायका
नंदकारिणीति नविद्यतेआयोयस्य नायकः स्वाभाविकइतियावत् तादृशआनंदो
मोदनः विस्मृतकंठचामीकरवदप्राप्तेनगम्यमानस्यस्वात्मरूपानंदस्यप्राप्तिर्ज्ञानेनतु
तस्यव्यक्तनः प्राप्तिर्ब्रह्मणोनित्यसिद्धत्वादितिवेदांतिनः ३५ नायकप्रेमसहितेति न
विद्यतेआयोभागोयस्याः स्वंचयस्यकारणव्यतिरेकेकार्यानुदयात् तद्विषयकप्रेमयुक्ता
दीनानुग्राहिकेतियावत् अयः शुभावहोविधिरित्यमरः ३६ नायकप्रेमतोषितेति
नयतिसेवकंप्रापयतिनायकं प्रेमभक्त्याख्योभावविशेषः तेनतोषिता रतिर्देवादिवि
षयेत्यनेनकाव्यप्रकाशगदोरतेरेवभावत्वव्यवस्थापनात् ३७ नायकानंदनिलयेति
नायानीतिः श्रीतीर्थवोरूपसर्गाइतियत् तेकायंतिवदंतीतिनायकाः सूक्तिवेत्तारः

प्रणस्तत्राइतियावत् एतेषामानंदस्य भीतेर्निलंघ्यगहनत्वंयाति तथाभक्तानांविद्व
तारा॰ त्तोनिजनकपांडित्यहेतुत्वात् तदुक्तं तस्यपांडित्यकलनाद्धिविज्ञपदकल्पनात्
टी॰ देवाअपिविलज्जंते किंपुनर्मानवाभुवि ३० तापकानंदकारिणीति तपंतिभक्ति
५८ विषयत्वप्राप्नुवंतितापकाः तेषामानंदस्यवर्धनस्याभावेऽप्यानंदकरोतितथा तदुक्तं
काशीखंडे असौवंदीमहादेवीनित्यंत्रैलोक्यवंदिता निगडस्थानपिजंतूनाशु
मोचयतिस्मृता ३१ नर्मकर्मरतेति नर्मणालोकार्थंलीलयाकर्मणिरता उ
क्तासंबंधेनप्रयोजनवत्तयैवकर्तृत्वादीश्वरस्यप्रयोजनेच्छाविरहात् कथंकर्तृ
त्वमित्याशंक्य द्वितीयेशारीरकमीमांसासूत्रं लोकवत्तुलीलाकैवल्यमिति प्र
योजनेच्छाव्यतिरेकेपिराजादीनांलीलारूपचेष्टासुकर्तृत्वत्तया जगत्सृष्ट्यादेरी
श्वरकर्तृकलीलाकैवल्यमित्यर्थः ३२ नित्येति तथावज्ञानार्णवे अतएवमहा
विद्यामहात्रिपुरसुंदरी नित्येतिकथ्यतेदेविचित्कलापरदेवता ३३ नर्मकर्मपराय
णेति नर्मणालीलयाकारणमानपेक्ष्यैवेतियावत् कर्मणांयागादीनांपरायणा ५८

यागस्वर्गादीनांकार्यकारणभावविषयसाक्षात्काराश्रयत्वेनईश्वरसिद्धिरितिनाकि॰
काः तदुक्तंकुसुमांजलौ प्रमायाःपरतंत्रत्वात्सर्गप्रलयसंभवात् तदन्यस्मिन्ननास्था
सात्रविधांतरसंभवः ४२ नर्मकर्मप्रियेति नर्मणाफलानभिसंधिनाकृतंकर्मप्रियंयस्याः
ज्ञानेनकर्मयोगेनभक्तियोगेनवापुनः सर्वसंसारमुक्त्यर्थमीश्वरंशरणंव्रजेतिकौर्मेदे
व्युक्तेः ४३ नामीति त्वंपदंजीवात्मपरं तद्विषयिकासाक्षात्कारविज्ञाने तस्यादयंत्रा
त्रायतयेति त्राणप्रत्ययेहब्रह्मादौवत्तये जीवानांअन्यजीवसाक्षात्काराभावादीश्वरात्म
त्वंलभ्यते ४४ नर्मकर्मपरायणेति नर्मैवअसाधारणंकर्ममासांतास्त्रियःपरायणंइष्टा
यस्याः आश्रयेतत्पराभीष्टपरायणपदंविदुरितिशाश्वतः तदुक्तावविंतपुष्पंतदुक्तावचि
तंजलं तदुक्तावावतंभोज्यंदेवताभ्योनिवेदयेत् इतिवचनात् ४५ नर्मप्रीतेति विपरीत
रतातत्रकालिकांहृदयोपरि इतिवीरचूडामणिवचनात् क्रीडासक्तत्वात् ४६ नर्मप्री
तेति शिवेनसमंपरिहासविधानात् तथावतत्प्रसंगेपस्यपुराणेशिवोक्तिः हिमाचल
स्पृष्टेगोस्मिमेघमालाकुलैर्मनः तथाऽवगाहिभ्योगाहनेभ्यस्तदाशयः तत्रैवदेव्याउक्तिः

नारा॰
टी॰
९९

99

बालेभ्योनेकजिह्वं तेभस्मनःस्नेहवंधना हृत्कालुष्यंश्रशांकान्तेडुर्वोधतंहृषादपि ४७
नर्मधर्मपरायणेति नाट्यश्रणसेवकैशिकीहृत्संगविशेषस्यनर्मसंज्ञा तदाह भरतः तु
ष्टात्रीयधार्यंसोपालंभकहृणानुवंधंस्वात्मोपदोपकृतंविप्रलम्भकृतंकर्म तदेवयुर्मौ
गुणीयस्येतिनाट्यंपलभ्यते अंगगुणस्यापिपरंपरयाप्रधानगुणत्वात् तत्रास्त्केत्निनटी
हृपतेलक्ष्ये इदंचनटिनीयद्विणीन्तपेणवोध्यं त्रैलोक्यमोहिनीगौरीविचित्राम्बरधारि॰
णी विचित्रालंकृतांरम्यानर्तकीवेशधारिणी इतिभूतडामरवचनात् नटीकायालि
कावेशपतिहृत्यामन्त्ररतंत्राद्या ४८ नर्मकर्मैकसहितेति नर्मकर्मक्रीडार्थंकर्म भोगास
क्त्यादिकंपंपकेमुखेनयास्यतिपरित्यजतीति स्पतेःकप्रत्ययः तस्मैहिता भक्त्यात्पतनत्यया
तानमज्ञावेपरमाश्रितः सर्वयज्ञतपोदानैस्मदैवार्चयसर्वदेति कौर्मेदेवुक्तेः ४९ नर्म
कर्मैकपालिकेति नर्मकर्मणाधकामुखारादिकाश्रालिःसखीयस्याःपातेःकः प्र
त्ययः विवाहकालेमालिन्यागौरीमुखेनयाविधानात् तदुक्तंवामनपुराणे ततोहरः
त्रिमालिन्यागृहीतोदायकारणात् किंयाचसेमदीयांत्रियाचस्वेतिहरोब्रवीत् इत्यादि ५० ९९

नरनारीगुणप्रीतेति नराणांनारीविषयेयेगुणाः अक्रोधादयस्तैप्रीता कुलस्त्रीवीररति
दोषनद्भवस्यापहारणं स्त्रीषुरोषंप्रहारंचवर्जयेत्साधकःसदेतियामलात् ५१ नरनारीवरप्र
देति नराणांनारीरूपवरप्रदात दिष्टस्त्रीदानात् यद्वानरस्यदेवताविशेषस्य जननीनारी
धर्मस्त्रीतद्रूपवरस्यदत्तायदानात् धर्मस्यदत्तदुहितर्येजनिष्टइतिभागवतात् दत्तकन्यानां
देवेशजनकस्यप्रागुक्तत्वात् ५२ नारायणप्रियेतिमंत्रभेदेषुपंचाक्षीमुक्ता एषानारायणा
पास्याविद्यासर्वसमृद्धिदेतितंत्रांतरात् ५३ णिदेति णिदत्तुंचने दुंचनपदंचात्रसंयोग
मात्रपरं निदत्तेसर्वद्वाणिपचादित्वादच् एतेनवाचकत्वंलभ्यते ५४ मिष्ठावर्णेति नि
ष्ठावर्णोल्लेकरणेमयात्रेहेयपतेपिवेतिनिष्कशब्दार्थेषुविश्वः यद्वा लभेस्वर्णनिभांस्मरे
दितितंत्रांतरात् ५५ नकारहेति नकारःस्वागतेवंधेस्तुतोहदेवकीर्तितइतिएकाक्षरको
षाःनमस्कारस्यकारःकरणंयत्रतंहंतितथा नमस्कारादेःप्रयवधहेतुत्वात् यंनमंतिमहा
देविषोढापुटितविग्रहाः अल्पायुःसमवेत्सद्योदेवताकोपतेभियेतिनीलतंत्रात् ५६ न
कारव्रज्या पुष्पप्रियेतिपुष्पंविकासवत्प्रियंयस्याः इतिपंचम्यावहुव्रीहिः आत्मरूपपद

ध्यासभेदेन धनादिषु प्रियत्वेन नानाविधं समग्रमस्ति आत्मनस्तु कामाय सर्वं प्रियं भवती
तारा॰ तिश्रुतेः ५७ पुष्परतेति पुष्परताः भ्रमराः मधुपानप्रसंगात्तेसंत्यस्याः तद्घटितश
टी॰ रीरत्वात् तदुक्तं मार्कण्डेयपुराणे यदारुणाख्यस्त्रैलोक्येत्यारभ्यः वधिष्यामि महासुरं॥
१०० असंख्येयाः बहवः षट्पदायत्रेति तद्व्याख्यातारः तथा च वामनपुराणे यदारुणाख्यो
भविता महासुरस्तदा भविष्यामि हिताय देवानां महालिरूपेण विनष्टजीवितं कृत्वा स
मेष्यामि पुनस्त्रिविष्टपं ५८ पौष्पीति भीमादिवत्पुष्पपदे पुष्परागरत्नपरं तस्येयं तन्म
यप्रतिमाविधानात् रत्नयाततमयीमिवेति देवीपुराणात् ५९ पापपरायणेति पवते यः स
माख्यातः कृत्यकादंतरकोशः आपमयं आपोवहणः तदाश्रयत्वात् परायणपदे भावप्राधान्यमा
श्रित्य बहुव्रीहिः वरुणेन जलैश्वर्यं वायवं वायुनापदमितिस्कादात् यदाराधनात्प्राप्तमित्यन्वय ६०
पौष्पी प्रियेति पुष्परागरत्नमयमालायाः प्रिया यस्याः सर्वं मणिमयं तावदायुरारोग्यसिद्धि
दमिति जयमालायां नारदपंचरात्रोक्तेः हृद्धि निमित्तस्य वतद्धितस्य रक्तविकारे इति सूत्रवज्ञा
वनिषेया दूपसिद्धिः ६१ स्रग्गुप्स्येति स्रगशब्दोत्र प्रणामात्रार्थकः पकारादिनामक्रमात् १००

पूजनेहयार्थेकान्यः यद्वा पुष्पंस्रजेगच्छतीतिभ्रमरग्रहः तन्मयीज्यामौर्वीयस्याः पाशांको
दंडमिक्षुदंडमिलिगुणमप्यंकुशंपंचबाणानिति शाणप्रतिष्ठाध्यानेप्रपंचसारात् ८८
पुष्पदाममविभूषणेति तथाचदेवीपुराणे अग्निहोत्रपरेविप्रेवेदवेदांगपारगे सुवर्णे
नोसुवर्णेनाशनेदत्तेतुयत्फलं तत्फलंलभतेराजन्पूजयित्वातुचंडिकां माल्ययाविल्वप
त्राणांनवम्यांगुग्गुलेनच मालावद्धेनसंपूज्यदुर्गांदेवींनराधिप मालावद्धेनगुग्गुलेनान्य
न्वय इतिविस्तुधर्मोत्तरे विल्वहृदत्तस्यपत्राणांराजसूयफलंलभेत् करवीरस्रजाभिस्तु
पूजयेद्यस्तुचंडिकां सोग्निष्टोमफलंप्राप्यदुर्गालोकेमहीयते वकपुष्पस्रजाभिस्तुपूजयेद्य
स्तुचंडिकांराजसूयफलंप्राप्यशक्रलोकेमहीयते कुशपुष्पस्रजाभिस्तुपूजयेद्यस्तुचंडि
कां सोग्निष्टोमफलंप्राप्यमारुतलोकेमहीयते शमीपुष्पस्रजाभिस्तुआर्यांसंपूज्यश्रद्धया
गोसहस्रफलंप्राप्यविष्णुलोकेमहीयते नीलोत्पलस्रजाभिस्तुपूजयेद्यस्तुचंडिकां वा
जपेयशतंप्राप्यरुद्रलोकेमहीयते सर्वेषामेवपुष्पाणांप्रवरंनीलमुत्पलं नीलोत्पलस
हस्रेणयस्तुमालांप्रयच्छति दुर्गायैविधिवद्भक्त्यातस्यपुण्यफलंशृणु इत्यादि ८८ पुण्यदे

ति पुण्यप्रतिष्ठेडयति क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति श्रुतिः ६४ पूर्णि
तारा॰ मेति चैत्रप्रभृतिमासानां पूर्णिमास्यां महाशिवां अर्चयेद्वक्ष्यमाणेन विधिना साधको
टी॰ त्तम इति त्रिपुरार्णवरत्नवचनात् पौषे तु पूर्णिमा देवीति मन्त्रसङ्केतपर्वतेनोक्तत्वाच्च ६५
१९ पुण्येति पुण्यमहस्यस्याः तदर्पणाद्धि पूतत्वात् मदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचरेति
यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धन इति भगवद्गीतोक्तेः ६६ पुण्यकोटिफल
101 प्रदेति स्वपूजयैवानेककर्मफलदत्वात् तेनाश्वमेधप्रमुखैर्यागैरिष्टं महात्मना द
त्तं दानं तपस्तप्तं यस्तु पाति स्त्रियं सुतारिणीमिति वचनात् ६७ पुराणागमविधेति पूजायां वै
दिकतान्त्रिके इति कर्तव्यता विधानात् वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मख इति भाग
वतात् ६८ पुराणागमतोषितेति पुराणैर्ह्ययदितैः प्रीतत्वात् पुराणानां पठनाद्दाना॰
न्मानवः फलदानृणामिति देवीपुराणात् ६९ पुराणागमगोप्येति, तेषामीश्वरपरत्वेऽपि
प्रकारभेदेन तत्त्वप्रतिपादनात् तथा च न्यायकुसुमाञ्जलौ कृत्स्न एव हि वेदोऽयं परमेश्वरगो
चरः स्पष्टेन क्रमसङ्केषु विभक्तार्थोहदेषु शब्दब्रह्मत्वेन मण्डलब्राह्मणेषु प्रपञ्चपुरस्कृत्यनिः १९

प्रपंचतत्रयोपनिषत्स्व यज्ञपुरुषत्वेनमंत्रविधिषुदेहाविर्भावेहपाख्यानेषुउपास्यत्वेनचसर्वत्रेति ७०
पुराणागमगोपितेति गुप्ताकुलवधूरिवेतिप्रागुक्तवचनात् सर्गश्चप्रतिसर्गश्चवंशोमन्वन्तराणि ·
च वंशानुचरितंचेतिपुराणंपंचलक्षणं ७१ पुराणगोचरा तत्रकुलाचारक्रमेणप्रजाद्यनभिधा
नात् गोचरपदेनभावप्राधान्येबहुव्रीहिः ७२ पूर्वेति पूर्वाषाढायाः कुलनक्षत्रत्वात् अ
न्ययोस्तुविषमत्वेनकुलत्वाभावात् ७३ पूर्वेति पूः स्त्रीपुरीनगर्योर्द्वेइत्यमरः तांवातिवा
सस्थानत्वेनप्राप्नोति पूर्वाभवर्यः पुरमसिधिति शाकिनीप्रस्तावेपूर्वमभिधानात् ७४
प्रौढाविनाशिनीति प्रौढाचासावविनाशिनीतिकर्मधारयः अनेनप्रागभावाप्रतियोगित्व
मप्युक्तं यद्वा प्रौढः बालवृद्धत्वरहितः पुंस्त्वयुक्तश्चयोऽविशेषः तेनाश्रयतिचलितत्वेनतथा
बालवृद्धेतुपंडेतु रोगिणंचगलत्कुष्ठिणंक्लीवहीनांगमथवा वृद्धलिंगंगलत्कुष्ठिणमिति निषिद्ध
चलिप्रसंगेसमार्गवोदाहृतवचनात् ७५ प्रल्हादहृदयाल्हादगेहिनीति नारसिंहीप्रा
त्युत्पत्तिहेतुत्वात् तथाचवामनपुराणे पिदितपितासटापातैग्रहनक्षत्रतारकाः नाखिनीहृ
दयाजातानारसिंहीमहारुणा ७६ पुण्यचारिणीति नमश्चरणहेतुत्वात् ७७ पकारवर्ज्या

फाल्गुनीति तन्मासैकादश्यां नित्यपूजाविधानात् फाल्गुनेकादशीकृत्येति मत्स्यसूक्ता
ना॰ त् ७८ फाल्गुनप्रियेति फाल्गुने योऽर्चयेद्देवीं सोऽवर्णैः राजतैरपि इत्यादि त्रिशक्तिरत्नोक्तेः ७८
टी॰ फाल्गुनप्रेमधारिणीति तथा चानेन तन्त्रनीयाच्चने मासपूजायां मात्स्य सिद्धवारेण जातावा
१२ फाल्गुने पूर्वयेदिमां ८० फल्गुरिति तद्धदवर्षफलदत्वात् वायुपुराणे यस्मिन्फलति
फल्गुर्गौः कामधेनुर्जलं मही दृष्टिरन्तर्गतं यस्मात्फल्गुतीर्थं न निःफलं फल्गुर्नदी
.102 गौः जलं च कामधेनुः महीव दृष्टिः सकलमनागौरिदं त्रयं ब्रह्मान्तर्गतं मनसीति यस्मात्फल
तिश्चतः फल्गुतीर्थं न निष्फलं इति त्रिस्थलीसेतौ ८२ फलप्रदेति गुटिकासिद्धिवेतालपा
तालीवटयक्षिणी परपुरप्रवेशाद्यष्टानां सिद्धिः संजायते इति मत्स्यसूक्तात् ८३ फणिराजा
विभूषितेति फणिपदं पश्चात्परे भूषणपदं तत्पुरः परं पद्मः यदनुपुरतोऽपि पदस्य निषद्
र्शनात् ८४ फणाकारेति फणेव मोचयितुमशक्याकारा संसारतृष्णावेदी यस्याः ८५ फणि
प्रीतेति फणिपदे पतंजलिपरं सहस्रशिरसोऽकत्रुः सहसंशापसम्भवता प्रधानात्मेन विख्याता
षड्विंशतिरिदं मेतिप्रक्रम्य कपिलोऽदुर्मं विश्वापि पतंजलिरिति सूत्र इति मात्स्योक्तेः अनय १०२

वगोनदीयस्त्वाह उभयथा गोणिकाश्चत्र इत्यादिना महाभाष्ये चस्वमतोपन्यासः फणिभाष्ये
तिवचनस्य सिद्धिः तद्व्याख्यातृत्वात् तथा चैतच्छेदेषु विंशत्युत्तरमेत्रमन्त्रान्ते त्र्यान्तरे ऋषिः पतंजलिः
प्रोक्त इत्यादि ८६ फणिहारविभूषितेति फणिनः सर्पान् हरतीति कर्मण्यण् सवाहोऽविः
पक्षीचेति गरुडग्रहणे तेन भूषिता विनतायाः देवशाजतस्य प्रागुक्तत्वात् गरुडस्यध्वजत्व
त्वात् ८७ फणीशाकृतसर्वांगभूषणेति सामान्यरूपेण प्रयुक्तिः सर्वपदं तत्रान्तरोक्तांग
विशेषपरं सर्वत्र माथिकारिकमिति न्यायेन सूर्यणां इत्याम वाक्कामानिति वत्सर्वपदस्य प्रकृतत्व
रत्वात् ८८ फणिवाहिनीति गंगायाः शिवप्रगातत्वात् फणिनां वाहिनी नदीत्यर्थः गंगा गौर्योरभे
दस्योक्तत्वात् ८९ फणिप्रीतेति फणा तिज्ञानानि फणए फणगतौ विजेतः स्त्रातरीति यावत्
फणीति सप्तम्यन्तेन पृथक् अलुक्समासो वा ९० फणिरतेति फणिपदं तत्रैव सपंचमीति यिप
रे मार्गेकस्यानुपंचमीति मत्स्यसूक्ते पर्वते न तदुक्तेः ९१ फणिकंकणभूषितेति सशेषवपा
लः किल कंकणो मन्त्र इत्युपनिषद्दर्शनात् सुवर्णा मनागोल्लसत्कंकणेनेति ब्रह्मसंहितायां ९२
फलदात्रीति फं फा वा न फकारः स्यादित्येकाक्षरकोषः तेलाति आदत्ते फलः वौत्याजन्यायसर्गं

वान् नेयतिखंडयति सविशेषणेहीतिन्यायेन शिवोनष्ट इत्यादिवद्विशेषणमात्रे खंडना
तारा॰ न्वयः आघूर्णितेवाषाणेनेत्यादि मार्कंडेयपुराणात् ९३ फलासक्तेति फलेषु सकामनमेक
टी॰ र्मफलेस्पृहेति वचनात् अनकाङ्क्षयोऽभिवाकषीति परमात्मनः कर्मफलभोगनिषेधः फ्क
१०३ लेश ९४ फलाभरणभूषितेति फलपदमर्थात् गुंजापरं गुंजाफलगुणेन भूषणेन हारेणेतामि
त्यादिविवरितात्थानेप्रपंचसारात् यद्वा फलस्य आभा यत्र तेन फलवर्णेन वर्णेन नपुंसकेनेत्यर्थः
यद्वा नानाट्यशैनेवरणेन शाकेन सदाट्टहासैर्जगतामभीतिदामिति उपनिषदुक्तेः ९५ फकार
कूटसर्वांगीति फकारैकवर्णेनशाक्तायनेइतिफकारकूटः कूटशब्दो द्विवचनः फकारोऽटका
रइतियावत् तेनसर्वं अर्थाज्जाड्यस्य नाशकअंगमेतस्यपंचपस्याः एवं हिंसायामपवादित्वा
दतु तथाच वासनाप्रकरणे रहस्यादाहृतवचने फट्कारं सर्वजाड्यानां नाशकं तत्यका॰
शकम् ९६ फाल्गुनानंदवर्द्धिनीति अर्जुनः फाल्गुनोजिष्णुरित्यर्जुनपर्यायेषु विराट
पर्वणि महाभारते तस्यानंदं शत्रुजयेन वर्द्धयतीति तथा भीष्मपर्वणि तदर्थस्य स्फुटत्वात्
यद्वा कालिकमेवंषेन फल्गुन्यां भवः तादृशो विवाहजन्यआनंदः शिवस्य वर्धयतीति तथा १०३

मैत्रे मुहूर्ते शशलाञ्छनेन योगं गतासूत्तरफाल्गुनीषु इति कुमारसंभवात् फाल्गुनीन-
क्षत्रे गौरीविवाहस्य हृद्यत्वात् तथा च वामनपुराणे ततः सप्तर्षयः प्रोचुः शैलराज निशाम-
य यामित्रगुणोपेता तिथिः पुण्या सुमंगला उत्तराफाल्गुनीयोगं तृतीयेह्नि हिमांशुवत्
गमिष्यति हि तत्रार्को मुहूर्तो मैत्रनायकः यस्यां तिथौ हरः पाणिं ग्रहीष्यति समन्त्रकं १७
फकारवर्ज्या पवर्गीयवकारादिनाम्नामत्रास्तु पक्रमः समाख्यानामतो वा ख्यातकृतात्
दनुरोधतः वसुदेवरतेति वशा हृद्य उपमायां स्याद्धो वरुणे तनव्ययमिति पवर्गीयवकार
प्रक्रमे विग्रहः ततिर्हि इह वसुदेवया आशु आश्लेषेन रतं भक्तिर्यस्याः इति विग्रहः पंचषष्ठ्यर्थः वरुणेन
जलैश्वर्यमिति स्कांदात् १८ विज्ञा विज्ञेति विज्ञा ज्ञातीति नानार्थेति विग्रहः विविधता ना-
जानातीति विज्ञाः प्रपंचरूपस्येयोऽहंताभिमानिनः तेषु विज्ञा यस्याः अविज्ञातं विजानतां विज्ञात-
मविजानतामिति श्रुतेः १९ विज्ञानकारिणीति विविधं ज्ञानं करोति भक्तानां तथा कविना
जायते तस्य सतत्वा रसपरंपरेत्यादि वचनात् २० वाक्यप्रमाणपदसागरपारगस्य लक्ष्मीधरा-
भिधबुधस्य तनूद्भवेन विश्वेश्वरेण विहिते गिरिजाभिधार्थ विनामगणे वयमगाद्ग्रामी मयूर

वः श्रीः वाग्योक्तेः शिरसि तत्त्वदर्वान्तरार्थ तात्पर्यपर्यटनपर्यवसानसीम्नि मिथ्यावबोधवि
निहन्तिनिदानभूतेक्लेशापिवल्लकि ममास्तु मनस्तरीये अथ यद ग्रामशततयाख्याने वीणवतीति
यद्यपिरासलास्यासमस्थाणावीणाइत्यत्र वीणत्यादावित्यस्य विनिपातनमाश्रित्य वीणाशब्दो ना
स्यादिप्रसिद्धः अत एव वीणाविपाणिवेणवइतितत्स्तलावे विश्वः तथापि वण शब्दस्य स
निपातमाश्रित्य पवर्गीयादिः साध्यः अत एव विश्वः ओष्ठ्यदन्त्योष्ठ्ययोरत्र यात्यर्थोऽपि विशेष
तः यदिस्यादन्त्ययोरत्र कादाचित्कोऽव्यतिक्रमः वीणाविद्युदलस्यास्याः स्यात्स्य प्रतियोगितेने
त्यर्थः वीणवल्लकि विद्युतोरिति विश्वः तडित्कोटिसमाभासामिति नीलतन्त्रे १ वलाकी
ऽपीति वलतेर्वेधायर्थस्यतॄप कुमार्यादिसैन्यमध्यहन्तितात् अथवा भ्रमावतीन्द्रपि वायस
ध्वजत्वात् काकध्वजरथ्याहृद्धेति फेत्कारिणीवचनात् २ वालपीयूषरोचिकेति वलते
प्राणितिवालः वाहुश्चास्याप्य अस्माद्धेनिर्दीरस्वामी उभयथापि पवर्गीयादित्वे द्वयोर
पिकल्पद्रुमादौतत्प्रकरणेपाठात् पीयूषपदं तन्मयतया वेद्यपरं तद्धेवतइतितथा ३
वालावसुमतीति वालास्त्रियस्तद्रूपंवसुअस्त्यस्याः अतिप्रियतत्स्वाधर्म्ये तडित्के नासाग्र

हारंनिंदांवकौटिल्यंवाप्रियंतथा सर्वथानैवकर्तव्यमन्यथासिद्धिरोधकृत् ४ विद्याविद्याहार
विवर्जितेति विद्याज्ञानमार्गः अविद्याकर्ममार्गः तत्रहारस्त्यागस्तेनहीना ब्रह्मवेदनोभय
रूपतयाउभयत्रापिसेवनात् यद्वाविद्याकामेभ्यःशिष्येभ्यः विद्यायाःआहरणंआहारोदानं
तेनहीनाविद्याहरस्याभावार्थत्वात् तथाचहेमाद्रौदेवीपुराणे यत्नदेवागृहेनित्यंविद्यादानं
प्रवर्त्तयेत् समेवत्सर्वलोकानांपूज्यःपूदेज्यपदंव्रजेत् ५ विद्यावतीति सरस्वतीरूपेणतद्वा
यकत्वात् तथाचमहाभाष्ये सोयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितःफलितश्च
द्रतारकवत्प्रतीतोवेदितव्योब्रह्मराशिरिति ब्रह्मरूपमेवशब्दरूपतयाप्रतिभातीत्यर्थः इति
कैयटः ६ वैद्यप्रदप्रीतावैवस्वतीरतिरिति विद्यादिगणदद्यातिवाल्विनवविदःसएववेद्यःस्वा
र्थेतद्धितात्प्रत्ययणात् सएवप्रदःप्रकृष्टदाता वलिदानस्यदानेनातत्रोत्कर्षात् तत्रप्रीतापरि
तुष्टता कत्वेत्यत्रश्रीशाद्वौनरंभावप्रत्ययात् वैवस्वतोदक्षिणस्यारतिर्यस्याः दक्षिणेवा
मिवार्के इतिचामुंडाकल्पवचनात् प्रीतायुकाचासौवैवस्वतीरतिश्चेतिमध्यमपदलोपी
समासः ७ वाणीविलासकारिणीति ध्वांक्षसनादिनिः हठाभावाबा वणशब्दरूपतोवा

णीशब्दः पवर्गीयादि तस्याविलं छिद्रं तस्य आसत्यागः तद्वेदनात् ८ वरोगस्यावरानने
ति पवर्गीयबकारापेक्षया रशब्देनाग्निवाचिनात्तृतीयः अंगपदेन त्वषष्ठोयाह्यः तेनस्याय
आकारः मकारलकारेणत्रस्याकारः तेनमालेतिसिद्धं तयावरे रम्यमानेयस्याः नीः
लोत्पलललसन्मालावद्धजटाभयकरीमितितंत्रचूडामणिवचनात् ९ विसोर्वदलस्यल
स्येति लुपदं विलुपदांतर्वर्त्तिदत्तशब्दानुकरणे विशिष्टः लुशब्दोनामांतेयस्यसः विसुः
अन्यथाविषुल्त्वापत्तौ पिशप्रवेशने इत्येताधातुतन्त्रस्य विसुशब्दस्यातस्यादित्वात्
तस्यहृदयस्याश्रीत्वपत्तानात् यद्वाः संदर्या पंवप्रेताहृच्छत्वात् वस्तुतोनेनसतीजन्म
सूचनद्वारासौभाग्यमयपतंटप्यने तथावमत्स्यपुराणे पुरादग्धेषुलोकेषु भूर्भुवः स्वर्महादि
षु सौभाग्यंसर्वभूतानामेकस्थमभवत्तदा वैकुंठमगमासाद्यविसोर्वदलस्यलस्थितम्
ततः कालेनमहताप्रुनः स्वर्गविधौसृजत् अहंकारावृतेलोकेप्रधानंपुरुषान्विते स्पर्द्धायां
चप्रवृत्तायांकमलासनकृष्णयोः लिंगाकारासमुद्भूतावन्हेर्ज्वालातिभीषणा तयाभि
तप्तस्यहरेर्वदनसन्निधिनिस्सृतं वदलस्यलंस्मामाश्रित्यविसोः सौभाग्यमास्थितं रसरूपेणतसो १०५

नः प्राप्नोति वसुधातले उत्सिममेतदितं तद्ब्रह्मपुत्रेण धीमता दक्षेण पीतमात्रेण तद्रूपलावण्य
कारकं वलंते सौमहज्जातं दक्षस्य परमेष्ठिनः शेषं यदपतद्भूमावष्टधा समजायते ततो जनानां
संजाताः प्राप्तसौभाग्यदायकाः इक्षवस्तृणराजश्च निष्पावाऽजाजिधान्यकं विकारवच्च गोक्षीरं
कुंकुमं सममेतथा लवणं चाष्टमं तद्वत्सौभाग्याष्टकमुच्यते पीतं यद्ब्रह्मपुत्रेण योगज्ञानविदा पु
नः दुहिता साभवत्तस्य या सतीत्यभिधीयते लोकानतीत्य ललनाल्ललितानेन चोच्यते त्रैलोक्य
सुंदरीमेनामुपयेमे पिनाकधृक् यादेवी सौभाग्यमयी भुक्तिमुक्तिप्रदायिनी तामाराध्य पुमा
न्मर्त्या नारी वा किं न विंदतीति ९ वागवती विंध्यवासिनीति वेवहणजलं त्रगयति वक्रं करोतीति यमु
नाकर्षणादिति वलदेवः तस्य भगिनी वलदेवस्येति हरिवंशात् यद्वा वाग्बीजाभ्यायदा विद्याः
वागीशत्वप्रदायिनीतितंत्रात् वागाद्यं कमलाद्यं वा तारिणी मे नो यो विद्यात्स गीशो भवति सर्वैश्र
वणो भवतीत्याथर्वणश्रुतेः विंध्यं वायति शोषयति विंध्यवेगहस्यः वेशोषणकप्रत्ययः तेन त्रा
सयति दीपयतीति विंध्यवासिनी पुलस्त्यागस्त्यपुलहैरिति महाभारतात् श्रसते दीप्त्यर्थात्
णिपंतान्नणिनिः ततः पूर्वेण कर्मधारयः छांदसत्वात्त्रपुंवद्भावः यद्वा वागवती शाह्वस्य भाव

ता॰
टी॰
१०६

प्राधान्यात्तद्भक्तेरित्यमध्यमपदलोपः ११ वानीरतरुसंस्थेति वशब्देन जलपरेण समुद्रग्रह
णं आसमन्तादुत्पन्नौ स्थितौ च हे तन्मूर्ते नीरे यस्य तादृशः शम्भुर्जनको यस्य तत्कमलं समुद्रोपरि
गतरक्तपद्मोपरि वर्तित्वात् तद्भक्तमाप्यर्वणे तत्र व्यापकतीरायोश्चाः कारं चिन्तयेत् ततः तत्स
त्वगुणयोगेन रक्तपद्मं विचिन्तयेत् १२ वानीरकुसुमोन्नत्केति यद्यपि वनसंस्तु वानीर इति
स्वामीव्याख्यानात् वनसंभक्तावित्यस्य वेतस्यादित्वादस्य तथात्वमेवायाति तथापि वननेर्या
वनाद्यर्थात् यवर्गीयादित्वमपि प्रामाणिकं अत एव तन्त्रकरणे वानीरं वानरं वदामिति वि
ग्रः दूर्वाहोमेन दीर्घायुर्वेतसैर्वृष्टिदो भवेदिति वीरचूडामणिवचनात् १३ इति वकारव्रज्या
भीतिहेति भानोर्नक्षत्राणामियं भीमशब्दादण् ईतिमुपद्रवं हन्तीति तथा ग्रहपीडानिवा
रकत्वात् वृष्टिनिमित्तस्येतिनिवृत्तेश्चावः महाग्रहे महोत्पाते इति वचनात् १४ भयदेति
भयपदे तद्द्वृत्तपरे सामर्थ्यविशेषं भक्तायददाति दुर्वासाः श्रवणयादौ इति भैरवीतन्त्रो॰
क्तेः १५ भानोरंशुजालसमप्रभेति अंशुपदस्य भानुपदसापेक्षत्वेपि देवदत्तस्य गुरुपुत्रः
इत्यादिवत्समासः तद्भक्तं भक्तहरिणा सर्वेपि शब्दः सापेक्षो नित्यं सर्वे प्रयुज्यते वाक्यव॰ १०६

त्साग्यपेक्षाहि हृत्त्वा वपिनहीयते ९८ भार्गवेज्येति तथाचकवचप्रस्तावे गंधर्वतंत्रे यज्ञाता
भार्गवो रामः दत्त्वा पानजपद्धणे वशीर्जितोमहातेजाकालिकांचातनर्पयत् पिशितैः तत्र
देहोत्थैः रुधिरैः सगणाप्रभुः ९७ भृगोः पूज्येति भृगुर्वागिरोवाशिष्ठाद्यैरिति भारतात् य
द्वा भृगुयदेसकंकरपरेहेतोपवमी वह्नबीजेनयोगेनशापोद्धारात् तथाफेत्कारिण्या वशि
ष्ठाराधितादेवीनचशीघ्रफलायतः अतस्तेवाभिमुनिनाशापोदत्तः सुदारुणः ततः प्रभृ
ति विधेयंफलंदात्रीनकस्यचित् शाक्तिबीजंत्रयांतस्यबीजोपरिनियोजिते ततः प्रभृति
विधेयं। फलदात्रीनकस्यचित् शाक्तिबीजंत्रयांतस्यबीजो। वक्ष्येविषयशासिती ९ भारद्वा
जनमस्कृतेति दानधर्मे भरेषुज्ञान् भरेशिष्यान् भरेदेवान् भरेद्विजान् भरेभार्यांभरेद्वाजंभर
द्वाजोस्मिशोभने द्वाभ्यांवाङ्मनसाभ्यांप्रभोगबन्नीतिद्वाजोभृत्यः अजगतादित्यस्य
धातोः प्रयोगइतिविमलाबोधः तस्यापत्यंभारद्वाजः अत्रछंदकेन्त्याण ९९ भीतिहेति भ्रमरे
भः प्रकीर्तितदलेकानरकोष्ठः ततः पुंयोगेङीष्प्रत्ययः तस्याःईतिसामग्यपत्रशपामस्तात्
हइतिहरिएणाङ्कंकतेसेत्यस्याः वलितेनेत्यपिश्रादितादय् हाविदेहरिणंहावेहस्यस्म

तारा॰ टी॰ १८

ल्लिनिगद्यते अस्येकाद्वरकोषः ज्योतिश्चासौहाचेतिकर्मधारयः मृगाङ्काविषानदिवानपी
तिस्तथाएणवेमहाकालसंहितोक्तेः २९ भयसंपत्रेति भयहेतुनरकावक्रोपादाने तेयानिविचा
रयंतिभयाः तैः सम्यक्प्रत्रातातात पदगतावित्यस्यक्रप्रत्ययः कालिकायाश्चतारायास्ता रा
वके स्वभभवेदितियामलोक्तेः २१ भीमाकारोग्रसुंदरीति भीमाकारेत्यग्रविशेषणे देवता॰
विशेषणेवेकर्मधारयेवा यद्वा भीमाकाराभयहेतवस्थाेमयस्येतिहंसग्रहएं वर्णासतत
दपगमवर्णनस्यकावसंप्रदायसिद्धत्वात् कपोलेटिहिमेहंसमितिमहाकालसंहितोक्तेः २२
भकारवञ्ज्या मायायरीति मायायदस्यविशेषार्थकतयाविद्यापरग्रहएं तेषामियंपूज्य
तयेमित्यर्थः विद्याधरत्वमतलेविज्ञानेपौरुषेमतिः विद्याधराएांयुर्मायंभवान्याभक्ति
रेववेति वामनपुराणात् यद्वा मायाधरः शैवस्कंदमित्वात् तस्यपंतदुपास्यत्वात्
तथाचहरिवंशप्रद्युम्नंप्रतिनारदवाक्यं अस्यदेवरिपोस्तानमङ्गतोनित्यमूर्जितः पाव
त्यापवितष्टायाः दत्तः शत्रुनिवर्हएाः अमोघश्चैवसंग्रामेदेवदानवमानवैः २३ मानवेतेति
ज्ञानमात्रविषयत्वात् अहमस्मीत्याकारोल्लेखस्यसर्वेषामुदयात् अनेनआत्मनोप्रत्याव १८

यतेस्त्वितिं २४ मानसंमाननतत्परेति मानानन्ददर्हाः तेषां संमाने आदरे तत्परा अन्यथा दो
षश्रवणात् तदुक्तं कादिमते पूजामध्ये गुरौ प्राप्ते तस्यैवापि समागते कृतमित्येव संभा
षेन्मौनेनैतेन समाचरेत् यद्वा गुरुमानीय संस्थाप्य देववत् पूजनं विभो वस्त्रालंकारहेमाद्यैः
संतोष्य गुरुमात्मन इति पुरश्चरणोक्तेः २५ माधवानंददेति मः शिवः ब्रह्मा वा यस्मात् उ
कादन्तरकोशः मधवः यवः मयवः स्वार्थे तद्धिते माधवः माधवः अथ्या तद्विवाहकरणे
त्ववेदनात् तथा च हयशीर्षपंचरात्रे गौरीविवाहमभिधाय एवं कृते तु यत् पुण्यं पितृभि
र्वापि पितामह अश्वमेधसहस्रस्य वाजपेयशतस्य च फलं कोटिगुणं लब्ध्वा रुद्रलोके वसे
च्चिरं यद्वा वैष्णवत्वस्य दमनकपूजायां विधानात् तथा च दक्षिणामूर्तिसंहितायां चैत्रादस
यो मासाः पद्ये सितसितेतरौ २६ मान्येति माशब्दो निषेधार्थः नमन्या यस्याः ब्रह्मरू
पतया सजातीयविजातीयस्वगतभेदशून्यत्वात् एकमेवाद्वितीयमित्यत्र तथा व्या
ख्यानात् २७ मदिरेति मत् ज्ञाने मनुत्वानेः स्यतो भावे क्विप् इः कामः तौ राति ददा
ति मदिरा छांदसः पूर्वनिपातः मध्यमपदलोपो वा ज्ञानस्य हरा भूमि वीज्ञयत्वात् २८

मदिरोद्घूर्णेति मदिराघूर्णितरम्याणि ईक्षणानि यस्याः इषिमदिमुदीत्यो णादिकः इ इय इ
तारा॰ र्मदई क्षणं दर्शनं यस्या इति वा २९ महोत्साहगुणेयेनेति महानुत्साहगुणो येषां ते भक्ता
टी॰ अन्येषां विषयावग्म्येव विदेयात् माहेश्वर्य धनिनं च पुनर्दारादिसंपदः अथमाः सिद्धयः
१९८ प्रोक्ता मे त्रिगुणप्रथमभूमिकाः सिद्धमंत्रस्य या साक्षात् सा शिवो नात्र संशयः इति वचनात् २॰
महतीति सर्वातिशायित्वात् ३० महदद्भुतेति महतामप्यद्भुतेति समासः अन्यथा
आत्वप्रसंगात् अद्भुतमाश्चर्यहेतुरिति कैयटे विशेष्यलिंगत्वे न लः सम्भजानिरभ्यु
णेद्भुत इत्यादिदर्शनात् ३२ मदिरामोदवासितेति मदः कस्तूरी अस्त्यस्येति मदी रोचः
ह्निः अर्थात् कस्तूरीहोमद्रव्येन आमोदेन प्रीत्या प्रोक्ता कर्पूरागरुकाश्मीरकस्तूरीहो
मतः पुनरिति वचनात् ३३ मदिरामज्जनेरतेति तदुक्तं सुरया चार्घदानेन योगिनीनां
भवेत्प्रियः ३४ मकारवर्ज्या यशोपतीति तत्सोमतर्पं इति भसंज्ञायामपि छांदसत्वा
त्पदकार्यं हत्वं ३५ यशोविधेयेति तत्कारणत्वात् यद्वा कीर्तीश्वरीरूपत्वात् तथा च
मंत्रभेदं द्वात्रिंशदक्षरं उक्तो आवरणप्रभावे तंत्रांतरं कीर्तीश्वरीं यजेद्देवीमित्यादि ३६ १९

यशोदानंदवर्द्धिनीति यशोदानंदगोपभार्या तस्याः कन्यात्वेनानंदहेतुत्वात् यद्वा यशोदाच
नंदश्चेति द्वंद्वः तौ वर्द्धयति सोत्पादकत्वेनोत्कृष्टौ करोतीत्यर्थः भविष्यपुराणे सैव काली
महादेवी यशोदागर्भसंभवा कंसासुरस्यांसमांगे पदं कृत्वा गगनमापियत् ततः प्रभृति दे
त्यद्वी यशोदानंदिनी मया विंध्याचलेषु जयित्वा पुनः पूजा प्रवर्तिता ३७ यशःकर्पूर
धवलेति अत्र कविप्रसिद्ध्या यशसोपि श्वैत्यहेतुत्वात् यश एव कर्पूरमिति रूपकं
यशः कर्पूरमिवेत्युपमेति वेत्यन्यतरनिर्णयहेत्वभावात्संदेहसंकरः ३८ यशोदा
मविभूषितेति अत्र रूपकमेव विभूषणस्य सोपमावाचकस्य सत्वात् ३९ यमराज
स्वसेति शमनो यमराट् यम इत्यमरः यमेन राजत इति स्वामी यमुनारूपेणेवेदं यद्वा
यमवतां स्वसेव हितहेतुत्वात् तथाच योगिनीप्रस्तावे भूतडामरे तुच्छतासाधकश्रेष्ठो
भावयेन्मनसा धिया मातरं भगिनीं वापि भार्यां वा प्रीतिभावतः ४० योगमार्गानंद
प्रवर्द्धिनीति योगश्चित्तवृत्तिनिरोध इति पातंजलसूत्रं तत्राप्यात्मन एव प्राप्यत्वात् य
द्वा प्रयोगरीत्या नानाफलहेतुत्वात् ४१ यादवानंदकारिणीति तथाच हरिवंशे प०

ना॰
टी॰
१९५

कांनेप्रीतिपामाद्भुतस्तत्रोमानवामदि योगकन्यांडरार्थंषरैवत्वार्थेकेशवस्यतत्र तोवैस्त्र
मनसः सर्वेपूजयंति स्मयादवाः देववद्दिव्यवपुष्याकृत्सः सेराद्भिनो यया ४२ यादवानं
देवद्विनीति यातेनपूर्णतं प्रवतिरत्नानियादवा फलितार्थंकथनेवैतत् प्रवतेपवाघच्
यातांग्रवतिषष्ठीसमासः सावासावानंदवद्धिनीव शरणागतदीनार्तपरित्राणपराय
णे इतिमंत्रलिंगात् यद्वा शरणागतरक्षकस्यसुखहेतुत्वात् अभयंसर्वदेवत्वमिति
स्मृतेः ४३ यथाप्रीतेति भावचूडामणौ पशुभावेप्रवक्ष्यामिशृणुवत्ससमाहितइ
तिप्रक्रम्य पुराणश्रवणे श्रद्धावेदवेदार्थतत्परइत्यादि ४४ यज्ञमयीति वेदयज्ञा
र्थमभिप्रहृत्वा इति यत्रपदेवेदपरं ममैवेषापुराणाक्ति वदसेत्वापुरातनीतिकेचिन्मोत् ४५
यज्ञकर्मविभूषणेति यज्ञेदत्तमविकृणोतिहिनेत्ति यज्ञकः लोकवेविवृगुणः लो
भोवोरितियातवयववकारलोपविमितिनेपिविच् प्रत्ययस्सनषात्वलोपश्चाङ्गेषातुक
इतिगुणनिषेधाभावः वलोहेनैवनिमित्तत्वात् इतिकेपदकौस्तुभादौस्पष्टं तादृशाश्चा
सौमश्चयज्ञकर्म सपवविभूषणंप्रनुरागविषयोयस्याः यद्वातस्यविभूषणंत्वंयस्याः तथा १९५

109

वशिवपुराणे नविनाभस्मवादाय स्वशरीरे विलेपिते शंकरेण ज गङ्गाआदिवियोगेनातिपा-
तिना ४६ एकारव्रज्या रामप्रियेति रामः पशुविशेषस्मार्ङ्गामदथ्येहलायुधेइति विश्वः विहा
यक संसारवत्त्रियामेदेवेहलिरिति षाणेवायन्मस्त्मम हाकालसोहताया त्वत्रिया-
दौकसंसारस्यैवमृगेषुपर्युदासात् ४७ रामरतेति रामेदाशरथौरतो वाल्मीकिः तत्से-
वेपितात् सरस्वतीचवाल्मीकेरितिहरिवंशात् ४८ रामतोषणेतत्परेतिरावणवधस्त-
डङ्गतत्वात् तदुक्तं कालिकापुराणे रामस्यानुग्रहार्थाय रावणस्य वधाय च रात्रावेव म-
हादेवीब्रह्मणाबोधिताषुरा ततस्तुत्यक्तनिद्रा सानंदायामाश्विनेसिते रामरावणयोर्युद्धे
सत्तरेसावसोजयत् ....
४९ राज्ञीति सर्वविद्योत्कृष्टत्वात् अपिचेतत्समानारी मत्समः पुरुषोयदि अपि-
नीलसरस्वत्याः समीमेधोस्तिवैतदेति भैरवीतंत्रात् ५० राजकुलेज्येति राज्ञश्चन्द्रस्य
कुलपूज्यातदधिष्ठात्रदेवतात्वात् उमांतशशिनमन्यैतिमत्स्यपुराणात् यद्वा राज्ञः
कुले शरीरेमुनेवाहस्त्यादिनृपेतंदगेवापूज्या प्रायेणहस्त्यश्वादिराजत्पवसंभवात् क

नाम॰
टी॰
११०

स्ववस्त्रं तथा ओषं राजानं राजपुत्रकं इत्यादि फलकालीवशूरुषान् इति कुलचू
डामणिवचनात् एतान्तरङ्गादिवता ओप्रणमेदित्यर्थः ५१ राजराजेश्वरीति राजराजोधने
श्वर इत्यमरः धनाधिपः कुबेरो यौनिभैरवीतन्त्रात् इदंकवचमन्त्रात्वा राजराजेश्वरी श्रीवा यो
चैयं योगिनीहृदैः सम्भवोनात्र संशय इति कुलानन्द संहितायां स्तुदयां श्रपि तथाव्यवहारः
यद्वा राजराजेन्द्रप्रश्रेष्ठेरारा ध्यतात् दयरत्नापुरा वर्णात्तानार्थं गोतमादिभिकीत्यर्थी पार्थि
वैश्चान्यैः संग्रामजयकादिभिरितिके त्कारीयात् ५२ रमेति श्रीवीजाद्यापदाविधानन्दा
श्रीः सर्वतोमर्वोतिमत्स्यसूक्तात् कमलाद्यावायोविधानस्येवेश्रवणो भवतीत्यर्थः एणाय
रागिणीति रागिणः संगीतशास्त्रप्रसिद्धा ललइयता यद्वा रक्तांगीरक्तनेत्रा च रक्तांवरवि
भूषिता रागिणीनामविख्याता ज्येष्ठामेनाद्य तामुने इतिवामनपुराणात् ५४ रमणी
ति रावाहिलक्ष्मणीरत्नं स्फटिकं सूर्यसंबंधेन द्विजनकतात् मणिश्शाह्वस्य सीतेरूप्रभ
यः श्वेतय नृपनीलमणीरहस्मिषामिति नैषधे स्फाटिकं सर्वसिद्धिदं इतियत्रप्रस्तावे स्व
च्छन्दभैरवोक्तेः महाशांविष्णुशक्तेश्च स्फाटिकीमपियोजयेदितितन्मालाविधानाद्वा ५५ ११०

रम्येति रमः कांतेरमालत्वस्यां रक्ताशोकद्रुमे स्मरे इति विश्वः शंबरयुद्धे मद्धुरात्प्रद्युम्नस्मरदि
तत्वात् अशोकपुष्पप्रियत्वाद्वा अतएवाशोकवकुलेष्वितंक्तस्मायपराजिते इति मेढमालोक्तेः ५९
रामानंदप्रदायिनीति स्त्रीणां सुखदत्वात् तथा च मैत्रावरुणीयपञ्चमत्स्यपुराणे नारीवा
कुरुतेवापि कुमारी वा नरेश्वर सापि तत्फलमाप्नोति देव्यनुग्रहलालिता तथा च सूयाणे
वे कुलसद्भावतारे मातंगीसुयंत्राराच कालिकाप्रियामलानन्त्यन्त्यपद्मस्य पुरश्रीणा
विशेषतस्तदप्युक्तं यास्त्रीभर्तृविमुक्ता च सुभासा वा रजोयुता सापि मनोरथहृगानवसंभ
वेति दक्षयज्ञेतिब्रह्मपुराणात् ५७ रजनीकरशेखरांगस्येति रक्तवन्हेर्जनी भार्या जनी
सीमंतिनी वधोरिति कोशात् तासां हा शब्दं करोतीति होमादादिति तेन तद्गुणस्यात्मना
तु होमतर्पणयोः स्वाहीनेकुलार्णवात् ५८ रक्तोत्पलविलोचनेति स्पष्टार्थं यद्वा
रक्ते रुधिरे उत्कृष्टपलं मांसं ताभ्यां वलिनात्तेन होमेन वाविशिष्टेलोचने प्रीति
र्यस्याः तथा च कालीतंत्रे हुनेदाज्येन भक्तेन मांसेन रुधिरेण च कुसुमपुष्पेण साज्येन नर
केन च विशेषता अमिषादिभिरप्येवं श्मशाने जुहुयात्सुधीः यद्वा रक्ते रागवान्तत्य

तारा॰
टी॰
१११

लोदैत्यविशेषः तेविशिष्यलोवयतिजानीत्यर्थः तन्मायांज्ञात्वातस्यहतत्वात् त
प्यावकापूर्णिवेडेपंचपंचाशत्तमेध्याये मृडानीकिलखेलंती दृष्ट्वोजगर्जेदेवकाश्रुत
विन्नवराभ्यांवदतिजाभ्यांमनोहरा कटाक्षिताभ्यामिव येसमवस्थितमृत्युना वि
दलोत्पलसंज्ञाभ्यांनेमभ्यांवरनोविषेः तृणीहृत्वत्रिजगतीपुरुषाभ्यास्वदोर्वेलात्
देवीपरिजिहीर्षतौविषमेषुप्रपीडितौ दिवोवृनेरतः क्षिप्रमायास्वीकृत्यपार्व॰
ती इतिप्रक्रम्य विज्ञायतेत्रसंज्ञात्वसर्वेस्याङ्कधारिणी तेनैवककडकेनाथयुगपत्
त्रिजगत्यानतौ महाबलौमहादेवाकडकेनसमाहितौ परिभ्रम्यपरिभ्रम्यतौडष्टौ
विनियेजतुः ५५ रकारबद्रूपा लांगलीप्रमसंतुष्टेति नालिकेलस्तुलांगलीत्यमरः
हलाकारयत्रप्राधान्यात् इतिक्षीरस्वामी ब्रह्महत्यादिपापानितथाविश्वासघातकं
दृष्ट्वापात्रंनारिकेलंसर्वाण्येयप्रणाश्यतीति भैरवतंत्रे मार्गशीर्षेजपेन्मंत्रंमाषा
द्यैर्मनोहरैः नारिकेलांबुसंमिश्रकर्पूरंविनिवेदयेदिति त्रिशक्तिरत्नाम्नाय ५६ लांगली
प्रणयप्रीनेति नारिकेलोदकैमिश्रैः स्नायैः सर्वार्थसिद्धये इतितर्पणप्रसंगेवचनात् १११

नारिकेलोदकं कांस्येनाम्रेवाविसृजेन्मधु गव्यं च ताम्रपात्रस्थं सीधुस्तुल्यं हुतं विनेति
कुलार्णवात् आम्रं च नारिकेलं च खर्जूरं बीजपूरकं यः प्रयच्छति दुर्गायै स गच्छेत्प
रमं पदमिति भविष्यपुराणाच्च तेन होमविधानाच्चेति तदुक्तं वीरचूडामणौ अष्टधा ना
रिकेलं तु होमं कुर्यात्तु साधकः गृहे तस्य स्थिरा लक्ष्मी राजानोऽवशा इव यद्वा लांग
लीशीर्षनागः तदायुधत्वात् तत्प्रतिजठायां तद्धारणात् जटाखनेतत् इत्युपनिषद्दर्श
नात् ९१ लाक्षारुणेति ब्रह्मोपचारमध्ये अथ चरणयोर्यावकदानविधानात् तृ
तीयान्तस्तृतार्थेन गुणवचनेनेति समासः यद्वा लाक्षावद्रक्तवर्णे उपमानानि सामा
न्यवचनैरिति समासः रक्ताध्यायेदिमां वृष्येदति तन्त्रान्तरात् ९२ ललनेति ललना वा
नितेविनीत्यमरः लडतिलाल्यते वा ललना लड विलासे ललईप्सायामिति स्वामी वस्तुत
सर्वाकर्षेण ललति विलसति ललना तथा च प्रागुक्तमात्स्य लोकानतीत्य ललनाल्लालि
तानेन वोच्यत इति ९३ लीलेति लीलया वाक्प्रदा चेति तेन नीलसरस्वतीति फेत्कारिणी
वचनात् ९४ लीलावतीति तदुक्तं भरते वागंगालंकारैः श्लिष्टैः प्रीतियोजितैर्मधु

रैः इष्टजनस्यानुकृतिर्लीलाशेषाप्रयोगजैः यद्वा लावः पक्षिभेदः तस्याभावो लावता
नारा. लावतामात्मन इच्छतीति क्यजन्तात् क्विप्प्रत्यये लावती: लावण्ये वेति यावत् लीयते हन्यत इ
टी. ति लीलावतीयं स्यैमाली लीलावतीः ततश्चाख्यानण्यन्तादचुप्रत्ययः ततः कृदिकारादि
११२ तिङीप्रत्यये सलोपः लावस्य वलितेन विधानात् चक्रवाकेच लावकमिति विश्वार्णवे म
हाकल ८५ लयति लीयते जीवरूपमपहाय शुद्धस्वरूपा भवतीति तथा स्वेनरूपे
112 णाभिसंपद्यत इति श्रुतेः ८६ लंकेश्वरगणप्रीतेति लंकारदस्य: पुरीपाक्षा शाकि
नीकुलटास्व चेतिविपद्धालंकाकुलटा तस्यां ईश्वरः पूजकः गणिकानटीत्यादि वीरचू
डामणिवचनात् यद्वा शाकिनीश्वरः स्कंद ८७ लंकेशावरदायिनीति लंका शाखा अ
न्तपत्र लंकाल इत्राणा पत्नश्च इति गाथ्याकोषे पत्रस्वार्थे कतमादाय पलाशरा हसयाश्ले
षस्ताद्ववरणे स्पृहः सावीर्यादत्र विल्वादिसेवेषिणी साईशाय स्वपत्रजपतात् नवरात्रे
विल्वपत्रा छायामवनविधानात् तथाच गौडनिबंधे वदरीदाडिमेयात्पेहारिता मानसेक
तुः विल्वोषशोकोजयंतीच विशेयानवपत्रिकाः ८८ लवंगीकुसुमप्रीतेति उकंचत्रिशाकि ११२

रत्ने आषाढमासि सितपक्षे सप्तम्यां वंदनैः कुसुमान्वितैः एलालवंगकंकोलैः खन्येर्वापि महाशिवा
लवंगीकुसुमस्रजेति भागुरिमतेटाप्रत्ययः ७० लकारखञ्ज्या वालेति बलतेवर्त्मीणी
भवतिवाला बलस्तनावितिदंतोष्ट्यादिप्रकरणे कल्पद्रुमपाठात् ७१ विवस्वद्गृहिणीति
अंसोवाआदित्योविवस्वानेषह्यहोरात्रेविवस्तइतिमंडलब्राह्मणे वेदमूर्त्योयविस्थितामि
तितंत्रांतरे कालिकाभेदध्यानात् कर्मधारयोनरेखांदसोमतर्थीयः ७२ विवस्वत्प्रमथा
रिणीति तडक्तंनेदिकेश्वरसंहितायां यावन्नदीयतेवार्घ्यंभास्करायनिवेदिनं तावन्नपू
जयेद्धिसंशुभ्रांकरंवामहेश्वरी नमोनुदत्तमर्केणेतस्कंदपुराणाद्धा ७२ बकारखञ्ज्या शर
णेतिश्शृणातिहिनस्तिडष्टानिति शृहिंसायामुणु यद्वाशंकल्याणंतद्रेत्वरणः शान्त्यायस्मा
मंगलकीर्तनतात् ७४ शरलेति शरंबाणंलाति धारयतितया शक्तिंचेषुंवदन्तिणिइति
महिषमर्दिनीध्यानेपंचरात्रोक्तेः ७५ शल्येति शल्यशक्तोपशरेवंशेककविकायांवतोमरे
इतिविश्वः कौमारीरूपेणशक्तिहस्तत्वे ७६ शरण्येति तत्रसाधुरितियत्प्रत्ययः तामाश्रि
तानांनविपत्त्राणंतामाश्रिताह्याश्रयतांप्रयांतिइतिमार्कंडेयात् ७७ श्रीरिति श्रिक

वप्रछ्रीत्यादिना श्रयतेः क्विप् दीर्घश्च श्रयंत्येनामितिकेचित् श्रयतीति हरदत्त मिश्र
ना॰ भट्टोजिदीक्षिताः ७८ शरण्येति पूजारदत्ते प्रियत्वात् पूजनीया जनैर्देवी स्थानेस्था
टी॰ नेषु वेषु रे इति तत्र वराहप्रक्रमे भविष्यपुराणात् शरत्काले महापूजा क्रियते या च वार्षि
११२ की मार्कंडेयपुराणे वर्षे वर्षे भवतीति वीप्सया वसंते वसंते ज्योतिषेति नित्यत्वे वोध्यत
इति तित्वंषकारे व्याख्यानात् शरत्काले चतुर्थ्यादि नवम्यंते विशेषतः इति तत्र पुरश्च
रणे क्रेश्च ७९ आकारवज्रा षट्कोणचक्रमध्यस्थेति पूज्यास्थानमस्याः त्रिनष
113 ट्कोणमष्टदलनलिनमित्याथर्वणात् षट्कोणांतर्गतं पद्मं भूविं वहितं यततः
तन्मध्ये पूजयेद्देवीवाहने प्रावमेव वेति गंधर्वतंत्राच्च ८० संपदेति श्रायपैवहले
तानामितिदाय् समंतात्तदयस्या इति वा सर्वदा सर्वभूतेषु दृष्टवा सर्वतोमुखी मा
त्स्य देवुक्तेः ८१ ह्रीविष्णोर्मितेति लज्जावत्त्वस्थानात् तथा च श्रीवाक्यं परस्य
वेश्माभिरत्ना मलज्जामेवं विषांस्त्रीयपरिवर्जयामि कल्पतरौ दत्तः दयालज्जा धृति
श्रद्धा प्रभान्यागः कृतज्ञता पतेयस्य गुणाः संति शुहस्योमुख्य उच्यते ८२ क्षेमेति ११२

लब्धयालनंक्षेमः भक्तानांनंदावहत्वात् योगक्षेमंसदाकुर्याद्भवानीकाशिवासिनां
तस्माद्भवानीसेवेषामततंकाशिवासिभिरितिकाशीखंडोक्तेः यतत्त्वंसत्त्वशक्तियुक्त
त्वाद्वा यद्वा लकारोईःलक्ष्मीमातिक्षेमा सरस्वतीरूपेणअकारादिक्षकारान्तत्वात् ८२
अर्थाकारादिक्रमेणषोडशनामान्युच्यंते अयेति अदभक्षणेऽस्माद्भावेक्विप् अद
भक्षणंमारणंयातिप्राप्नोति कर्मविशेषेणतद्रूपत्वात् मारणोच्चाटनेतयेतिकौली
नेत्रात् ८४ आज्ञेति यतत्त्वंसत्त्वभ्रूमध्यचक्रास्थितत्वात् यद्वा अविद्यमानाज्ञायस्याः
अकारेणनिषेधार्थेनसमासः यद्वा भक्तानामव्याहतादेशत्वकरणात् आज्ञासिद्धिः
प्रजायतइतिमन्त्रसत्त्वात् ८५ इज्येति इःकामोज्याभूमिर्यस्याः ज्यामौर्वीज्यावसु
धरेतिशाश्वतः रत्यासक्तमनोभवापविद्धचापायजवासन्निभामितिक्षित्रमहत्वाख्या
नदर्शनात् ८६ ईश्वरवल्लभेति स्पष्टार्थं श्वुनःसारमेयात् रातिश्वरोवटुकः श्व
पृथ्वेष्टितंरम्येइतिदर्शनात् ईलक्ष्मीमत्वर्थलक्षणयातद्वांश्चासौईश्वरश्चेतिसमासः
यावत्मवटुकेदद्यादितिवचनात् ८७ उग्रेति तीक्ष्णस्वभावात् उग्रामीमाचभैरवी

तिश्चान्तुक्तयोगिनीरूपत्वाद्वा उग्राःशिवोऽस्यस्यास्तदेगार्द्धीसक्तत्वाद्वा यद्वा उक्तवचने
वचोव्यक्तिपिबचित्स्वपीतिसंप्रसारणे उवेरात्ति ददानीत्युग्रा सारस्वतत्वात् ८८ उग्रेति अ
न्यंतंशुद्धहेतुत्वात् उग्रोवानेनशुद्धानीत्युक्तेः यद्वा भ्रूमध्यावर्त्तवत्स्वसंवेद्यत्वं महा
भागपहेतुत्वात् उग्रेमषादिलोन्निस्यादावर्त्तवतरायुवादिन्यमरः यद्वा उग्रेजूद्भाका
दने स्वार्थेण्यंताद्वा देवाक्किप् ततस्तत्करोतीति णिविणेविह्व इति दिलोपे ततःपचा
द्यचिकृते टाविति व्याख्येयं सत्वादिनास्वधर्मेणोपरक्तसर्वप्रतीतिविषयत्वात् ८९ अ
कारेति अकारोदेवमातास्यादित्येकाक्षरकोषः तस्याःकारःकरणंयस्याः अदितेर्भ
गवत्यंशजन्यत्वस्यश्रुतेर्वर्णमभिधानात् ९० ऋस्वरोद्भवेतिस्वरेत्यवांसंज्ञा ऋकारोदितिरव्य
तेइत्येकाक्षरकोषः अर्थःप्रागवत् ९१ लृकारवर्णकूटस्थेति लृकारोपलक्षितोवर्ण
कूटः यवर्गः तदुपलक्षितस्थानंवाराणसी पीठन्यासेलृकारस्थयकारक्त पवर्गेणाभ्रू
मध्ये वाराणसीन्यासविधानात् तदलंकृतेनत्वस्यतत्वात् तदुक्तंकाशीखंडे सादुर्गा
प्राक्तिभिःसार्द्धंकाशीरक्षतिसर्वतः ताःप्रयत्नेनसंपूज्याः कालरात्रिमुखानरैः रक्षे ११४

तिदेवत्रमेतद्द्वैत तथान्यानवशाक्तयः उपसर्गसहस्रेभ्यस्तावेदिदेवताः क्रमात् ४२ लृकारस्व
रम्लृषिनेति अस्याधारणेपनतस्यमंत्रशास्त्रपवस्वीकारात् अतएवदीर्घल्लृकारोमंत्रशास्त्रपव
न्यासादौगृहीतोऽन्यत्रतास्यैवेतिवैयाकरणाः ४३ एषेति इच्छतेर्भावेघञ् एष इच्छास्व
स्याः स्मरणीयत्वेनतथारूपदातृत्वात् अथवा इषआभीक्ष्ण्येक्र्यादिः हामादौएषयोनः
पुनस्यस्याः यद्वा एतदितिसर्वनाम्नोरूपं व्यापकत्वाज्ञकानांसमीपतरत्वात् समीपय
र्तिचैतदोरूपमितिस्मरणात् ४४ ऐषेति ईषदानेऽस्मात्क्विपिसमाहार्थेऽणिएषदानः
समूहः सर्वप्रदेयभेदात् सोऽस्त्यस्याः यद्वा इषआश्विनः तत्रभवंपूजाकर्मास्त्यस्याः आश्वि
नेमासिदर्शादिपूर्णमास्यन्तिकेसर्वाधीरितिशाक्तिकत्वात् यद्वाऽऽह अत्र इषेत्वोर्जेत्वेत्यत्रतथा
व्याख्यानात् तस्यदैमैर्येश्वस्त्यस्याः अत्रधर्मस्वरूपत्वात् ४५ ओषेति उषतिदहतिकालाग्नि
रूपेणतथा उषदाहे अस्मात्पचाद्यच् यद्वा आसमंतादुषावाणकन्यायस्याः परिवारकत्वा
द्वरदानाच्च उदंचहरिविंशेस्पष्टे यद्वा तस्मैनृत्यशिक्षणात् तथाचशार्ङ्गदेवः पार्वतीत्व
प्रणास्तिस्मलास्यंबाणात्मजामुषां तयाद्वारवतीगोप्यस्ताभिः सौराष्ट्रयोषितः ताभिःस्व

शिलिनानार्येर्जानाजनपदोद्भवाः एवंपरंपराप्राप्तेमेन्त्रेलोकेप्रनिहितं १६ ओंकारादन्त्यथारि
णीति पीठमंत्रस्यओंकारघटितत्वात् विहङ्गसमस्त्वार्यमनुविंदकलान्वितमिति वीरचू
डामणि चूडामणिवचनात् यद्वा अवनिरत्तति ठः तामेस्नहः आशाद्ययोगेपत्येयन्यूनत्वारि
तिहृद्धिः कारासंसारहूपावेयः तत्रतः सप्तजीवात्मानः द्वाविमौपुरुषौलोके क्षरश्चाक्षरएव
चेति भगवद्गीतादर्शनात् तानुद्धारयतिस्वाभिन्नत्वेनेत्यर्थः १७ असेति पशास्त्रकंयत्पात्
प्राशस्त्यंचकौमारीजन्महेतुत्वात् स्कंधाद्रोवह्निकौमारीतिप्रागुक्तवामनपुराणात् अथवा
अउत्पत्तिस्वारःसशहेनमस्कारः तदुक्तंमंत्रत्वात् वमवीजेतडभयप्रयेषणात् क्षनुस्वारस्य
ववीजान्तरेष्वपिप्रवेशनात् १८ आःकारवलितेति अःइतिविसर्जनीयः चंद्रःसर्गीततः पंचा
वाणगयंवीजपंचकमित्यादि मंत्रान्तरोद्धारेतत्रान्तरे विसर्गस्यापिमंत्रान्तर्भावोक्तेः अथ
वा आःकारस्यापिविसर्गघटितत्वात् तथाचाथर्वणेश्रूयते तत्रव्यापकतोशत्रैऔआःका
रेवितत्वेनततः इतिप्रक्रम्य तस्योपरिमहाविद्यामित्यादि १९ सर्वागमसुगोपितेति आ
गमपदव्युत्पत्तिःसमयाचारे आगतःशिववक्त्राद्गतश्चगिरिजामुखे मतश्चवासुदेवस्येत ११५

115

स्मादागमउच्यते इयंतु शांभवीविद्यागुप्ताकुलवधूरिवेतिशास्त्रकवचनात् यद्वासर्वेत्रय
त्रविदागमेनगमनाभावेनगोपिता अप्रदेयत्वेनोक्तत्वात् तथाचफेत्कारिण्यां कृत
सुकृतसहस्रानेकजन्मप्रभावैर्यदिभवतिमनुष्यागुर्वधीनसिद्धिमाय कथमपिमनुमे
नेप्राप्यशिष्यायतस्मैनिजकुलकायजेषुपुत्रयद्वयात् मनुर्विमृष्यदातव्योज्येष्ठपु
हितकारिणे पुत्रायकिमुतान्यस्मैविगोत्रायस्वपौरुषं तथा यद्यदृष्टवशाल्लाभोम
त्रस्यास्यभवेत्प्रिये स्वगोत्रपौरुषेनैतदन्यगोत्रेनयेत्सुधीः १॥ वाक्यप्रमाणपदसाग
रपारगस्य लक्ष्मीवराभिधत्वयस्यनृसिंहदेवेन विश्वेश्वरेणविहिते गिरिजाभिधार्थविं
तामणौतुपदपूर्णायमगान्मयूखः श्रीः एवमात्मविषयेणापरिणामप्रातिरूप्येनइदंस
निरूप्य श्रीनिधानमभिधानसहस्रेतत्फलान्यपियतेविवरीतु श्रीः ईश्वरउवाचेति म
यैकत्रे - णानभिधानेनपूर्वंप्रक्रांतस्यईश्वरस्यवक्तृत्वानुष्टत्वावपि नामसहस्रसमा
स्याप्रकरणेनशदेभस्तवनाय पुनस्तडक्त यइति प्रत्यहमितिवीप्सायामवड्भावः
भक्त्यादेवताविषयकइतिह्रयायामाविनोव्यामः तदतिशयायुक्तइतियावत् दिवेतिम

तारा॰
टी॰
११९

116

समस्यर्थेवायं रात्राविन्यप्यर्थे समस्यन्तो रात्रिशब्दो वा संख्याप्रसिद्धा यद्यपि संख्यापि रात्रिरेव
पत्तद्वीपावच्छेदेन निरन्तरविकलकालस्यैव रात्रिरूपत्वया संख्यायाश्चापि तदन्तर्भावस्यद्वो
पायादौ यवस्थापितत्वात् तथापि गोबलीवर्दन्यायात् पृथगुपादाने तदवच्छिन्नका
लस्य फलविषयार्थं पृथग्विधानं वा नवरात्रिपदे संख्यापरस्याउपसंहारन्यायादिति वा
के एकवाक्ये सामान्यविषयोरुपसंहारानभ्युपगमात् सामान्यवाक्यस्यैव पर्य्यायत्वेः
त्वेवेति मात्रपदमन्यानपेक्षत्वपरं राजशब्दः क्षत्रियमात्रपरः इत्यवेष्ट्यधिकरणसिद्ध
त्वेपि अत्रमूयपएवग्राह्यः अन्येषां वद्गीभावप्रकर्षविरहात् सर्वागमेषु सर्वेषु गणेषु
पूज्यः सर्वोत्कृष्टज्ञानशालीस्यात् सर्वज्ञत्वमन्तं वेति समासः स्वयमिति परं वेदयेद्यस्तः
चने हर इति साहचर्यलक्षणयाप्रयोगः सर्वत्रशास्त्रपदं तन्त्रातिरिक्तपरं उत्तरार्द्धफा
लेस्तवपाठकस्यैव ज्ञेयं पूर्वार्द्धे राज्ञः कर्तृत्वप्रक्रमे पि सामानाधिकरण्येन कार्यकारण
भावइति तथालाभात् शिवस्यानइति आयं द्वयं प्रसिद्धं अन्ययोर्लक्षणे त्रिशक्तिरत्ने
काकादिनीडसंपृक्तं कृमिकृत्रादि संयुतं नागरैर्दूरनिर्मुक्तं साधसोत्पत्तिकारणं सो ११९

वार्यान्कृतवत्सादयएवंकुर्वेरितिफलेनार्थः लेखनः लिखेश्नितिचाभर्थेकः तमावष्टे
णिचू दीर्घोच्चारणसामर्थ्यादन्यत्राप्याणिगित्याचेयादयः लिखेस्यश्चायः प्राप्तिः लेकारो
तीति समाधानेभाष्येश्वाकारप्रत्याख्यानात् इतिभट्टोजिदीक्षिताः वस्तुतः एकतेक
मीतरानन्तयादिप्रसंगात् छंदसिरूपे सौख्यमयीत्यत्रप्राप्तुर्येमयट् सव्यपदंचवामपरं
स्त्रीणांतत्पादर्शनानां सव्यंदक्षिणवामयोरितिकोषः एवमिति प्रागुक्तनिवाहल्पायेकं
समापेडितसमाजः व्यसनेविपत्तिः विवादोव्यवहारः प्राज्ञसंकटतेषामुपरोधः हल्पश्च
रथ्यपादातेसेनांगस्याच्चतुष्टयमित्यमरः संदलयेयोतीक्ष्यवंडः खेस्यप्रतियोगित्वेनान्वयः
प्रसंगादाह पूजनीयेति एतत्वेनफलानिश्चायार्थे अन्यथानित्यतहानिप्रसंगात् अन्या
गाख्याख्याते शिवालयःशिवस्य शिवायावादेत्रे विल्वहवनतलेप्रसिद्धं तथाणेवेत
द्वितीयचरणेनेवत्तः पद्येइतिपठितत्वा शिवालयेविल्वमूले इतितृतीयचरणंपठितं कु
लमंडलेताद्दशस्थानेकुलद्दवनतलेवा एकलिंगेश्मशानेत्युपक्रम्य कुलपादपमूलके
इतिरुद्रयामलात् कुलद्दवाअपितत्रैवोक्ताः श्लेष्मातकेकरंजेचनिवाश्वत्थकदंबके वि

तारा॰
टी॰
११९

119

ल्वंवटेश्गलनात्संस्मात्खोटं त्वर्ज्जरंतथा कुलहृत्ताः समुद्दिष्टा इति विल्वस्य पृथगुपादानं प्रा
धान्यसूचनार्थं सूकरेति सूकरपदं तन्मांसपरं दंत्यादिमपि सूकरपदं सौकर्यं समा॰
सादितपरणे मंडल इति वासवहृदरदनाश्लेषात् तालव्याद्यपि दंत्याद्यशंक सूकरपाशव
इति कोश्गणत् मैरेयमासवः सीधुरित्यमरः भिस्सा स्त्री भक्तमंधोन्नमित्यिव सतंडलैर्डमे
रितिप्रत्येकमिश्रितैर्वा यद्वा पायसं कृशरं वेदयाह कृशरा संप्लुतमिति मत्स्यमांसक्षाप्लुका
नामिति संग्रहः निवेदितमिति देवतोद्देशेन समर्पितं द्रव्यं अवधानतोऽवश्यं भोक्तव्य
प्राप्य पादोदके देवि निर्माल्ये विभजेत्प्रिये तद्भक्तेभ्यः स्वयं भुंक्त्वा तन्मयो विहरेत्सुखमिति
कुलमूलावतारोक्तेः निर्माल्यं च शुचौ देशे नैवेद्यं भक्षयेत्सुधीरिति भैरवीतंत्राच्च अत्र
एवात्र देवतोद्देशेनान्यस्य भोजने दोषानवतारः स्विष्टकृदादिवद्ध्यावनिकप्रतिपत्तौ तत
दग्रहणे अत एव स्मर्य्यते हृदि रूपं समाविनोमनैवेद्यं स्वदेहे हरेः पादोदकं च निर्माल्यं मस्तके
यस्य सोऽच्युत इति प्रकरणे निंदार्थवादमाह तन्नवेदिति भोक्तुं साधकमित्यर्थः ब्रह्मपुराणे
वचनेन देवीनैवेद्यस्य स्त्रीशुद्रप्रतिपत्तिरुक्ता विप्रेभ्यस्तत्पनेदेयं ब्राह्मणाय निवेदितं वैस॰ ११९

वंसात्वतेभ्यश्च भसंभोगेभ्यश्च क्षणे भवे सौरं मकेभ्यः श्रीगोकेभ्यस्तानपि नेयन्निवेदितं स्त्रीभ्यः प्रदेयमा
त्मभ्योयत्तत्किंचिन्निवेदितं तथा भक्तेभ्यस्त्रीभ्यो वा दानेस्वयं वा भक्षणमिति विधाप्रतिपत्तिः
स्पष्टमन्यत् शार्दूलविक्रीडितेनोपसंहरति यस्मात्त्रमिति फलितार्थितात्क्रमेण इति षष्ठी
यिकरणन्यायात् मानवइति चातुर्वर्ण्यपरं विनचयैविति तनजातीयनानाद्रव्यग्रहणम्
एकद्रव्यबाहुल्येपिकुवेरसामान्यानापत्तेः तथापिश्रीसरस्वत्योः प्रायशोविरोधात् पांडित्येन
स्यादतआह विधेति विद्यायाज्ञवल्क्येनोक्ताः पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः
वेदास्थानानि विद्यानां धर्मस्य च चतुर्दश पदैः सर्वोत्कर्षपरानभिभाव्यत्वादिभिः बृहस्पतिरे
वस्यात् मूर्त्तिमान् चतुर्वर्गीश्रोमनसिजः कामः तथापि जनप्रियत्वं न स्यादत आह कांत्येति
चंद्रवत्सर्वाल्हादक इत्यर्थः प्राक्तनादृष्टोपायेन कार्यसामर्थ्येन शंकरः शिव एव सर्वत्र तस्येवा
नभ्यर्हितत्वमित्यत आह श्रेयेति तथा वोभयविषमपि सामर्थ्यं तस्य भवतीति भावः
अत्र धनेश्वरसम इत्युपमालंकारः वाक्पतिरित्यादौ रूपकं मूर्त्तिमानित्यत्र व्यतिरेकः उप
मानाद्युपदस्य व्यतिरेकः स एव सम इति काव्यप्रकाशे अभेदेन तत्सादृश्यादेपे मूर्त्तिमानित्यने

नाया॰ टी॰ १२०

120

नउपमानेवैलक्षण्यएपस्योपमेयेमिहितत्वात् ततश्चैतेषांपरस्परमनपेक्षैकवाक्यविद्यमानत्वात्सं
सृष्टिरलंकारः शंकरइत्येतावतैवतेनतादात्म्यलाभेसंभवत्यपिएवकारः आरोपदृढीकरणा
र्थः नविषयिषमित्याहुर्वक्ष्यसेविषमस्यातअपादावलंकारस्तेसर्वेस्वविवरणाद्गंसेगोप्ययरकारादि
भिस्तथाभ्युपगतत्वात् अप्पदीक्षितोक्त नायंरूपकांशः किंतर्हि रूपकांशःश्रेयसीमुखमित्या
दौपर्यस्तापह्नुतिमल्लकुवलयानंदेदृष्टीवकुः तदीत्यात्तशंकरएवभवतीत्येवकारेणस्वस्मि
न्स्वतादात्म्यंनिषिध्यशंकरतादात्म्यारोपस्यगम्यमानत्वात् प्रहृतेपितथैवेत्यवधेयं पल्लवः
स्तस्त्रलंकारकौस्तुभेदृश्यइतिसर्वंशिवं वाक्यप्रमाणपदसागरपारगस्यलक्ष्मीधराभिध
बुधस्यतनूजवेन विश्वेश्वरेणविहितेगिरिजाभिधार्थचिंतामणौरविमितोयमगात्मयूखः
श्रीः समस्तविनमितदिक्पालनृपतीन्द्रमौलिस्यूतलीनटन्मुकुटरत्नकटीकृततनटांतसिंहास
नः यशोविशदचंद्रिकाप्रतिहृदितसमुल्लासनप्रकाशितजगत्त्रयोजयतिराजचंद्रान्नृपः १
तस्मिन्महीं शासतिधर्मसूर्दंवनाम्नोसहसंजगदेविकायाः विश्वेश्वरेणात्मधियानुरूप
व्याख्यायिभूयोविशदीकृतार्थम् २ अस्तीहपद्यपिनकोपिविशेषलेशः प्राचास्तथापिनक १२०

गीता॰ दाविदमंतुत्यजंतु रत्नाकरोजगति सत्रापिवंदिराशिर्यत्नेन कोटिमपिकिंनुवराटकानाम् २

टी॰ संवत् १९ ५२ चैत्रकृस्नपक्षेचतुदश्यां रविवारा ॥ श्रीपरमदेवताप्रीताभवंतु ॥ शुभं ॥

२९

तारासहस्रनाम्नीः व्याख्या विश्वेश्वराख्यस्य। निर्मितिरपगतदोषा तां सामक्त्वाब्रभानुरलीयं

तारासहस्रनामदी टीका॥ मंत्रशास्त्र